ब्रह्मयामहासंहिता

किमद्भुतं स्वप्नेऽप्यसम्भावितम् ... व्येय ... प्रकाशयितुमयोग्यमेतदहो! भातं संख्यातीतैरप्युदित ... शीश्व ... श्वर—लीलानिलये ... विलक्षणमेतं समुद्रं ... क्षित्रे सम्भवप ... प्यपि किमु वक्तव्यमेव?

अत्र च ... विविध—सज्जा—विभूषिता दशहस्तिनः,—तदुपरि पारलसच्चित्रविचित्रवसनासनसन्निविष्टा ध्वजिनो जयध्वनिपरायणाः,—तत्पश्चादपि सुशोभितघोटकमोटरशकटादयः, विविधवाद्योद्यताश्च वादकाः,—तस्यापिच पश्चात् पञ्च-ष-शतमिताः पवित्रवेषाः प्रोज्वल-भालस्थलतिलकाः धृतपताका हरिनामकीर्तकाः,—तत्पश्चाद् विविध—निधि-विमण्डित सिंहासने वहन्तो वेदग्रन्थान् वैदिकाः,—तदनु जगद्गुरु श्री १०८ श्रीशंकराचार्य्यचरणाः स्वसेवकधृतसुवर्णखण्डविमण्डित-राजतसिंहासनमधिरूढाः धृतसुवर्णमयराजतदण्डच्छत्रैरनुचरनिचयै-श्चामर—व्यजनसंवीजिताः।

तदनु विविध वाद्यवादकाः—तदनु पुनरनेके पवित्रचरित्रा विद्या-र्थिनः—तत्पश्चादपि क्रमशः संख्यातीतसेवकपरिवेष्टिताः समधि-तिष्ठन्तो नानामणिमण्डितसिंहासने श्री १०८ श्रीरामानुजाचार्य्य-श्री १०८ वल्लभाचार्य्यप्रभृतयः। तदनु च वाराणसेयाश्च विदेशीया ज्ञानविज्ञानखनयः सुधियो विद्यार्थिवृन्द-सभाजिताः वैशिष्ट्यं स्पष्टयन्तो मन्दं मन्दमभिवन्दमाना धर्म्मम्। तदनु पुनर्वादकाः—तत्पृष्ठतो बहवो ब्राह्मणपण्डिताः—ततः श्री १०८ नाथद्वाराधीशा अवर्णयरत्नच्छटा विलोलं स्वसेवकस्कन्धास्थितं विशिष्टमधिरूढाः सिंहासनम्।

तदनु पुनर्वादकाः,—अगणितजन गणाश्च। अस्याञ्च शोभायात्रायां विंशतिसहस्रजनसमागमोऽनुमीयते।

... अयि पाठकमहाभागाः! किमु तूष्णीं विभाव्यते? किमहो! द्रष्टुमस-... धीरस ... तवासिनो! महोदयाः कपोलतलनिदधत्करतलाः! अनुशो-... ... तापमापतन्तु! ततोऽपि कथञ्चिदपयास्यन्ति वो दुःखा-मण्डपे, वंशी ... कृतमनुशोचयथा, अलमलं परितापकलापेन!

श्रुत्वापीदं पुण्यवचः-स
यित्वा स्वान्ते चरिताथ नमानय
सुखमनन्तं, पावित्र्यं च मात्रया नूनं भवतामु
पर्य्यालोच्य च कार्य्यकलापमेतस्य उपरिष्टादवगच्छ
मेवम्विधम् ।

अपरमपि वैशिष्ट्यमस्याः शोभायात्राया—यां कांचिद्दिशमवलोकयन्तु—नरा वा नार्य्यो वा स्तिमितदृष्टयो भक्तिभावसमाविष्टाः दृष्टरोमहर्षा धृतधीरताका हर्षोत्थनयनवार्य्यो बत! किम्भूताः किमाकारा आवेगमयजयध्वनिकारकाः मुखरयन्ति दिगन्तमेकान्तम्, एवमेवं भुवनशुभकामनया शुभस्वस्त्ययनादिना दिनमेतदतिक्रान्तम् ।

ब्राह्मणमहासम्मेलनाधिवेशने प्रथमो दिवसः—



सौरकार्त्तिकस्य विंशतितमेदिवसे दिवा द्वादशघटिकायां सम्मेलनीयं प्राथमिकं कर्म्म समारब्धम् । विना प्रवेशपत्रं न कस्याप्यासीदस्मिन् प्रवेशनाधिकारः। संमुद्रितेप्ययुतमिते प्रवेशपत्रे सभायाः—पञ्चष-दिवसादग्रत एव सावधानं वितरितेऽप्यकस्मान्निःशेषिते पुनरनन्यगतिकतया व्यक्तिविशेषहस्ताक्षरपरिज्ञानानुसारेण विशेषचिह्नाद्यनुबृंहितेन च तेन तेन प्रवेशपत्रविशेषेणाप्यसंख्यकजनसमावेशः समालक्षितः ।

ये नामानिर्वचनीयमदः सदोदृश्यं नापश्यन्, न तान् भगवानपि नाम वचसा समनुभावयितुं प्रभवति । यत्र हि वाराणस्या वरेण्ये नैमिषारण्ये पुण्यवतामनन्यसाधारणपुण्यगिरा चिरचरितार्थं श्रवणमिथुनं, अपि च बहि-रहित-विलोकन विकलं विलोलं लोचनयुगलमप्यलोलमिव तत्कालमभूतपूर्वैरिव प्रभूतब्रह्मतेजःस्फुरणैः कृतार्थं जातम् ।
मपि मनो दान्तं पूतमभूत्तदानीम् । भुजद्वन्द्वं स्पर्श

किमद्भुतं स्वप्नेऽप्यसम्भावितव्येव सीत्। न पादद्वयं पुरः भातं संख्यातीतैरप्युदितत्तकस्थापसोपशयां दर्शकानाम्। त्वगपि विलक्षणमेतं समुद्रं मिन्या। यत्रैवमेव सर्वमिन्द्रियमतिशयितमर्य्यादं—

अत्र च प्रपंट्वो वर्णयामः।

विस्तीर्णे शुभ्रवर्णे सभामण्डपे उत्तरस्यामाशायामुन्नते प्रान्ते प्रथमतो धर्म्माचार्य्याणां विन्यस्तमासनम्। मध्यस्थले च तप्ततपनीय-खण्डविमण्डितं प्रत्ननूत्नरत्नसमन्वितं राजतसिंहासनं विराजतेस्म भगवतो वेदस्य कृते। तस्य च प्राच्यां प्रतीच्यभिमुखं श्री १०८ शंकरा-चार्य्यचरणानां विष्टरम्। तत् पार्श्वे च दरिड-संन्यासि-सम्प्रदायाना-मासनम्। श्रीश्रीमद्वेदासनपश्चिमपार्श्वे च दक्षिणाभिमुखं श्री १०८ रामानुज श्री १०८ वल्लभाचार्य्यादीनां विन्यस्तकनकं रौप्यसिंहासनम्—एतेषाञ्च पुरः समतले स्थले चित्रविचित्रसुरम्यवस्त्रोपरि राजाधिराजमहा-राजादिपदभाजां विशिष्टशिष्टानाञ्च कृते निर्दिष्टमासीदासनम्। तस्य च पुरो मध्यवर्त्तिवर्त्मपार्श्वयोः पश्चिमांशे पूर्वांशे च नानादेशीयानां वारा-णसेयानाञ्च प्रतिनिधीनां कृते सुव्यवस्थितमासीत् स्थानम्। मध्ये च संवाददातॄणां पत्रिकाप्रतिनिधीनाञ्च स्थानं व्यधायि। पूर्वस्यां पश्चिमायां च दिशि दक्षिणस्याञ्चांशतो दर्शकवृन्दानां कृते शोभनैव व्यवस्था विहिता।

सभापि नाम एवम्भावेनाभूत् यन्मण्डपमध्ये यत्र क वा स्थितस्य नयनमप्रतिहतं दृश्येषु श्रवणेन्द्रियमपि तथेति सभाव्यवस्थाकारिणः सर्वथा श्लाघनीयाः।

प्रशस्त–विस्तीर्ण–राजमार्गैकपार्श्वे विस्तृतसमतले स्थाने विधाय सदः-प्रबन्धं तन्मध्यस्थलवर्तिनि च द्वारे नानावस्तुपरिशोभितप्राचीरे धीरसमीरणरङ्गभरे च तोरणद्वारे वेत्राहततौर्य्यत्रिकवादित्रनिर्घोष-स्फारितदर्शकश्रोत्रविवरे शंखपटहघण्टादिनिनादप्रतिनादिते सदो-मण्डपे, वंशीस्वनहृतमानसे च जनसमूहे तदानीं कीदृगासीदानन्द-

२

प्रवाहः स चानुभवमात्रवे : दृष्टस
कस्यचनापीति यथार्थमेव ।

महासम्मेलनस्य चतुष्पार्श्वस्थप्रशस्तराजमार्गे
याननानाशकटादिसङ्कुलिते जनानां द्रुतगतिः प्रतिहता, तिलधारणे" इति प्राचीनप्रवादस्य च याथार्थ्यमत्र समनुभूतमनेकैः ।

अथ यथाकालं क्रमशः स्वस्वीयसेवककुलसङ्कुलिताः वेदादिनिनाद-विनिन्दितवाद्यघोषैर्जयध्वनिध्मातराजाध्वभिः सहचरस्तोमैश्चामर-चामीकरव्यजनसंवीजिता विजितकामाः कामाभिरामा धर्माचार्याः शंकराचार्य-रामानुजाचार्यवर्य्यादयः मन्दं मन्दमुपसर्पन्तः प्रोज्वलज्वलनसमान-सिंहासने स्वीये स्वीये समुपविष्टा हृष्टान्तःकरणाः करुणैकसाराः सौम्य-दृष्टयो वृष्टशुभाशीराशयो जनतायां व्यराजन्त ।

तस्मिंश्च तपोवन इव पुण्यमये प्रवाहे वङ्ग-विहारोत्कलासामसौराष्ट्र-महाराष्ट्रमद्रांध्रद्राविड़कान्यकुब्जादिनानाप्रदेशवासिनो लब्धप्रतिष्ठानात्म-ज्ञानविज्ञानधनाः पूतचेतसः प्रायस्त्रिसहस्रपरिमिता ब्राह्मणपण्डिता मण्डपं मण्डयन्तो व्यवर्द्धयन्त सौन्दर्य्यगाम्भीर्यादिकं ब्रह्मसदसः ।

एवमेव क्रमशो राजपूतानाधिनायक-हिन्दूकुल-तिलकाः कृष्णगढ़ीया महाराजाधिराजाः हथुआधिपतयो महाराजाः सह पारिषदैरध्यतिष्ठन् यथायोग्यान्यासनानि । नानादेशीयैरपि पण्डितदेशीयैरितरेऽपि ब्रह्म-क्षत्रवैश्यशूद्रादयः पर्यपूरयन् सदःप्रदेशम् ।

अस्मिंश्च सुमनःसागरे अमूल्यान्यथ च साधारणसुलभानि नाना विधानि रत्नान्येव, नतु कुम्भीर-वर-वारिवारण तिमि-कम्बु—राघव-ग्राहा-दीन्यतिभीषणानि वस्तूनि। ये नाम धर्मद्रोहिणो नक्रादिनीकाशाः सागरेऽस्मिन् जनतां व्यतिव्यस्तयितु मतियतन्ते स्म स्थानमालब्धुं तेहि ब्रह्मण्यदेवमहिम-हरिद्रादिगन्धैर्मन्दवेगा निरगुरसुरसमा महासम्मे-लनजलनिलयात् ।

किमद्भुतं स्वप्नेऽप्यसम्भावितमतिपूतं धीरतरङ्गसङ्घातमिव प्रतिभातं संख्यातीतैरप्युदितचन्द्रैर्मन्दमपि अनुद्वेलितं धृतगाम्भीर्य्यमात्रं विलक्षणमेतं समुद्रं निशामयन्तो नान्तःशान्तिरनन्ता न कस्य सञ्जाता ?

अत्र च प्रथमतो धर्माचार्याणामर्च्चनाचर्च्चनानन्तरं जन्मान्धस्य स्वीयकरतलयुगले विलक्षणध्वनिदत्ततालस्य श्रीमतो बच्चुलालाभिधानस्य विनान्यवाद्ययन्त्रं तन्त्रीस्वरमधुरोद्बोधनगानैः सर्वे च सभ्या नव्यभावैरभिभूता इव समभवन् ।

सति चैवं सभा-साफल्यं कामयमानैर्धर्म्माचार्य्यवर्य्यैराशीर्वचसा निर्विघ्नं सभासमाप्तये च जगतां हिताय मनसा च समुपासिते भगवति ब्रह्मण्यदेवे काञ्चीकामकोटिमठाधीशश्री१०८शंकराचार्य्यपादैः पुष्पगिरिमठाधीश्वरश्री१०८शंकराचार्य्यचरणैश्च पत्रैः प्रेषिताशिषि तत्तत्प्रतिनिधिभ्यां पण्डितवराभ्यां श्रीजगदीशशास्त्रि-श्रीमल्लादिरामकृष्णशास्त्रिमहोदयाभ्यां यथाक्रमं पत्रे वाचयित्वा विज्ञापितायां सत्यां, अहोबलमठस्वामिनां तोताद्रिमठाधिपतीनां च १०८ श्रीमदाचार्य्यपादानां शुभाशंसनं सभां प्रत्यानुकूल्यादिकञ्च पठित्वा पत्रं सभायां प्रचारितम् ।

ततश्च जगद्गुरूणां श्रीवल्लभाचार्य्यचरणानामाशीर्वादास्तत्प्रतिनिधिपण्डितप्रधान श्रीरमानाथभट्टमहोदयैर्विज्ञापिताः । समुद्घोषितमपि श्री १०८ द्वारकेशाचार्यमहोदयानामपि शुभस्वस्तिवचः । सर्वेषु च विज्ञापितेषु क्रमश एवमाशीर्वादेषु उच्चैरुच्चतरैः सनातनधर्मजयोद्घोषैर्मुहुर्मुहुः प्रतिध्वनित इव प्रकम्पित इव सभामण्डपोऽपूर्वभावं व्यधत्त ।

तदनन्तरञ्च स्वागतसभाध्यक्षाणां नानोपाधिविभूषितानां धार्मिकधुरीणानां महाराजश्रीकाशीनरेशमहोदयानां शरीरास्वस्थतया स्वयमनुपस्थित्या—तत्प्रतिनिधिरूपेणोपस्थितेषु तदीयानुरूपतनयेषु युवराजमहोदयेषु यथास्थानमलंकृतेषु च—तेषामपि कण्ठपीडाविशेषेण स्वयमसमर्थेषु स्वागतसभापत्यभिभाषणवाचने,—तदीयनिर्देशानुसारेण

पण्डितवर्य्येण श्रीलक्ष्मणझाशर्म्ममहोदयेन तदभिभाषणमवाचि। युवराजविनम्रव्यवहार–भक्तिश्रद्धासारल्यप्रभृतिकमपि समाचकर्ष सर्वेषामपि चित्तम्।

ततश्च "प्रबन्धकारिणीसभा"—सभापतिभिर्महामहोपाध्याय श्रीयुत पञ्चाननतर्करत्नभट्टाचार्य्यमहाभागैर्मासत्रयमभिभूतैरपि रोगैरेतावत् कार्य्यं युवजनैरिव सम्पादयद्भिः तदानीं विशेषतः शरीरकातर्य्यात् स्वयमभिभाषणपाठेऽसमर्थैरपि—परहस्तावलम्बनेन कथञ्चिन्मञ्चोपरि दण्डायमानैः कियत्कालमोजस्विन्या भाषया यदावेगमयमुच्चैरुच्चारितं स्वल्पमपि सारगर्भं, तद्धि विद्युत्प्रवाह इव जनतान्तःखेलयत् श्रोतॄणां धमनौ रक्तप्रवाहं विवर्द्धयत् सनातनधर्म्मजयोद्घोषणपुरःसरं करतालसङ्कुलितमिव सभामण्डपमकरोदिति। तदीयमभिभाषणञ्च तदीयानुरूपतनयैः पण्डितवर श्रीश्रीजीवन्यायतीर्थ एम, ए, महोदयैरुच्चै राभाषि।

तदनन्तरं सम्मेलनान्यतमसम्पादकमहामहोपाध्याय श्रीमदनन्त कृष्णशास्त्रिमहोदयै रनुपस्थितानां विशिष्टशिष्टानां, सभानुकूल्यसंसूचकं तन्त्रीद्वारा पत्रद्वारा च यदत्र सम्प्रेषितं–तदेकैकशो वाचितम्। नामान्यपि कतिपयप्रतिनिधीनां प्राधान्यतः समुल्लेखितानि। यथा—गोस्वामिचरण-श्री १०८ मुंबई श्रीवल्लभाचार्यपीठाधीश गोकुलनाथजी महाराज-नेपाल महाराजाधिराज–श्रीदेवीदास माधवदास,–श्रीमन्मध्वाचार्य्यमहाराज—श्रीनाथद्वाराधिपति—उदयपुराधिपतिमहाराज–श्रीदीनदयाल शर्म्म—महाराज श्रीव्रजेन्द्र किशोर राय चतुर्धुरीण—पण्डित एम्, के,—आचार्य,—पण्डित श्रीकाशीराम झा—महोदय प्रभृतयः।

अथ भूयोऽपि धर्म्माचार्य्यवर्य्यै रेकैकशः समुद्घोषिते स्वस्तिवादे संप्रार्थिते च सदसः कल्याणे,–प्रतिवादि भयंकर जगद्गुरु १०८ श्रीमदनन्ताचार्य्यमहाराजमहोदयै रन्यान्यधर्म्माचार्य्याणामयमनुमोदनानुसारेण

सप्ताहं यावद्विचारिते शास्त्रीयप्रमाणनिचयैर्नानाविषये—शास्त्राचार दृष्ट्या तत्तत्सिद्धान्तो ज्ञापितः।

श्रोतॄणामतिशयाग्रहात् श्रीमद्बच्चुलालेन स्वयं तद्भावमभिभाव्य स्वकृतहिन्दीभाषानिबद्धगीतिकया सुस्वरं गायता तत् स्पष्टीकृत्य सुमनोमनः समाकर्षि। अयं हि यत्किञ्चन श्रुत्वैव स्वरचितछन्दोबद्धसुललितसरलगीतिकया शुद्धताललयमानसुस्वरघटितया सम्मोहयितुमतिप्रभवति सर्वान्।

अस्य च महासम्मेलनस्य पावित्र्यं गुरुत्वं गाम्भीर्यं शान्तिमयत्वादिकञ्च वस्तुतोऽनिर्वचनीयमेव। यत्रहि सर्वे नाम सदस्याः समपास्य बहिर्भावान् पूतसिद्धान्तश्रवणे,—वक्तॄणाञ्च गवेषणामयोममूल्यां तां तां वक्तृतामाकर्णयितुमुत्कर्णाः समभवन्नाद्योपान्तम्।

अपिच गाम्भीर्य-जितसागर-सौम्यदर्शन महामहोपाध्याय श्रीलक्ष्मणशास्त्रिपादानामादितोऽन्तपर्य्यन्तं सदः पर्य्यवेक्षणं सर्वेषामभ्यर्थनादिकञ्च विशेषतः समुल्लेखनीयम्।

अपरञ्च साधारणानां विशेषतो बोधाय अश्रुतार्द्धश्रुतास्पष्टश्रुतानाञ्च धर्माचार्यादिनिर्णीतविषयाणां स्वाभाविकसरलसंस्कृतभाषया विशदीकृत्य च तदेवोच्चैः प्रोच्यते स्म श्रीमन्महामहोपाध्यायानन्तकृष्णशास्त्रिवर्य्यैः।

तत्राप्यन्यतमसम्पादक पण्डितवर्य्य श्रीमत्ताराचरणसाहित्याचार्य्य महोदयैः सरलशुचिसितस्मितैः भ्रामं भ्राममभितः सभां सुष्टु खलरक्षणार्थं सविशेषमाधायि ध्यानम्। प्रायः सप्ताष्टसहस्त्रे सत्यपि सदस्ये समुदये न हट्टायितमितः सम्मेलनमहो! जनानामक्रमवादैः—परन्तु क्षणं क्षणं केवलं सनातनधर्म्मजयोद्घोषणेन नीरवतैव निरकारि।

धर्माचार्यवर्यैरपि बहु विचार्य सप्ताहं यावद्विचारितानां गुरुतरविषयाणां निर्णयोद्घोषणावसरे एवमानन्दः प्राकाशि—"ब्राह्मणमहासम्मेलनस्य विचारसभायाः कृत्यं निर्विघ्नं सुष्ठुसमाप्तमिति वीक्ष्य सर्वैश्च

स्मारं स्मारमनिर्वाच्यसुखसमूहैरधीरायितमानसैरस्माभिरशेषाशीः सर्वेभ्यो वितीर्यन्ते, समभिकाम्यते च निर्विघ्नमस्यापि सर्वथा परिसमाप्तिः, तथात्व एव जगति वस्तुतो धर्म्मः प्रचारितो भवेत्, भवेदपि भुवः कल्याणं, मन्यते च सर्वदा सर्वथैवेदृशसदसः भृशमावश्यकतेति। ततश्च परिगृहीते कतिपयप्रस्तावे सर्वसमर्थनक्रमेण समाप्तिमगमदद्यतनाधिवेशः।

द्वितीयदिवसीयमधिवेशनम्।

सौरकार्त्तिकस्यैकविंशतितमे दिवसे बुधवासरे दिवा द्विवादनसमये द्वितीयदिवसीयमधिवेशनमस्य समारब्धम्। अद्यारभ्य स्वीचक्रे साभापत्यं द्वारवङ्गेश्वर राजाधिराजेश्वर श्रीयुतरमेश्वरसिंह महोदयवर्य्यैः।

धर्म्माचार्य्यादयश्च प्रागेव कार्यसमारम्भात् पूर्वेद्युरिव स्वं स्वमासनमलंकुर्वन्तो जनानां सभक्तिनतिततिग्रहणपूर्वकं सर्वोपरि ववृषुराशीर्वादम्। पूर्वदिवसापेक्षया सर्वेषामेव सम्प्रदायानां सभ्यानाञ्च संख्यातिरेकात्—मण्डपाद्वहिरपि दण्डायमाना मनुजाः सदोदृश्यं वक्तृतादिकञ्च समनुभूय मुहुरुच्चैरुद्घोषयन् सनातनधर्मजयम्।

सभापतेरासनं मण्डपमध्यस्थले निर्दिष्टम्। अथ राजोचित सेवकसहचरप्रभृतिपरिवृता विनीताः पूतवेशा नानावाद्यजयध्वनिसमारोहपुरःसरमुपेयिवांसः सभाया उत्थानादिभिश्च दृष्टसम्मानैः सदस्यैरभ्यर्थिताः श्रीमहाराजाः धर्म्माचार्यादीन् वन्दमाना मन्दं मन्दं सानन्दमुपाविशन् स्वकोयसिंहासनम्।

महामहोपाध्याय श्रीयुतलक्ष्मणशास्त्रिपादैः कृते प्रस्तावे साभापत्यस्वीकाराय—समनुमोदिते च तस्मिन्—महाराजाधिराजाः गृहीतमाल्याः समलमकार्षुरासनं सभापतेः।

अनन्तरञ्च सभापतिनिर्देशानुसारेण म० म० पं० श्रीमदनन्तकृष्णशास्त्रिमहोदयैः सम्मेलनव्ययनिर्वाहार्थं दत्तसाहाय्यानां वदान्यप्रवराणां नामानि दत्तार्थपरिमाणञ्च क्रमशो व्यज्ञापि। यथा—

श्रीयुत रामेश्वरदास नाथानी दूधवेवाला-महोदयैः सार्द्धद्वादशसहस्र-रूप्यकाणि श्रीसाधुराम तुलारामगोयेनका महाभागैः ११००) श्रीओङ्कारमल-जटिया महाशयैः ११००) ताहेरपुराधिपति श्रीशशिशेखरेश्वरराय महोदयैः १०००) हेमनगराधीश श्रीहेरम्बचन्द्र चौधुरि महाशयैः ३००) चौगाराज श्रीरमणीकान्त राय महाभागैः २००) रङ्गपुरस्थ श्रीलोकेश चट्टोपाध्याय महाशयैः ५०) एवं ५० संख्यकब्राह्मणपण्डितानां पाथेयं सर्वं कुम्भ-कोणश्रीशंकराचार्यैः प्रदत्तानि।

वङ्गीयब्राह्मणपण्डितानां पाथेयव्ययार्थं गौरीपुराधिपति श्रीव्रजेन्द्र किशोर राय चतुर्धुरीणमहोदयैः १०००), श्रीउमेशचन्द्र चट्टोपाध्यायै १००) श्रीभवानीप्रसाद लाहिड़ी महोदयैः ४०) श्रीशिवप्रसाद बागची महो दयैः ब्राह्मणपण्डितेभ्यः पञ्चदिनपर्य्यन्तं आहार्य्यवस्तूनि प्रदत्तानि। एवमन्यैरपि बहुशः साहाय्यं कृतं सर्वेषां नामोल्लेखस्तु न सम्भवति तदनन्तरञ्च तारद्वारा सभां प्रत्यानुकूल्यसंसूचकः संवादः प्रावाचि।

सभापतेरादेशानुसारेण हिन्दीभाषया मुद्रितं संस्कृतभाषया लिखित-ञ्च तदीयमभिभाषणं तत् प्राइवेट सेक्रेटरी-महोदयैः वाचितम्। ततश्च प्रस्तावत्रयपरिग्रहपूर्वकं सभाभङ्गो जातः।


तृतीयदिवसीयाधिवेशनम्।

सौरकार्त्तिकस्य द्वाविंशतितमे दिवसे दिवाद्विघटिकायां तृतीय-दिवसीयमधिवेशनमारब्धम्। अद्य हि सर्वथा सर्वदिवसापेक्षया जन-समागमः समधिकः सञ्जातः। सभापतेः कुतोऽपि कारणादागमन विलम्बनवशात् तदागमनपर्यन्तं कालं सर्वसम्मत्या पश्चिमखानदेशप्रदेशीया लब्धप्रतिष्ठानाः महन्तप्रवराः श्रीसन्तोजीमहाराजमहोदयाः सभापति-स्थलमलञ्चक्रुः। कार्यप्रारम्भे च धर्म्माचार्यादीनामाशीर्ज्ञापनं संवृत्तम्। समतीते च कियति काले समुपेयुषि सभापतिमहोदये द्वारवङ्गाधीशो

सनातनधर्मजये च समुद्घोषिते समधिष्ठिते च स्वासनं सभापतौ यथायथं अवशिष्टप्रस्तावादिकं समुपस्थाप्य परिगृहीते सर्वसम्मत्या स्थारं स्थायं धर्म्मजयोद्घोषणमभूदतिदृढ़म्। अवशेषे च सभापतिधन्यवाद प्रदानपूर्वकं सभाभङ्गो जात इति।



विचारसभावृत्तान्तः ।



जगन्नियन्तुः परमकृपापारावारस्य श्रीविश्वनाथस्य परमानुग्रहेण तथा जगद्वरेण्यानां भूदेवानामाशीर्वादेन अखिलभारतवर्षीयब्राह्मणमहासम्मेलनं सुचारु सम्पन्नमिति सुविदितमेव। आहिमालयात् कुमारिकापर्यन्तादापश्चिमवारिधेः पूर्वसागरपर्यन्तात् भारतीयनिखिलप्रान्तीयब्राह्मणपण्डितप्रतिनिधयः अन्ये च मान्याः सज्जना आचार्यास्तत्प्रतिनिधयः किञ्चिन्न्यूनाधिकसार्द्धत्रिसहस्रपरिमिताः स्वव्ययेन समागत्य सम्मेलनशोभामवर्द्धयन् कार्यञ्च समापयन्निति महासम्मेलनमिदं सर्वेषां पण्डितधौरेयाणामाचार्यवर्याणाञ्चाधमर्णमेव।

येषामुद्योगेनाद्य महासम्मेलनं जातं यस्य फलं चिरं वर्णाश्रमिणो लप्स्यन्ते ते परमपूज्यपादा ऋषिकल्पा महामहोपाध्यायाः श्रीयुक्तपञ्चाननतर्करत्नमहोदयाः श्रीयुक्तवामाचरणन्यायाचार्यमहाशयाः श्रीयुक्त लक्ष्मणशास्त्रिणो महोदयाः श्रीयुक्तानन्तकृष्णशास्त्रिमहाशयाश्च गते ग्रीष्मावसरे येन केनापि प्रकारेण महासम्मेलनमिदं सम्पादयिष्याम इति प्रतिज्ञाय कार्यं प्रारभन्त। ततोऽनायासेनेश्वरकृपया सनातनधर्ममण्डलेन रायबहादुररामेश्वरदासनाथानीमहोदयेन च कृते साहाय्ये सम्मेलनमिदं सुसम्पन्नम्, केचन वर्णाश्रमविध्वंसका उग्रकर्माणो जगद्विप्लावकाः शास्त्रमर्यादोच्छेदकाः शिक्षिताभिमानिनोऽस्य महतोऽनुष्ठानस्य व्याघाताय यथाशक्ति समचेष्टन्त। परन्तु कृतकार्या नाभवन्नित्येतदपि तस्यैव जगन्नियन्तुरनुग्रहेण। स हि भगवान् धर्मग्लानिं सोढुं नार्हति। कार्तिककृष्णप्रतिपदमारभ्य दिनसप्तकं विचारसभाऽभवत्, तदनु दिनत्रयं महासभा महता समारोहेण सुसम्पन्ना, ये नाम स्वेच्छासेवकास्ते निखिलप्रान्तीयसमागतप्रतिनिधीनामभ्यर्थनार्थं धूमशकटस्थले रात्रिन्दिवं तिष्ठन्तस्तान् यथायोग्यं स्थानम् प्रापयन्तश्च सेवाकार्यं सम्यक् समपादयन्निति

तेषां पक्षाधिककालव्यापिपरिश्रमवार्तामालोचयतां स्वभावत एवास्माकं कृतज्ञता सञ्जायते। तामेवाविष्कर्तुं धन्यवादप्रदानपूर्वकं तानभिनन्दामः। एवं यस्य राजर्षिकल्पस्य वदान्यप्रवरस्य महामहिमान्वितस्य शशिशेखरेश्वररायबहादुरस्य सहस्रमुद्रादानसाहाय्येन प्रोत्साहिताः पूज्यपादतर्करत्नमहोदयप्रमुखाः पण्डितप्रवरा महासम्मेलनार्थं प्रवृत्ताः सोऽपि सर्वेभ्यः प्राथम्येनाभिनन्दनीयो धन्यवादार्हश्चेति वस्तुस्थितिकथनम्। एवमेव ये ये पण्डितमहोदयाः वर्णाश्रमिणो वैषयिकाश्च समागतानां प्रतिनिधीनां अवस्थानस्थानभोजनादिव्यापारेषु साहाय्यं कृतवन्तस्तेऽपि श्रीशिवबक्षबागडीप्रभृतयः सर्वथाऽभिनन्दनीया धन्यवादार्हाश्च।

(१) विचारसभायाः प्रथमदिनवृत्तम्।

कार्तिककृष्णप्रतिपदि सोमवासरे ध्रुवेश्वरमन्दिरप्राङ्गणे अखिलभारतवर्षीयब्राह्मणमहासम्मेलनाङ्गभूतविचारसभायाः प्राथमिककार्यारम्भो जातः। श्रीमज्जगद्गुरुपूज्यपादसङ्केश्वरकरवीरपीठाधीश्वर श्री १०८ शङ्कराचार्यचरणा, यदुगिरियतिराजमठाधिपतिश्री १०८ सम्पत्कुमारमुनिचरणाः, श्रीनाथद्वाराधिपतयः गोस्वामिकुलतिलक श्री १०८ दामोदरलालमहाराजाश्च प्रातर्नवघटिकासमये गण्यमान्यैर्ब्राह्मणमहासम्मेलनसदस्यैरितरैश्च नागरिकैः सह सनातनधर्मजयोद्घोषपुरस्सरं सनतिततिं सादरं प्रतिगृहीताः सभामण्डपं प्रवेशिताश्च काशीस्थजूनानिरञ्जनीनिर्वाणीप्रभृतिमठान्तर्गता बहवः संन्यासिनश्च सभायामासनपरिग्रहमकार्षुः। श्रीयुक्तराजोपाधिविभूषितः मोतीचन्दमहोदयः भूम्यधिकारिश्रीयुक्तकवीन्द्रनारायणमहोदयः काशीस्थास्तथा प्रधानधनिनो ब्राह्मणा इतरे च सभायां समवेता अभूवन्। भारतवर्षस्य विभिन्नप्रान्तीयाः समाजमूर्धन्या दिगन्तविश्रान्तयशसः सार्धत्रिसहस्रसंख्या ब्राह्मणपण्डिताश्च सभायामागता आसन्। प्रथमं मङ्गलाचरणानन्तरं धर्माचार्याणामभिनन्दनं संवृत्तम्। ततश्च जगद्गुरुश्री १०८ शङ्कराचार्यपादाः स्वीयमुद्रितभाषणमपठन्। अनन्तरं श्री १०८ रामानुजमुनिवराः

सम्पत्कुमारपूज्यपादाः स्वीयाभिभाषणेन सभाशोभां महतीं सम्पादयामासुः। म० म० पं० पञ्चाननतर्करत्नमहोदया अपि सम्भाषणेन सर्वानानन्दयामासुः। सर्वेषामेवैतेषां वाग्धोरणी श्रोतृजनचित्ताल्हादकारिणी सुबोधा सारगर्भिता चासीदिति नातिशयोक्तिः। अनन्तरं विचारसभामन्त्रिणः म० म० श्रीयुक्तानन्तकृष्णशास्त्रिणः समुद्घोषयन् यदागामिदिवसमारभ्य दिनसप्तकं यावत् विचारसभा भविता। तत्र वादिनः प्रतिवादिनश्च विचारसभानिर्दिष्टनियमावलीमङ्गीकृत्य वादं कर्तुं चेदभिलषन्ति तर्हि विचारं कुर्वन्तु, जल्पवितण्डयोर्नात्रावसरः, तत्त्वनिर्णयार्थमेवेयं सभा समाहूतेति रागद्वेषपरिवर्जनपूर्वकं सर्वैरत्र प्रवर्तितव्यमिति प्रार्थ्यते। यतः शास्त्रार्थनिर्णय एव हि चिकीर्षितः, तस्य यथा सिद्धिः स्यात् तथा सर्वैः समवधानं कार्यमित्यस्माकं निवेदनम्। विचार्यविषये प्रश्नाः पूर्वमेव श्रीमतां समीपे प्रेषिताः, बहुभिरत्रोपस्थितैरनुपस्थितैश्च विशिष्टैर्विद्वद्भिर्देशान्तरीयैरुत्तराण्यपि प्रेषितानि तेषामुत्तराणामतिविस्तृतत्वात्संक्षेपेण तदीयसारसंग्रहणपूर्वकं मुद्रणं विधाय तानि पुस्तकानि विचारात्पूर्वमेव श्रीमतां समीपे प्रेषयिष्यन्ते। तेषां सर्वेषां समालोचनां विधायानन्तरं विचारसभायां स्वसम्मतिः सर्वैर्विज्ञापनीया। इत्याद्युक्त्वा मुद्रितां नियमावलीं सर्वेभ्यः प्रतिनिधिभ्यः प्रदत्तवन्तः। ततश्च तद्दिवसीयकार्यसमाप्त्यनन्तरं सर्वेभ्यो धर्माचार्येभ्यः पण्डितेभ्यश्च धन्यवादप्रदानपूर्वकमेकवादनसमये सभासमाप्तिरभूत्।

विचारसभाया द्वितीयदिनवृत्तान्तः।

सौरकार्तिकस्य त्रयोदशदिवसे मङ्गलवासरे मध्याह्न एकघटिकासमये विचारसभायाः कार्यारम्भः सञ्जातः। पूज्यपादाः सर्वे धर्माचार्याः पण्डिताश्च यथासमयमागत्य स्वस्वासनान्यलमकुर्वन्। अस्मिन् दिवसे पूर्वदिनापेक्षयापि ब्राह्मणपण्डिता दर्शकाश्चाधिकसंख्यया सम्मिलिता अभूवन्। सभामण्डपे कुत्रापि स्थानं रिक्तं नासीत्। धर्माचार्याणामनुमतिप्राप्त्यनन्तरं विचारसभासम्पादकाः म० म० श्रीयुक्ता-

नन्तकृष्णशास्त्रिणः सर्वानाचार्यान्-पण्डितमण्डलीञ्चाभिवाद्य संक्षेपेण विचार्यविषयान्विचारप्रणालीं विचारोद्देश्यं च व्यवीवृतन्। नाना-प्रदेशीयपण्डितगणप्रेषितप्रश्नोत्तराणां संक्षिप्तसारसङ्कलनपूर्वकं यैव पुस्तिका पूर्वं सम्मुद्रिताऽऽभूत् तस्या भूमिकामात्रं पठित्वोपस्थितानां सभ्यानां पण्डितानां च सविधे प्रत्येकमेकैकां वितीर्य संक्षेपेण तात्पर्य-वर्णनपूर्वकमकथयन् इदं ब्राह्मणमहासम्मेलनं धर्मस्थितये समाजस्थितये सनातनधर्मानुयायिनां संघटनाय च समनुष्ठितमिति नाविदितमिदं श्रीमतामतः सर्वेषां भवतां पूजनीयानामस्मिन्सम्मेलने निर्दिष्टविचार-करणार्थमनुग्रहदृष्टिः प्रार्थ्यते—अस्माकं मध्ये उपासकसम्प्रदायभेदेन सत्यपि मतभेदे सर्वाण्येव मतजातानि शास्त्रानुमोदितानि शिष्टैर्यथा-वत्परिगृहीतानीति तदत्रलम्भ्य विप्रतिपत्तीनां विचाराणां च बहूनां सत्त्वेपि श्रुतिस्मृतिपुराणादिमतविरोधिविप्रतिपत्तीनां निराकरणाय नासीत्कदाचिदपि मतभेदः। यदा यदा सनातनधर्मविप्लवाय विरो-धिनां प्रवृत्तयः प्राबल्येन समजायन्त तदैव सनातनधर्मावलम्बिनः सम्भूय सत्यपि परस्परं मतभेदे वयं पञ्चोत्तरं शतमितिन्यायेन परस्पर-साहाय्यसम्पादनपूर्वकं विरोधिनां मतानि निरस्य सनातनधर्ममूलभूत-वेदस्मृतीतिहासादिग्रन्थान् समरक्षन्निति सर्वेषामेव श्रीमतां विदितम्। अद्यात्र महासम्मेलनविचारसभायां विभिन्नमतानुवर्तिनाम् पण्डितानां सत्वेऽपि तथैव श्रीमतां सर्वेषां पारस्परिकविरोधभावत्यागपूर्वकं केवलं तत्त्वनिर्णयायैव निरपेक्षतया जयपराजयपरीक्षामनुद्दिश्य वादकथायै प्रवृत्तिर्भवत्विति प्रार्थ्यते। अतः परं विचार्यविषयाणां यानि प्रश्नोत्तर-पत्राण्यासादितानि मुद्रितानि तेषामेकैकशः प्रश्नस्योत्तरे सञ्जातान् मतवा-दान् सङ्क्षिप्यावर्णयन्। प्रथमप्रश्नचतुष्टयं विवाहविषयं परस्परानु-बन्धि चेति प्रथमचतुष्टयस्योत्तराण्येकत्र सङ्गृहीतानि। यान्यत्रोत्तराण्य-धिगतानि तत्र त्रयो मतवादा विद्यन्ते। कन्याया उद्वाहस्य कालोऽष्टम-वर्षात्प्राक्नियन्त्रणीय इति केचित्, दशमवर्षादर्वागित्यपरे। अन्ये च

द्वादशवर्षात्पूर्वमिति। कन्याविवाहाङ्गकालविषये केचिद्द्वादशवर्षावधि केचिदृतुदर्शनात्पूर्वं षोडशवर्षपर्यन्तं कन्याविवाहकालः शास्त्रसम्मत इत्यवर्णयन्। एके च विंशतिवर्षवर्यन्तं तदूर्ध्वं वा कन्याया विवाहकालः सत्यपि रजोदर्शने वरालाभेऽशीतिवर्षदेशोयाऽपि कन्या विवाह्या। परन्तु सर्व एवैतत् स्वीकुर्वन्ति यत्कन्याया रजोदर्शने पापभागिनस्तत्पित्रादयः पापक्षयार्थं प्रायाश्चित्तार्हाः। विशेषतस्तु प्रथमपक्षीया एवमकथयन् रजोदर्शनात् परं प्रायश्चित्ते कृतेऽपि कन्या नैव विवाह्या कृते च विवाहे नैव व्यवहार्यता। अपरे तु कृते प्रायश्चित्ते व्यवहार्यतेति। पुरुषाणान्तु विवाहपूर्वकालः षोडशवर्षादष्टादशवर्षात् एकविंशतिवर्षाच्चेति मतत्रयं शेषकाले तु प्रायः सर्वेषां पञ्चाशद्वर्षपर्यन्त इति। प्रश्नोत्तराणामिमानेव मतभेदानवलम्ब्य विचारो जातः दिवसेस्मिन् विभिन्नप्रान्तीयाः सप्त विश्रुतकीर्तयो निम्नलिखिताः प्रख्यातपण्डिता मध्यस्था निर्वाचिता अभवन्।

१ वंगदेशीयाः म० म० पं० श्रीयुक्तचण्डीदासन्यायतर्कतीर्थाः।
२ मैसूरराजप्रेरिता ,, ,, विरूपाक्षशास्त्रिणः।
३ मिथिलादेशीयाः ,, ,, शशिनाथझा महोदयाः।
४ मैसूरराजप्रतिनिधयः ,, श्रीनिवासाचार्य एम०ए० महोदयाः।
५ काशीस्थाः ,, श्रीरामभवनोपाध्यायाः।
६ सह्याद्रिदेशीयाः ,, श्रीरामानुजाचार्यप्रतिनिधयः।
७ राजपुतानाप्रान्तीयाः ,, श्रीनन्दकिशोरभट्टाः।

श्रीयुक्त पं० श्रीराजेश्वरशास्त्रिणः, श्रीहाराणचन्द्रशास्त्रिणः, म० म० पं० तातसुब्बारायशास्त्रिणः, म० म० पं० दुर्गाचरण सांख्यवेदान्ततीर्थाश्च वादिनः प्रतिवादिनश्चाभवन्।

अष्टमवर्षादृतुदर्शनपर्यन्तं कन्याविवाहकाल इति प्रायः सर्वेषां सम्मतमभूत्। अष्टमवर्षात्पूर्वमपि विवाहः प्रचलति सोऽपि नाऽशास्त्रीयः, परन्तु शास्त्रोक्तगुणवद्वरलाभ एव प्रशस्तकालात्पूर्वं विवाहो योग्यः

सम्प्रति न तथाऽनुसन्धीयते इति अष्टमवर्षात् प्राक् कन्याविवाहो यदि केनचित्समाजेन निवार्येत दूषणानुगुण्यपर्यालोचनया, तर्हि तत्र नास्माकं विरोध इति, अस्मिन् विषये मतभेदो नासीत्। परन्तु श्रीयुक्त-विन्ध्येश्वरीप्रसादशास्त्रिणोऽकथयन् यद्दशमवर्षात् प्राक् कन्याविवाहो नोचित इति तन्निषेध एव श्रेयान्। केचिदकथयन् यन्महासम्मेलनेनेदं निर्णीयतां यदष्टमवर्षादर्वाक्विवाहो यथा न प्रचलति। केचिच्च महा-सम्मेलनस्य नात्राधिकार इति प्राहुः। विचारोऽयमत्रैव परिसमाप्तः विचारार्थं मध्यस्थसमीपे लिपिबद्धस्वस्वमतवादा अर्पिताः पुरुषाणा-मपि विवाहस्य पूर्वः कालः षोडशावधिकः, अष्टादशावधिकः, एकविंशति-वर्षावधिकश्चेति। शेषकालः अष्टचत्वारिंशद्वर्षान्तः पञ्चाशद्वर्षपर्यन्त-श्चेति मतभेदाः विचारार्थं तथैव मध्यस्थसमीपे समर्पिताः।

अतः परमृतुमतीकन्याविवाहाविषये विचारारम्भो जातः। विचारोऽयं दिनद्वयपर्यन्तमासीत्। वंगदेशोयपण्डितास्तु वर्णयन्तिस्म यदि पित्रादी-नामौदासीन्येन कन्यर्तुमती भवति तदा ते प्रायश्चित्तार्हाः, कन्याया अपि शास्त्रविहितदोषशान्तिः कर्तव्या, परन्त्वेतादृशस्थले कन्या नाविवाह्या नापि अव्यवहार्या, शास्त्रे रजस्वलायाः कन्याया वृषलीत्वकीर्तनं नैता-दृशस्थलपरं, परन्तु यत्र पित्रादीनां दोषाभावः कन्या स्वेच्छया विवाह-पराङ्मुखी भवति ततश्च रजस्वला जायते तत्रैव शास्त्रीयवृषलीत्व-कीर्तनम्, एवं अकृतप्रायश्चित्तां कन्यां यदि कश्चिद्विवहति तदा स वृषली-पतिर्भवति अव्यवहार्यश्च जायते।

श्रीराजेश्वरशास्त्रिप्रभृतिदाक्षिणात्यादिदेशीयास्तु वर्णयन्तिस्म यदि पित्रादिदोषेण कन्यर्तुमतीभवेत् तदा प्रायश्चित्तान्ते सा विवाह्या व्यव-हार्या च भवितुमर्हति। परन्तु यदा स्वेच्छयाऽकृतविवाहैव रजस्वला भवति तदा कृतप्रायश्चित्तापि अविवाह्याऽव्यवहार्या च सा परित्याज्येति शास्त्रसम्मतम्। इदन्तु ब्राह्मणविषयमिति केचित्, केचिच्च सर्व-वर्णसाधारणमित्यकथयन्।

तृतीयदिनवृत्तान्तः ।

सौरकार्तिकस्य चतुर्दशदिवसे बुधवासरे मध्याह्नसमये विचारसभायाः पूर्ववदारम्भो जातः। अद्य म० म० पं० श्रीपञ्चानन तर्करत्न महोदयाः सभाया नियामका आसन्, ऋतुमतीकन्याविवाहविषये मध्यस्था वादिनः प्रतिवादिनश्च पूर्वदिवसीया एव। शास्त्रप्रमाणानि प्रदर्शितानि व्याख्यातानि च। परन्त्वेष सर्वसम्मतो निर्णयो न जातः, यत्पित्रादिदोषेण कन्याया रजोदर्शने प्रायश्चित्तान्ते कन्या विवाह्या व्यवहार्या च भवितुमर्हति। यदा स्वेच्छया विवाहपराङ्मुखी कन्या रजस्वला जायते तदा प्रायश्चित्तान्ते व्यवहार्या विवाह्या चेति वंगदेशीय-श्रीयुक्त शशिभूषणस्मृतितीर्थ प्रियनाथसांख्यतीर्थानां मतम्। श्रीयुक्त राजेश्वर शास्त्रिणां नैव विवाह्या व्यवहार्या चेति मतमासीत्। तत्सर्वं विचारार्थं मध्यस्थानां सविधे समर्प्य अतः परं ब्राह्मणादिवर्णानां मध्ये येऽवान्तरभेदाः सन्ति तेषां परस्परं विवाहसम्बन्धो भवितुमर्हति नवेति विषयमधिकृत्य विचारः प्रारब्धः, श्रीयुक्त दामोदर शास्त्री उत्कलदेशीयः तथा श्रीयुक्तकाशीनाथ कर्मकाण्डी चाकथयताम्, कलावसवर्णाविवाहो निषिद्धः, परन्त्ववान्तरश्रेणीमध्ये परस्परं विवाहो भवितुमर्हति। सूर्योदयसम्पादक,श्रीविन्ध्येश्वरीप्रसादशास्त्री-महाराष्ट्रीया-कोलाब्राह्मणपरिषत्प्रतिनिधिः श्रीयुक्त लक्ष्मणशास्त्री तर्कतीर्थश्चोक्तमतं समर्थयतः स्म, ततो मद्रदेशीय श्रीयुक्त सुन्दरेश्वर शास्त्री, श्रीयुक्त राजेश्वरशास्त्री चाकथयताम्—यश्च श्रेणीविभागो बहुपुरुषपरम्परातः प्रचरति तत्तच्छ्रेणीमध्य एव विवाहादिकार्यं प्रचलति, तदन्यथाकृत्य श्रेणीभेदो न कर्तव्यः एतदनुकूलानि वचनान्यप्यदर्शयन्। श्रीयुक्त हाराणचन्द्रशास्त्रीतु प्राह यन्नैतद्वचनं श्रेणीभेदविषयकमिति। वङ्गीयास्तु बहवः परिडता अवान्तरश्रेणीमध्ये विवाहस्य विरोधिमतमुदघोषयन्।

चतुर्थदिवसीयं वृत्तम् ।

अस्मिन्नपि दिवसे मध्यान्ह एव विचारसभारम्भो जातः। अस्मिन्नपि

दिवसे एतादृशी लोकसंख्यावृद्धिरासीत् येन सभामण्डपायतनवृद्धिरपि कर्तव्याऽभूत् अस्मिन्विचारे निम्नलिखिता नवीना मध्यस्था निर्वाचिता आसन्—

१ आन्ध्रदेशीयाः म० म० पं० तातसुब्रायशास्त्रिणः ।

२ महाराष्ट्रदेशीयाः ,, सीतारामशास्त्रिणः शेण्डे इत्युपाह्वाः

३ कामरूपदेशीयाः ,, श्रीनारायणचन्द्रमिश्राः ।

४ वाम्बेप्रदेशीयाः श्रीबलभद्रभट्टकविकाव्यरत्नाकरमहोदयाः

५ बङ्गीयाः म० म० ,, चण्डीदास न्यायतर्कतीर्थाः ।

६ ,, ,, कालीकिशोर स्मृतिरत्न महाशयाः ।

७ मद्रासदेशीयाः म० म० ,, विरूपाक्षशास्त्रिणः ।

अस्मिन्नपि दिवसे म० म० पं० श्रीयुक्त पञ्चाननतर्करत्नमहाशया एव सभानियामका आसन् ।

प्रथमं पूर्वदिवसीयाऽसमाप्तविचारस्यालोचनायां प्रवृत्तायां मिस्मिलरशुद्धिकर्तुः कुर्तकोटिशङ्कराचार्यस्य प्रतिनिधिपण्डितानामन्यतमः कश्चिदकथयत् यन्नियमावलीपरिवर्तनमावश्यकं नोचेत्सभाया अस्या वयं न सहयोगं करिष्यामः । विषयेऽस्मिन्नालोचनायां स्थिरीकृतं महासम्मेलनकर्तृपक्षीयैर्यत्प्रथमदिनमारभ्य दिनत्रयपर्यन्तं कैरपि नियमावलीपरिवर्तनविषये किमपि नोक्तं विभिन्नप्रान्तीयसमागतसार्द्धत्रिसहस्रपण्डितानां यस्मिन्नापत्तिर्न विद्यते तत्र कस्यचिद्वैयक्तिकमतसमर्थनाय न युक्तं नियमपरिवर्तनम् । केनचिद्दर्शकेन दण्डायमानेन कथितं कुर्तकोटिशंकराचार्यप्रतिनिधिभिरवगतं यदत्र विचारे नास्ति जयाशा सुतरां किमपि छलमुद्भाव्य स्वसम्मानरक्षार्थं प्रयत्यते । तस्मादकिञ्चित्करमिदम् ।

धर्मपरिवर्त्तनम् ।

अतः परं षष्ठप्रश्नस्य विचारः समारब्धः । कीदृशा धर्मज्ञा धर्मस्य कीदृशं परिवर्तनं कर्तुमर्हन्ति, धर्मस्य सङ्कोचनाख्यं उत नूतनधर्मप्रवर्तनाख्यम् । विषयेऽस्मिन्विचारिते प्रायशो मतभेदा नासन् प्रायः सर्वएवाकथयन्

यद्वेदादिशास्त्ररहस्यज्ञा विहितकर्मानुष्ठानद्वारा निर्मलचरित्रा रागद्वेषरहिता धर्मज्ञाः कालानुरूपं मानवसामर्थ्यं विचार्य धर्मं नियन्तुं शक्नुवन्ति। वेदप्रमाणकं धर्मं कोपि परिवर्तयितुं नार्हति। ततः परं भागवतधर्मदीक्षाद्वारा जातिः परिवर्तिता भवति नवेति प्रश्नस्य विचार आरब्धः। अस्मिन्नपि नासीन्मतभेदः सर्व एवाकथयन् पूर्वजन्मकृतकर्मफलेन जातिर्लभ्यते, सा च नैहिककर्मणा परावर्तयितुं शक्यते। परे तु ऐहिकशुभाशुभकर्मद्वारा उत्कर्षापकर्षौ भवतः। नीचजातीयानामपि द्विजातिश्रेष्ठत्वं शास्त्रे यदुक्तं तस्यायमेवाभिप्रायो यत्ताद्दशा'नीचा अपि भगवद्भक्ता अमुष्मिन् काले भगवदनुग्रहेण ब्राह्मणोचितशुभगतिं लभन्त इति, भगवद्भक्तिविमुखानां यद्धीनजातीयत्वकीर्तनं तस्याभिप्रायस्तु स्वजात्युक्तकर्माकरणेनाशुभकर्मकरणेन च परत्र हीनजात्युचितां गतिं लभन्त इति।

अतः परं शूद्राणां प्रणवोच्चारणे प्रणवयुक्तमन्त्रग्रहणे चाधिकारो विद्यते नवेति प्रश्नमवलम्ब्य दीर्घकालं विचारो जातः तत्राधिकसंख्याकाः पण्डिताः प्रणवोच्चारणप्रणवयुक्तमन्त्रग्रहणाधिकारविरोधिन आसन् कतिपये च श्रीविन्ध्येश्वरीप्रसादप्रमुखा वैष्णवाश्च केचन तत्पक्षसमर्थका आसन्। सर्वेषां मतं श्रीयुक्तराजेश्वरशास्त्रिश्रीहाराणचन्द्रशास्त्रिभ्यां खण्डितम्। विचारस्त्वत्रैव समाप्तः। उभयपक्षीयवादा लिपिबद्धा मध्यस्थनिकटे समर्पिताः।

पञ्चमदिवसीयवृत्तान्तः।

सौरकार्तिकस्य षोडशदिवसे सोमवासरे विचारसभायाः पञ्चमाधिवेशने मध्यान्ह एवारब्धे दर्शकसङ्ख्याऽतिशयेन प्रवृद्धाऽऽसीत्। तत्रैतदेव च द्रष्टव्यं यद्ब्राह्मणपण्डितानां 'संख्यावृद्ध्यपेक्षया दर्शकानां संख्यावृद्धिरधिकाऽऽसीत्। शास्त्रविचारमहिमैतावान् यदनधिगतशास्त्रार्थानपि प्रतिदिनमाचकर्ष। तेऽपि निर्वाचः यामाधिककालं तत्रोपविष्टा निश्चलाः श्रद्धावन्तः साग्रहमशृण्वन्। पुराणादिश्रवण इव जातादरा

धमबुद्ध्या सुशिक्षिताः ससभ्याः कतिकति मानवाः प्रतिदिनं सम्मेलन-कर्तृपक्षाणां सविधे प्रवेशपत्रार्थमगमन्। परं स्थानाभावेन सर्वेषां मनोरथं पूरयितुमसमर्था एव तेऽभवन्। दिवसेऽस्मिन् किञ्चिन्न्यून-पञ्चसहस्रसंख्याकाः प्रतिनिधयो दर्शकाश्चासन्। अद्य रामप्रसन्नाचार्यः प्रमाणयितुमचेष्टत : यत्षडक्षरशिवमन्त्रेऽष्टाक्षरविष्णुमन्त्रे चान्त्यजाना-मप्यधिकार इति। श्रीयुक्तराजेश्वरशास्त्री प्रमाणमुपन्यस्य प्रत्यपादयत् यद्भाषाख्यलौकिकमन्त्रे भगवन्नामस्मरणकीर्तनयोश्चान्त्यजानामधिकारः, प्रणवादियुक्तमन्त्रे कस्मिन्नपि नास्त्यधिकार इति। अत्रैव लिपिबद्धो-विचारो मध्यस्थसमीपे समर्पितः। अतः परं नवीना निम्नलिखिता मध्यस्था निर्वाचिता अभवन्।

१ म० म० पं० श्रीहाथीभाईशास्त्री।
२ ,, ,, दुर्गाचरण साङ्ख्यवेदान्ततीर्थः।
३ ,, ,, फणिभूषण तर्कवागीशः।
४ तर्कविद्वान् पं० नागेश शास्त्री।
५ पं० रमानाथभट्टो देवर्षिः।
६ ,, पूर्णचन्द्राचार्यः।
७ ,, मार्कण्डेयमिश्रः।

नियामका भारतधर्ममहामण्डलप्रधानभूता दयानन्दस्वामिन आसन्।

शुद्धिविचारः।

वर्तमानार्याभिधेयानार्यप्रवर्तिताशास्त्रीयक्रियाविशेषरूपा शुद्धिर्न शास्त्रीया नापि समाजानुकूला प्रत्युत वर्णाश्रमाचारविध्वंसिनी इति। युक्तितर्कशास्त्रै राजेश्वरशास्त्रिविन्ध्येश्वरीप्रसादशास्त्रिसूर्यनारायण-स्मृतिरत्नैः प्रतिपादिता। जन्मगतम्लेच्छत्वनिबन्धनास्पृश्यताप्राय-श्चित्तैर्नापनुद्यते न वा ब्राह्मणादिजातिर्लभ्यत इत्यत्र शास्त्रीयप्रमाण-मपि तेषां न विद्यते। सर्वेषां जन्मना जातिर्न काचित् कर्मकोटिभिः

इति सूतसंहिताप्रमाणं कलिकाताविश्वविश्वविद्यालयाध्यापकमहामहोपाध्याय पण्डित श्रीसीतारामशास्त्रिभिः प्रदर्शितम्। ततश्च देवलस्मृति प्रामाण्यविषये विचारो जातः।

षष्ठदिवसीयो वृत्तान्तः।

सौरकार्तिकस्य सप्तदशदिवसे शनिवासरे मध्यान्हसमये विचार आरब्धः। अद्य नियामकाः प्रथमं म० म० पं० पंचाननतर्करत्नाः, ततः दयानन्दस्वामिनः। मध्यस्था अपि प्रथमं पूर्वदिवसीया अनन्तरं निम्नलिखिता निर्वाचिताः।

१ श्रीयुक्त पं० श्रीशङ्करतर्करत्न भट्टाचार्याः।
२ „ रामकृष्ण सोमयाजिनः।
३ म० म० पं० कमलकृष्ण स्मृतितीर्थः।
४ पं० रघुरंगाचार्याः।
५ पं० आशुतोष स्मृतिरत्नभट्टाचार्याः।
६ पं० मुक्तिनाथमिश्राः।
७ पं० बालकृष्णशास्त्रिणः।

अद्य किलविचारणीयो नाम विषयः "पतितपरावर्त्तनम्" अर्थात् कीदृश्यामवस्थायां कृतप्रायश्चित्ताः पतिता वर्णाश्रमि-समाजे समर्हन्ति प्रवेष्टुम्? कस्यां वाऽवस्थायां कृतप्रायश्चित्ता अपि ते नेति? उत ते स्वतन्त्रसम्प्रदायान्तर्गता एवेति?

अस्मिन्नवसरे श्रीमल्लक्ष्मणशास्त्रितर्कतीर्थमहोदयैरेवंनाम प्रतिपाद्यते यत् "शास्त्रे हि यदुपलभ्यते पृथक्—पतितानां तदकृतप्रायश्चित्त-पतितपरम्, कृतप्रायश्चित्तानान्तु स्वस्वीयसमाजे निराबाधमस्त्येव प्रवेशनमिति"—ततश्चैतदवलम्ब्य म० म० श्रीमदनन्तकृष्णशास्त्रिभिः सह जातायां कियत्कालं विमतौ तमेव तर्कतीर्थं प्रति प्रश्न एवमुदपादि "यदि पतितोत्पन्नाः चतुर्भ्यो वत्सरेभ्योऽधिककालं पिजादेः पक्वान्न-

मश्नन्ति तर्हि ते प्रायश्चित्तान्ते व्यवहरणीया नवेति ?" तदोत्तरयतिस्म तर्कतीर्थमहाभागः—"मन्मते पातित्यमस्त्येव, परन्तु ते प्रायश्चित्तान्ते व्यवहार्य्या एवेति, यद्यपि चात्र निबन्धकाराणां सम्मतिर्नोपलभ्यते तथापीदं मदीयमेव मतमिति ।

अत्रावसरे श्रीमद्राजेश्वरशास्त्रिभिरभाणि—"प्रायश्चित्तान्तेऽपि पतितोत्पन्नास्तनया अव्यवहार्य्या एव, परन्तु पतितोत्पन्ना कन्या कृतप्रायश्चित्ता व्यवहार्य्यतामालभेत ।

अथ सुरेशचन्द्रविद्यानिधिभिरेवमभिहितं "पतितोत्पन्नपुत्र-कन्यादिव्यवहारविषये न नाम शास्त्रीयो विधिविशेषः समुपलभ्यते, प्रायश्चित्तविवेके तु म० म० शूलपाणिनोक्तं—"पतितोत्पन्नत्वमपि संसर्ग-विशेषः" सुतरां पतितोत्पन्नाः पुत्राः कन्याश्च स्वयमकृतपापजनक-कर्म्माणः कृतप्रायश्चिता व्यवहार्य्यतां नूनमापद्यरेन् ।

श्रीयुतश्रीजीवन्यायतीर्थैरुक्तं "त्रिपुरुषं पितृतो मातृतश्चाशुद्धाः" इत्यादिवचने त्रिपुरुषपदसन्दर्शनात् त्रिपुरुषमध्ये पतितोत्पन्नाः प्रायश्चित्तान्ते व्यवहारयोग्या इतरथा त्वव्यवहार्य्या एव ।

ततश्चैवमेव प्रकटिते बहुमते, सकलदेशीयसुधीसमाजीयं पृथक् पृथङ्मतमगत्या परिगृहीतम् । तत्र च बंगीयानां कृतप्रायश्चित्त-पतितो-त्पन्नव्यवहार्य्यताविषये ऐकमत्यम्, गौड़ीयानां सारस्वतानाञ्च अव्यवहार्य्यताविषये । महाराष्ट्रीयानाञ्च केषाञ्चन व्यवहार्य्यतायां केषाञ्चनाव्यवहार्य्यतायामिति मतानैक्यम् ।

ततो म्लेच्छानामन्त्यजानाञ्च स्पर्शविषये, सभाप्रवेशविषये, कूपोदक-ग्रहणविषये, देवालयप्रवेशविषये, जात्यन्तरापेक्षया तारतम्यसंरक्षण-विषये च समजनि विचारव्यवहारः ।

तारतम्य-संरक्षणं शास्त्रसम्मतमेवेत्यत्रैकमत्यं सर्व्वेषामेव सभासदां, परन्तु श्रीमद् राजेश्वरशास्त्रि-गोपालशास्त्रिमहोदयाभ्यां 'गुणतारतम्ये चाण्डालापेक्षया म्लेच्छानां हीनत्वमस्त्येव निःसन्देहं,

किन्तु विषयविशेषे यवनादीनां चाण्डालादुत्कर्षोऽपि वर्त्तते—यथा-चाण्डालानां ग्रामबाह्यता, म्लेच्छानान्तु न तथा, देवालयप्रवेशेऽपि चाण्डालापेक्षया म्लेच्छानां सन्निकृष्टस्थानगमनाधिकारः, इत्यादि-विषये युक्तिः प्रमाणञ्च प्रादर्शि ।

अत्र च श्रीमत्पूर्णचन्द्राचार्य्य—रामशास्त्रि—लक्ष्मणतर्कतीर्थ-मार्कण्डेयमिश्रप्रभृतयो बहव एव पण्डिताः प्रतिवादमकार्षुः । अवकाशे चास्मिन् म० म० श्रीयुत दुर्गाचरणसांख्यवेदान्ततीर्थमहोदयै-रवाचि—"विद्यन्ते किल बंगदेशे ये नाम चाण्डालाः,सर्व एव ते देवद्विज-भक्तिपरायणा दयादाक्षिण्यादिगुणशालिनो लोकतः शास्त्रतश्च म्लेच्छा-दितो गुणैरुत्कृष्टाः ग्रामनिवासिन एव, न तु ग्रामबाह्याः, बहुकालं प्रचलिते ह्यस्मिन् विचारे नियामकनियमानुसारेण वादप्रतिवादीय प्रमाणयुक्त्यादिकं—लिपिबद्धमर्पितमन्तिके मध्यस्थानाम् ।

ततश्च सभासमयातिवाहादद्यतनं कृत्यमत्रैव परिसमाप्तमिति ॥०॥

"सप्तमो दिवसः" ।

सौरकार्त्तिकस्याष्टादश दिवसे सूर्य्यवासरे दिवैक घटिकायां पूर्व-पूर्वदिवसानुरूपं सभाकर्म्म समारब्धम् । अद्य किल श्रीयुतरमानाथभट्ट-महोदया नियामकपदमध्यतिष्ठन् । पूर्वदिवसीयावशिष्टांशविचारः प्रथमतः सञ्जातः—तत्र च कूपोदकादिग्रहणे अन्त्यजानामधिकारविषयो ह्यवलम्बितः । म० म० श्रीयुतदुर्गाचरणसांख्यवेदान्ततीर्थमहोदयैः—"चाण्डालादिभिश्चतुर्हस्तन्न्यूनपरिसरकूपजलस्पर्शे दोषोऽस्ति, तदधिक-परिसरस्य 'कूपस्योदकस्पर्शे च नास्त्येव दोषः कोऽपीति तत्साधकं—

समन्ताच्चतुर्हस्तस्तु जलाशयो भवेद् यदि । अन्त्यजैरपि संस्पृष्टः पूतो भवति निश्चित इति वृद्धयाज्ञवल्कीयप्रमाणमपि प्रादर्शि ।

किन्त्वत्र श्रीबलभद्रभट्ट—राजेश्वरशास्त्रिप्रभृतिभिः ' प्रत्यवादि । "चाण्डालभाण्डसंस्पृष्टं पीत्वा कूपगतं जलं" मित्यादिवचनेन याज्ञवल्क्या-वचनस्य विरोधपरिहारार्थं एवं वक्तव्यं यत्—तद्वचनं चाण्डालेतरपर-

त। परन्तु म० म० श्रीयुत दुर्गाचरणसांख्यवेदान्ततीर्थ प्रियनाथ-सांख्यतीर्थ-कृष्णचन्द्रस्मृतितीर्थ-प्रभृतिभिरेवमुक्तं—"न भवता-मेवंरीत्या विरोधपरिहारः समीचीनतया प्रतिभाति,—यतो येषां स्पृष्ट-जलमपेयं तैः स्पृष्टं जलाशयीयजलं कथं नाम पेयं स्यात्? सुतरां वृद्धयाज्ञवल्क्यीयंवचनं चाण्डालेतरपरमिति तु न रमणीयम्। "चाण्डालभाण्डसंस्पृष्टं पीत्वा कूपगतं जल"मित्यादिवचनं चतुर्हस्तन्न्यूनपरिसरकूपोदकपरिग्रहविषयकमेवेति भवति सर्वं सुसमञ्जसमिति।

किन्त्वेवमपि मतानैक्यादुभयपक्षस्य, तदुभयपक्षीयमतं लिपिबद्धं मध्यस्थसकाशे समर्पितम्।

ततोग्रामप्रवेशविषये, देवालयप्रवेशविषये च म्लेच्छादितार-तम्यसंरक्षणं कर्त्तव्यं नवेत्यवलम्ब्य चर्चा जाता।

श्रीमद्राजेश्वरशास्त्रिप्रभृतयः—प्रमाणप्रदर्शनपुरःसरं समभिदध-तिस्म चैव—"म्लेच्छादयः--चाण्डालादिभ्यः सर्वथा हीना अपि ग्राम-देवालयप्रवेशविषये कथञ्चित्तेभ्यः सोत्कर्षाः। यद्यपि नैतद्युक्ति-समुपबृंहितं नाम तथापि वाचनिकविषये युक्ति र्नसावसरेति।

किन्त्वत्र वङ्गीयाः अन्यान्यप्रदेशीयाश्च पण्डिताः नैतन्मतमुररी-चक्रुः। तैरप्यत्र प्रतिवादावसरे प्रमाणानि युक्तयश्च बहुशः प्रदर्शिता-नीति उभयपक्षस्य मतानैक्यादेतदपि लिपिबद्धं मध्यस्थाना सविधे समर्पितम्।

ततोव्रात्यसंस्कारविषये विचारः समजनि। अत्र श्रीयुतकृष्ण-चन्द्रस्मृतितीर्थैरेवमभिहितं "त्रिपुरुषादूर्द्ध्वं सावित्रीपतने व्रात्य-संस्कारः, प्रायश्चित्तं वा न शास्त्रसिद्धम्। बडोदा-वासि-श्रीमदमृतलाल शास्त्रिभिर प्रत्यवादि। तेषामयमभिप्रायः—"आपस्तम्बसूत्रार्थ-पर्य्यालोचनय एवमवगम्यते यत् प्रपितामहादूर्द्ध्वं बहवोऽपि पुरुषा यद्यनुपनीताः ापि व्रात्यप्रायश्चित्तान्ते उपनयनयोग्या एव। अत्र

म०म०पं० श्रीयुतानन्तकृष्णशास्त्रिणां प्रश्नः-यद्येवमेवाप स्तम्बसूत्रतात्पर्य मवगम्यते तदा प्रपितामहादिपदसार्थक्यं किं नाम स्यात् ? किं पितामह-व्यावर्त्तकमेव वैतदिति ? इत्यवसरे :श्रीमन्नारायणविद्यारत्नैरुक्तं— पारस्करगृह्यसूत्रे स्पष्टं निषेधो दृश्यते 'न चतुर्थे' अर्थात् चतुर्थपुरुषे व्रात्यसंस्कारो नयुज्यते, ततः प्रतिवादी सन्तोषजनकोत्तरविरहा-दगत्या निवृत्तिमेव स्म समालम्बते ।

ततो विधवा--विवाहविषये समारब्धो विचारः विधवोद्वाहः सर्वथैवाशास्त्रीय एवेत्यत्र न कस्यचनापि वैमत्यं, किन्तु श्रीगिरिजा-भूषणगोस्वामिना केनचन विधवोद्वाहपौरोहित्यं विदधता प्रतिवादोऽस्य व्यधायि । किन्तु शास्त्रे संस्कृतभाषायाञ्च तस्य व्युत्पत्तेरभावात् कियत्-कथनानन्तरमेव सलज्जो विषादमलीमसवदनो निरस्त स्तूष्णीम्बभूव ।

निर्विवादमशास्त्रीयत्वसिद्धावपि विधवाविवाहे विधवोद्वाह-पक्षपातिनो ये नाम शास्त्रब्रुवा युक्त्यादिकं प्रमाणञ्च गृह्णन्ति तत्तदवलम्ब्य बहुक्षणं चर्चया भ्रमात्मकमेव विधवाविवाहसमर्थन-मिति सुदृढं सुस्पष्टञ्च स्थिरीकृतं सर्वैरेव पण्डितधौरेयैः ।

ततश्च धर्म्मपरिवर्त्तनविषये आलोचना समारब्धा, अत्रापि विषये न केषामपि विप्रतिपत्तिः, अर्थात् धर्म्मपरिवर्त्तने अलौकिकज्ञानसम्पन्ना एव कालोपयोगितया प्रभवन्ति, नत्वत्र लौकिकानामधिकारः, महर्षि-भिरेव वेदतत्त्वं पर्य्यालोचयद्भिर्ज्ञानदृष्ट्या विभाव्य च बहुकालं योगज-बलेन सूक्ष्मदर्शिभिः यद्यत् कालोपयोगितया समुपदिष्टं तत्परिवर्त्तने नाधुनिकाना मणुरप्यधिकारः ।

एवमेवं सुचारु सम्पन्ने सकलविचारकार्ये विचारसभायां समा-गतेभ्यो धर्म्माचार्य्येभ्यो ब्राह्मणपण्डितेभ्यः–सन्न्यासिभ्यश्च सज्जन-संघेभ्यः सर्वेभ्य एव, म० म० पं० श्रीमदनन्तकृष्णशास्त्रिपादैः प्रदाय धन्यवादान् परिसमापितमतियोग्यतया सभाकृत्यमिति शम् ॥

धन्यवादाः ।

विगते कार्तिकमासे यदखिलभारतवर्षीयब्राह्मणमहासम्मेलनं निर्विघ्नतया सम्पन्नं तत्र केवलं भगवत्कृपैव कारणमिति निश्चयेनेदानीं वक्तुं शक्यते। यदि नाम भगवतो विश्वेश्वरस्य कृपाकटाक्षो नाभविष्यत्कथमपि नेदं सम्मेलनमभविष्यत् इति श्रीमतो जगदीश्वरस्य चरणारविन्दयोरसंख्याः प्रणतयो निवेद्यन्ते। सनातनधर्मविरोधिनः प्रायः सर्व एव सुधारकपदवाच्या नास्तिका अस्य सम्मेलनस्य विध्वंसनाय यथाशक्ति समचेष्टन्तेति तु प्रसिद्धमेव। ब्राह्मणपण्डिता अस्मदीया अपि दुरोदरदरीपूर्तये विरोधिनां धर्मविरोधिनां सेवां कुर्वाणा अन्नदोषेण कर्तव्याकर्तव्यविवेकज्ञानशून्या विशेषेणास्य विघाताय प्रायतन्तेति महता दुःखेनावेद्यते। केचिच्चास्मदीयहितचिन्तका इति बहिः प्रकाशयन्तोपि कर्मणा विरुद्धतामेव समाचरन्, अस्य सम्मेलनस्य स्वागताध्यक्षस्य विविधविरुदावलीविभूषितस्य श्रीमतः काशीनरेशस्यास्मिन्सम्मेलने स्वागताध्यक्षपदपरित्यागार्थं महान्तमायासमङ्गीचक्रुः। केचित्तु कथमिदं सम्मेलनं निर्विघ्नंसम्पाद्यते तद्द्रक्ष्यते सभामण्डपएव भस्मसात्करिष्यते इत्यपि प्रतिज्ञां कृत्व तस्याः सम्पादनाय सर्वात्मनाऽपेक्षितां सामग्रीं सम्पादयामासुः। अन्ये च वृत्तपत्रसम्पादका विरुद्धपूर्वापरासम्बद्धमिथ्यावृत्तान्तप्रचारादिभिरस्य सम्मेलनस्योपघाताय प्रयत्नं निरवशेषमकुर्वन्निति सुप्रसिद्धमेवैतत् सत्यप्येवं प्रत्यूहसन्दोहे यदिदं सम्मेलनमेवंरीत्या निर्विघ्नं सम्पन्नं तत्र नान्यत्किमपि कारणं केवलं भगवतः कृपैव तत्र हेतुरित्यगत्या स्वीकर्तव्यम्। कथमितरथाऽद्य यावदेवंविधं पूर्वं कदाप्यभूतं ब्राह्मणमहासम्मेलनं संवृत्तं यत्र सार्धत्रिसहस्रसङ्ख्याकाः पण्डिता देशान्तरेभ्यः स्वव्ययेन महान्तं क्लेशं पथि श्रमं शरीरास्वास्थ्यमित्यादिबहुतरविघ्नबाहुल्ये सत्यपि समागत्य स्वगृहकार्यमिव किं बहुना स्वकीयकन्याया विवाहे यादृशः परिश्रमः स्वीक्रियते ततोऽप्यधिकतया परिश्रमं स्वीकृत्य कार्यं समपादयन्

कार्शास्या देशान्तरेभ्यः समागताश्च स्पष्टमेव कथयन्ति नाद्य यावदेवं-विधं सम्मेलनं दृष्टपूर्वम्। यदसम्भावितं तदप्यनायासेन सम्पन्नमिति कथं नेदमीश्वरस्य चिकीर्षितम्। किं केनापि स्वप्नेऽप्येवं सम्भावित-मासीद्यत्परस्परविरोधिनः सर्वे धर्माचार्या एकत्रोपविश्य शान्ततापूर्वकं वादिप्रतिवादिनां मतानि सम्यगुपश्रुत्य विचिन्त्य च सर्वाविरोधेनै-कमत्येन निर्णयं प्रदास्यन्तीति। अनेन हि सम्मेलनेनाधुनातनानां राज-कीयाणां सुधारकाणां च य आक्षेपा आसन् तेषां सर्वथा कार्यरूपेण निरसनं कृतमित्यत्र नास्ति सन्देहः। राजकीयैः पुरुषैर्हि सर्वदेदमेव निगद्यते भारते वर्षे हि प्रायः सर्वे धर्माचार्याः परस्परं विरोधिनः केचिच्छैवा अपरे वैष्णवा अन्ये च शाक्ता इति कृत्वा परस्परं कलहमेवानिष्टप्रद-मारचयन्तो दृश्यन्ते तदनुयायिनश्च तदपेक्षयापि महान्तं विरोधमुत्पाद्य परस्परं युद्धमेव कुर्वन्त उपलभ्यन्ते इति यत्र देशे धर्मं निमित्तीकृत्य महान्विवादो भवति कथं तस्मिन्देशे स्वराज्यवार्तापि क्षेमङ्करी स्यात्। तथैव सुधारका अपि राष्ट्रियसभाव्यपदेशेनेममेवार्थं पुरस्कृत्य धर्मबन्धनं सर्वथाऽनर्थायैव ब्राह्मणानां प्राधान्ये सर्वथाऽस्य देशस्य धर्मभेदनिब-न्धना महती दुरवस्था भवतीति धर्मचर्चा सर्वथा समुपेक्षणीयैवेति कथ-यन्तः जातिभेदं वर्णाश्रमधर्मव्यवस्थां च विलोपयितुमिच्छन्तो विधवाविवाहशुद्धिपतितपरावर्तनास्पृश्यतोच्छेदादिशास्त्रविरुद्धं कार्यमेव सम्प्रति भारतवर्षस्य समुन्नतिसाधनमित्यादि प्रजल्पन्तः ब्राह्मणाः सर्वथा शिलां गले बद्ध्वा सामुद्रेऽम्भसि निमज्जयितव्या इत्यादिकं वर्णयन्ति, अपरे च वदन्ति सर्वथा ब्राह्मणाः स्वार्थपरायणा एतैर्हि द्रव्यमन्तरा कि-मपि न क्रियते, द्रव्यप्रदाने च यत्किमपि कार्यमकार्यं वा तस्य विवेकमकृत्वा धर्मशास्त्रविरुद्धामपव्यवस्थां प्रदातुं किञ्चिदपि कुण्ठिता न भवन्ति। तत एभिर्देशोद्धारः कथं करिष्यते प्रतिवर्षं राष्ट्रियमहासभां कांग्रेसपदा-भिधेयां पश्यतामप्येतेषां मनसि नायं विवेकः समुदेति अहो एते पाश्चा-त्यशिक्षाशिक्षिताः स्वीयेनैव व्ययेन महान्तं श्रममङ्गीकृत्य प्रतिवर्षं सभायां

सम्मिलन्ति देशस्योन्नत्यर्थं नानाविधां चेष्टां कुर्वन्ति अस्माभिः किमितिस्वार्थत्यागो न विधेयइति। एतेषां सर्वेषामाक्षेपाणां प्रत्युत्तरं कार्यरूपेणास्मिन्महासम्मेलने धर्माचार्यैर्ब्राह्मणपण्डितैश्च प्रदत्तमित्यत्र नास्तिसन्देहः। सर्वेपि धर्माचार्याः स्वीयव्ययेनैव काश्यामागत्य पारस्परिकमतभेदानद्य यावदनुवर्तमानानपि समुपेक्ष्य सनातनधर्मविषये सर्वेषामैकमत्यमेवेति स्पष्टं प्रदर्शयन्तिस्म। सर्वेषामेकविधनिर्णये सम्मतिप्रदानेन जगद्गुरु श्री १०८ शङ्कराचार्याः, श्री १०८ रामानुजाचार्यचरणाः, प्रतिवादिभयङ्कर श्री १०८ मदनन्ताचार्यस्वामिनः, श्रीनाथद्वाराधिपति १०८ श्रीदामोदर लालमहाराजाः, कांकरोलीपीठाधिपतयः, मथुरापीठाधिपतयः, काशीपीठाधिपतयश्च सर्व एव महान्तं श्रममङ्गीकृत्य सम्मेलनशोभां व्यवर्द्धयन्निति कस्य नाम सचेतसो हर्षाय न स्यात्। अत्रागमने हि न किमपि दृष्टं प्रयोजनं साधनीयमासीत् यतोऽत्रागत्य प्रत्येकं धर्माचार्याणां स्वस्वशक्त्यपेक्षयाप्याधिक्येनैव धनव्ययः सञ्जात इति न कस्यापि तिरोहितम्। तथा ब्राह्मणपण्डिता अपि निःस्वार्थभावेनैव समागता इति सर्वेषामिदमेकमेवोद्देश्यमासीद्यत्कथमपि सनातनधर्मस्योपरि योऽयमाघातः सम्प्रति सुधारकैः क्रियते तस्य प्रतीकारकरणं नाम। एवंविधस्य भावस्य जागरणं हि श्रीभगवत्कृपाया एव फलमिति भगवन्तं पुनः पुनः प्रणम्य निवेद्यतेयद् धर्माचार्याणां ब्राह्मणपण्डितानां चायमनुग्रहो न कदापि विस्मरिष्यते तदर्थमनेकेधन्यवादास्समर्प्यन्ते। तत्रापि ये राजानः सर्वथा कोमलाङ्गाः क्लेशासहिष्णवस्तेपि बहुविधान्क्लेशान्विषह्य धनव्ययं च कृत्वा समागमन्निति तेभ्योऽनेके धन्यवादा वितीर्यन्ते। तत्रापि श्रीमहाराजाधिराजो दरभंगानरेशः शरीरास्वास्थ्ये सत्यपि वृद्धावस्थायामप्यनेकैः पण्डितप्रकाण्डैः श्रीकुमाराभ्यामन्यैश्च पारिषदैः सह महता समारोहेण समागत्य सभापतिकार्यं सुसम्पादितवानिति विशेषतो धन्यवादार्हः। अस्मिन् करालसमये यदि नाम दरभंगामहाराजेन सभापतिपदं न गृहीतं स्यात् कथमपि कार्यमिदं सम्पादितं न भवेदिति सर्वेषां निश्चितमेवासीत्। स्वाधीन-


नरपतिवर्गेषु प्रधानतमः श्रीमान् कृष्णगढ़नगराधीशः महाराजाधिराजः श्रीयज्ञनारायणसिंह वर्मा स्वकीयैः पण्डितवरेण्यैः सममागत्य सनातनधर्मे श्रद्धाविशेषं यत्प्रदर्शयामास तदिदमत्याश्चर्यकारणं काशिवासिनामितरदेशीयानां च पश्यतां जनानामासीत्। यस्मिन्दिवसे भगवतो वेदनारायणस्य शोभायात्रा निर्गता यत्र हस्त्यश्वरथपदातीनां भूयसां सन्निवेश आसीत् यत्र सर्वेपि धर्माचार्या विशिष्टमान्दोलिकाप्रभृतियानमधिरुह्य विविधबिरुदावलीविभूषिताः शोभां संवर्द्धमामासुः यां शोभायात्रामवलोकयितुं लक्षसंख्याका जनाः समम्मिलन् तस्यां शोभायात्रायां श्रीकृष्णगढनगराधीशेन महाराजेन सत्यमात्मनो यज्ञनारायणसिंह इति नाम सार्थकीकृतं श्रीमतां जगद्गुरु श्रीवल्लभाचार्यचरणप्रतिष्ठापितदिव्यसिंहासनाधीश्वराणां गोस्वामि श्रीदामोदरलालमहाराजानां स्वर्णरत्नादिखचितं विशिष्टं सिंहासनमधिरुह्य गच्छतां दर्शनमात्रेणैव सपरिच्छेदोऽयं महाराजोऽनुचरैः सह दूरादेव पङ्किलायामपि भूमौ साष्टाङ्गं प्रणिपत्यानेकैर्धनिकैः शिष्यैरुदूह्यमानामान्दोलिकां स्वस्कन्धेन कियद्दूरमुद्वहतिस्म तदिदमस्य सनातनधर्मश्रद्धालुत्वमवलोक्य सर्वे एव विस्मयाविष्टाः शतशो धन्यवादान् प्रददुः धन्योऽयं धन्योऽयं राजेति, अस्माभिस्तु लोकापेक्षयाऽऽधिक्येन धन्यवादा दातुं न शक्यन्ते तावत्याः शक्तेरभावात् केवलमीश्वरचरणारविन्दयोरेत देव प्रार्थ्यते यदेतादृशो गुरुभक्तः श्रीमान् महाराजश्चिरं धर्मं पालयंश्चिरं जीव्यादिति। तथा हथुवामहाराजः अमावांनगराधीश्वरः मकसुदपुरमहाराजश्च विशेषतो धन्यवादार्हाः इतोऽपि वहवस्तस्मिन्सम्मेलने समायाताः परं सर्वेषां नामधामादिकं सम्यङ्न विदितमिति कृत्वा नामग्राहं धन्यवादप्रदाने सामर्थ्याभावाद्ये ये समागतास्तेभ्यः सर्वेभ्योऽनेके धन्यवादा वितीर्यन्ते। एतस्य सम्मेलनस्य मूलभूतः प्रवर्त्तको यः स्वधर्मरक्षायै कृतनिजशरीरोत्सर्गः स श्रीमान्महाराजश्रीशशिशेखरेश्वररायबहादुरो विशेषतोधन्यवादार्हः यस्य प्रयत्नेन सहस्रद्रव्यप्रदानेन च कार्यमिदमग्रेसरमभूत्। तथैव

गौरीपुराधिपतिः श्रीमान् भूम्यधिकारी श्रीव्रजेन्द्रकिशोररायचौधरी महोदयः, तथा हेमनगराधिपतिः श्रीहेरम्बचन्द्रचौधरी महाशयः तथा चौगामहाराजः राजा श्रीरमणीकान्तरायः सर्वेऽपि धन्यवादार्हाः। कलकत्ता मारवाड़ीपञ्चायतं सभासदस्याः सनातनधर्ममण्डलप्रवर्तकाः, रायबहादुर सेठसाधुराम तुलारामगोएनका महोदयः, गौरीशंकरगोएनका महोदयः, रामधनदास झाझरिया, रामकुमारझुनझुनवाला महाशयः, रामरक्षपालझुनझुनवाला यमुनादासवैश्यप्रभृतयो विशेषतो धन्यवादार्हाः एतेषां सर्वेषांमूलभूतप्रवर्तकरङ्गलालपोद्दारमहाशस्य तु कार्यं सर्वथा प्रशंसास्पदं तस्यैव खलु प्रेरणया साधोराम तुलाराममहोदय एकादशशतं-रूप्यकाणां प्रादादिति विशेषतो धन्यवादप्रदानार्हः। रायबहादुर रामेश्वर-दासनाथानीमहोदयस्यस्तु सम्मेलनस्य जीवितमेवासीत् येनसार्द्धद्वादश-सहस्रं रूप्यकाणां प्रदाय सम्मेलनमिदं सम्पादितमिति सर्वं श्रेय एतस्यैव वर्तते इति नातिशयोक्तिरियम्। श्रीमान् सरओंकारमलजटिया महोदयस्तु अत्यन्तकठिने समये साहाय्यं चकारेति तस्याधमर्णा एव सम्मेलनकार्यकर्तारः। वङ्गीयब्राह्मणमहासभासम्पादकः श्रीशरच्चन्द्र सांख्यतीर्थः कोषाध्यक्षः श्रीहृषीकेशवन्द्योपाध्यायमहाशयः सभ्याश्च सर्वे विशेषतो धन्यवादार्हाः। श्रीकाशीस्थ भारतधर्म-महामण्डलप्रधानभूताः श्रीमन्तो दयानन्दस्वामिनो विशेषेणास्मिन् कार्ये परिश्रमं व्यधुः कार्यकारिण्यां समित्यामनवरतं समागत्य प्रबन्धसम्पादनेन स्वीयकार्यकारिणां श्रीगोपालचन्द्रचक्रवर्तिनां तथा श्री अवधेशप्रसादशास्त्रिणां विन्ध्येश्वरीप्रसादशास्त्रिणामन्येषां चानुयायिना-मुपरि कार्यभारं समर्प्य महदुपकृतवन्त इति ससभ्यानामेतेषां महान्तमुप-कारं न विस्मरिष्यति सम्मेलनमिदम्। श्रीमान्पण्डित धूमावतीप्रसाद-पाण्डेयमहामहोपदेशकमहाशयस्य तु असंख्या उपकारात्रर्तन्ते सम्मेलन-स्योपरि, यदनेन महाभागेन तथा पं० मुरलीधरचौधरीमहोदयेन चादित आरभ्यैव भूयान् परिश्रमः कृतस्तदर्थमनेके धन्यवादाः समर्प्यन्ते।

तथा काशीस्थाः पण्डिताग्रगण्या पण्डितरामभवनोपाध्यायाः, पण्डित-देवकीनन्दनशास्त्रिदर्शनालङ्काराः, पं० पूर्णचन्द्राचार्याः, पं० रामयशस्त्रि-पाठिनः, पं० गणपतिशास्त्रिमोकाटेमहाशयाः, पं० श्रीहाराणचन्द्रशास्त्रि-प्रभृतयः विशेषतः प्रशंसनीयाः। तत्रापि पं० पूर्णचन्द्राचार्याणां समुद्योगे नैवप्रति वादिभयङ्करानन्ताचार्यस्वामिचरणानामागमनं संवृत्तमिति तेषां कृतज्ञाः सम्मेलनकार्यकारिणः। तथा काशीस्थधनिषु प्रधानभूतो राजा मोतीचन्द सी० आई० ई० महोदय, रायबहादुर बटुकप्रसादमहोदय, रायसाहेब माधवराम सण्डमहोदयः रायसाहेब रामरतनदास, कुमार-श्रीकवीन्द्रनारायणसिंह महोदयप्रभृतयो विषेशेण स्मरिष्यन्ते सर्वदा, येषामेव साहाय्येन सम्मेलनार्थं स्थानमस्माभिरलभ्यत, इतरथा सम्मेलन-मिदं दुर्घटमेव समभूत्। श्रीयुक्त भिषग्वरडाक्टर कालीपदवन्द्योपाध्याय-महाशयस्यापि वयमधमर्णाः येन प्रबन्धकारिण्याः सभायाः कृते निरन्तरं स्त्रीयं स्थानं प्रदत्तम्। श्रीवल्लभरामशालिग्रामसाङ्गवेदविद्यालय-प्रतिष्ठापकाः श्रीमन्तः पं० किशोरीलालशर्माणः तथा पं० मुरारिलाल शर्माणश्च सपरिवारा अस्मिन्सम्मेलने समागत्य सर्वेषां धर्माचार्याणां देशान्तरीयाणां च पण्डितानां विद्यालये समाव्हानपूर्वकं विशेषेण पादपूजादिपूर्वकं सद्दक्षिणाप्रदानादिना सत्कारं कृतवन्त इति विशेषतो धन्यवादार्हाः। श्रीयुत पं० खिस्ते नारायणशास्त्रि-साहित्याचार्याय, होशिंगोपाह्वजगन्नाथशास्त्रिणे, म० म० पं० पद्मनाथ विद्याविनोदभट्टाचार्यमहाशयेभ्यस्तथा अनन्तरामशास्त्रिप्रभृतिभ्योऽनेके धन्यवादाः प्रदीयन्ते। नागरकुलालङ्काराय ठाकुर पण्डित गोपालजी महोदयाय, पं० शम्भूरामजी महोदयाय, पण्डितप्रवराय श्रीश्यामाकान्त-तर्कपञ्चाननभट्टाचार्याय, खण्डमहादेवशास्त्रिणे, रामाचार्याय, वैद्यरत्न श्री श्रीनिवासशास्त्रिणे, श्रीमुकुन्दपन्त पुणतामकर इत्युपाख्याय, श्रीमण्डलीकर गोपीनाथशास्त्रिणे, पं० श्रीगोपालभट्टभट्टाय, पं० द्राविड़ श्रीविश्वनाथ-शास्त्रिणे, श्रीहेमेन्द्रकुमारभट्टाचार्याय, श्रीशिवरामशास्त्रिणे, यावन्तो धन्य-

वादा दीयेरन् तावन्तोऽल्पा एव, येषामनवरतपरिश्रमेणैतत्सम्मेलनं सफलमभूत् । तथा यैर्यैर्महाशयैः शिवबक्षबागड़ी श्रीकृष्णगोपालबागड़ी प्रभृतिभिः साहाय्यं कृतं सर्वेभ्योऽनेकेधन्यवादाः समर्प्यन्ते । प्रबन्धकारिण्याः समितेः सभापतिसहकारिसभापतिपदमलङ्कुर्वद्भयस्तत्र भवद्भ्यो म० म० पंचाननतर्करत्नमहोदयेभ्यस्तथा म० म० पं० वामाचरणभट्टाचार्यमहाशयेभ्यः, म० म० पं० श्रीलक्ष्मणशास्त्रिद्राविड़महाशयेभ्यः समर्प्यन्ते भूयांसो धन्यवादास्तथा म० म० पं० अनन्तकृष्णशास्त्रिवेदान्तविशारदेभ्यः, न्यायाचार्य पण्डित श्रीराजेश्वरशास्त्रिद्राविड़महोदयेभ्यः, साहित्याचार्य पं० श्रीताराचरणभट्टाचार्यमहाशयेभ्यः, पं० श्रीश्रीजीवन्यायतीर्थ एम्० ए० महोदयेभ्यो, मन्त्रिसहकारिमन्त्रिपदमलंकृतवद्भ्योपि येषामेव सततपरिश्रमेण देशान्तरपरिभ्रामेण निरर्गलया वाग्मितयाच सम्मेलनस्य निर्विघ्नं समाप्तिरभूत् । येषामेव महाभागानां परिश्रमेणैतावान् सन्नाहः सम्पन्नः, पुनरपि तेषां सविधे प्रार्थनमिदं यत्भवद्भिरुत्साहपूर्वकमेवमेव धर्मकार्ये साहाय्यं करणीयमिति ।





अखिलभारतवर्षीयब्राह्मणमहासम्मेलनेन

स्वीकृताः प्रस्तावाः ।

प्रथमः प्रस्तावः—

१ गोरक्षणं सनातनधर्मीयाणां मातृपालनमिव परमं कर्तव्यमिति सर्वैरपि सनातनधर्मीयैस्तदर्थं बद्धपरिकरैर्भाव्यमितीयं सभा साभिनिवेशं सूचयति ।

प्रस्तावकाः— १ पं० अखिलानन्द कविरत्नः ।

अनुमोदकाः—२ म० म०पं० विरूपाक्षशास्त्रिणः ।

३ म० म० पं०दुर्गाचरणसांख्यवेदान्ततीर्थाः ।

द्वितीयः प्रस्तावः—

२ इदानीं किल व्यवस्थापकजानपदसभायां "शारदा बिल्" इति यः प्रस्तावो वर्तते, तस्य सनातनधर्ममर्मोच्छेदकत्वेन सनातनधर्मीयमानसमर्मविदारकत्वादियं सभा सुतीव्रं तं निषेधति । जोघुष्यते च महाराज्ञी व्हिक्टोरियादत्ताभिवचनानुसारेणायं प्रस्तावः सम्राट्प्रतिनिधिमहोदयैर्जानपदसभायां स्वाधिकारेण निरोद्धव्य इति । एतदर्थं च ब्राह्मणमहासम्मेलनेनानेन यथाशक्ति सर्वात्मना प्रयतितव्यं स्यात् । एतदुपायगवेषणाय कार्यकरणाय चोपसमितिरेका नियोज्यते—

(१) म० म० पं० गिरिधरशर्माणः (राजपुताना)

(२) म० म० पं० अनन्तकृष्णशास्त्रिणः (संपादकः)

(३) शरच्चन्द्रसांख्यतीर्थमहाशयाः (बङ्गाल)

(४) एन० जी० सावरकर (अकोला, महाराष्ट्र)

(५) कनपर्त्ति मार्कण्डेयशर्मा (मद्रास)

प्रस्तावकाः—१ म० म० पं० गिरिधर शर्माणः ।

अनुमोदकाः—२ म० म० पं० हाथीभाई शास्त्रिणः ।

३ म० म० पं० श्रीतातसुब्बरायशास्त्रिणः ।

४ दर्शनालङ्कार पं० देवकीनन्दनशास्त्रिणः ।

तृतीयः प्रस्तावः—

३ एतद्ब्राह्मणसम्मेलनं भारतीयव्यवस्थापकसभां प्रादेशिकसभां च सनिर्बन्धं विज्ञापयति यथा व्यवस्थापकसभायां नगरपरिष्कारकसभायां च ये भारतीयवर्णाश्रमसनातनधर्मविरुद्धास्त त्तत्समाजव्यवस्थाविघातकाः प्रस्तावा उपस्थाप्यन्ते, तैर्भारतीयजनताया महान् व्याकोपो भवति, समाजधर्महानिश्च भवति । ततश्च ते तत्र कदाचन स्थानं न लभेरन्, तथा व्यवस्थापनीयम् । यदि तथाप्युपस्थापयिष्यन्ते, तर्हि भारतीयब्राह्मणैस्ते न स्वीकरिष्यन्ते, विरोधश्च करिष्यते ।

प्रस्तावकाः—(१) पं० रमानाथमिश्राः ।

अनुमोदकाः—(२) „ काशीनाथशास्त्रिणः ।

(३) „ वामनदास विद्यासागराः ।

चतुर्थः प्रस्तावः—

४ इदं महासम्मेलनं तत्तद्देशीयानां सर्वभूतानां सर्वदेशीयानां च सन्दिग्धानां जटिलानां च समस्यानां निर्णयार्थं प्रतिप्रान्तं दशानां पण्डितानां धर्मपरिषद्घटनमावश्यकं मन्यते । तत्तत्प्रान्तीयानां सविधे प्रार्थ्यते-यत्तत्तत्संस्थाद्वारा स्वीयानि सूचनानि देयानि ।

प्रस्तावकाः—(१) पं० गङ्गाविष्णुशर्माणः ।

अनुमोदकाः—(२) „ कालूरामशास्त्रिणः ।

(३) „ भगीरथ गोस्वामिनः ।

(४) „ खगेन्द्रनाथशास्त्रिणः ।

(५) „ माधवराव दाणीशर्माणः ।

(६) „ रामभवनोपाध्यायाः ।

पञ्चमः प्रस्तावः—

५ सनातनधर्मप्रदीपग्रन्थस्य पुनःसंस्कारार्थमागतानां समालोचनानामापावोद्वापेन समीकरणार्थं चाधोनिर्दिष्टप्रकारेणोपसमितिरेका घटनीया, यया संवत्सरमध्ये तत्प्रकाशनार्थं समुचितः प्रबन्धः क्रियेत ।

१ म० म० पं० श्रीपञ्चाननतर्करत्नभट्टाचार्यः ।
२ „ „ „ श्रीलक्ष्मणशास्त्रिणो द्राविडाः ।
३ „ „ „ वामाचरणभट्टाचार्य महोदयाः ।
४ „ „ „ श्रीविरूपाक्षशास्त्रिणः ।
५ „ „ „ प्रभुदत्तशास्त्रिणोऽग्निहोत्रिणः ।
६ „ „ „ पद्मनाथविद्याविनोद भट्टाचार्याः ।
७ „ „ „ हाथीभाई शास्त्रिणः ।
८ „ „ „ शशिनाथ झा महोदयाः ।
९ „ „ „ हरिहरकृपालुशर्म महोदयाः ।
१० „ „ „ दुर्गाचरण साङ्ख्यवेदान्ततीर्थ महोदयाः ।
११ „ „ „ श्रीअनन्तकृष्णशास्त्रिणः ।
१२ „ „ „ गिरिधरशर्माणः ।
१३ पं० नागेशशास्त्रिणः ।
१४ पं० श्रीराजेश्वरशास्त्रिणो न्यायाचार्याः ।
१५ शुद्धाद्वैतभूषण पं० श्रीरमानाथ देवर्षिः ।
१६ पं० रेड्डी रङ्गाचार्यमहोदयः ।
१७ पं० शशिभूषण स्मृतितीर्थः ।
१८ पं० पूर्णचन्द्राचार्यः ।
१९ पं० भगवानदत्तशर्माणोऽग्निहोत्रिणः ।
२० पं० अखिलानन्द शर्मा कविरत्नः ।
२१ पं० माधवरावदाणी महोदयः ।
२२ पं० मल्लादि श्रीरामकृष्णशास्त्रिणो महाग्निचितः ।

२३ पं० गणपतिशास्त्री मोकाटे महोदयः ।

२४ पं० गुलाबझा महोदयः ।

२५ पं० ताराचरणभट्टाचार्यः ।

२६ पं० हाराणचन्द्रशास्त्री ।

२७ पं० श्रीश्रीजीवन्यायतीर्थः एम् ए० ।

२८ पं० रामभवनोपाध्यायाः ।

२९ पं० देवकृष्णशास्त्रिणः ।

३० पं० दर्शनालङ्कार देवकीनन्दनशास्त्रिणः ।

३१ पं० कृष्णमाचार्य महोदयः ।

३२ पं० रमापति मिश्रः ।

३३ पं० ढएढराधाकृष्ण मिश्रः ।

तत्तत्सनातनधर्मसंस्था संपादकाः ।

धर्माचार्याणां द्वौ द्वौ प्रतिनिधी ।

प्रस्तावकाः—१ पं० श्रीछोटु महाराजाः ।

अनुमोदकाः—२ पं० वाणीभूषण श्रीनन्दकिशोर शर्माणः ।

३ पं० श्रीश्रीजीवन्यायतीर्थाः ।

४ पं० श्रीदेवकृष्णशास्त्रिणः ।

५ पं० तेयूर सुब्रह्मण्यशास्त्रिणः ।

षष्ठः प्रस्तावः—

(६) महासम्मेलनमिदं संस्कृतविश्वविद्यालयस्यैकस्य स्थापनमत्यावश्यकं मन्यते, तदर्थं धनसंग्रणार्थमधोनिर्दिष्टानां महाशयानां नामानि निरुच्यन्ते—

सर्वे धर्माचार्याः ।

१ श्रीमन्महाराजाधिराज दरभङ्गानरेशः ।

२ म० म० पं० श्रीलक्ष्मणशास्त्रिणो द्राविडाः ।

३ म० म० पं० वामाचरणभट्टाचार्याः ।

४ म० म० पं० गिरिधरशर्माणः ।

५ म० म० पं० श्रीअनन्तकृष्णशास्त्रिणः ।

६ कलकत्तापञ्चायतसभा ।

७ राजाशशिशेखरेश्वरराय महोदयः ।

८ श्रीसाधुराम तुलाराम गोयनका ।

९ श्रीव्रजेन्द्रकिशोररायचौधरी ।

१० सर ओंकारमल जटिया ।

११ राजामोतीचन्द महोदयः, इत्यादयः ।

प्रस्तावकाः—१ म० म० पं० श्रीनन्तकृष्णशास्त्रिणः ।

अनुमोदकाः—२ म० म० पं० श्रीलक्ष्मणशास्त्रिणो द्राविडाः ।

३ पं० मदनमोहनशास्त्रिणः ।

४ पं० गोपीनाथशर्माणः बी० ए० ।

५ पं० रमापतिमिश्राः ।

६ श्रीमन्महाराजदरभङ्गानरेशः ।

सप्तमः प्रस्तावः—

अतः परं सर्वेऽपि प्रस्तावाः स्वयं सभापतेरभ्यनुज्ञया श्रीअनन्तकृष्णशास्त्रिभिरेवोपन्यस्ताः ऐकमत्येन स्वीकृताश्च ।

(७) जानपदशासनसभायाः सभास्तारनिर्वाचनावसरे सर्वैरपि सनातनधर्मिभिः स्वीयं मतं तेभ्य एव प्रदातव्यम्, ये किल सनातनधर्मश्रद्धालवः शास्त्रैकशरणाः कदाचिदपि धर्मघातकप्रस्तावं स्वयं नोपन्यसिष्यन्ति वा नानुमोदिष्यन्ते जानपदशासनसभायां प्रादेशिकशासनसभायां चेतीयं सभा साग्रहं सूचयति ।

अष्टमः प्रस्तावः—

(८) जानपदशासनसभायाः प्रादेशिकशासनसभायाश्च सभास्तारनिर्वाचने धर्माचार्याणां विशेषाधिकारस्तथा संस्कृतविद्यालयाधिगतो-

पाधीनां सर्वेषां शास्त्रिणां पंडितानां च स्वीयमतदानाधिकारश्चाविलम्बे-नैव प्रदेय इत्यपीयं सभा सूचयति साग्रहम् ।

नवमः प्रस्तावः—

(६) अखिलभारतीयब्राह्मणमहासम्मेलनकार्यकारिसमितिरेका श्री-काशीधामनि तत्तद्देशीयानां समसंख्यानां प्रतिनिधीनां कार्यनिर्वाहक-सदस्यानां निर्वाचनेन घटनीयेति मन्यते ।

सभापतिः—१ महाराजाधिराज श्रीदरभङ्गानरेशः ।

सहकारिसभापतिः—२ म० म० श्रीयुक्त पं० पञ्चाननतर्करत्नभट्टाचार्यः ।

सदस्याः—३ म० म० पं० वामाचरणभट्टाचार्याः ।

४ म० म० पं० गिरिधरशर्माणः ।

५ म० म० पं० हाथीभाईशास्त्रिणः ।

६ म० म० पं० पद्मनाथविद्याविनोद भट्टाचार्याः ।

७ म० म० पं० श्रीविरूपाक्ष शास्त्रिणः ।

८ म० म० पं० श्रीतातसुब्बरायशास्त्रिणः ।

९ म० म० पं० केशवराव ताम्हन महोदयाः ।

१० म० म० पं० अभ्यङ्कर श्रीवासुदेवशास्त्रिणः ।

११ म० म० पं० प्रभुदत्तशास्त्रिणोऽग्निहोत्रिणः ।

१२ म० म० पं० शशिनाथ झा महोदयाः ।

१३ म० म० पं० हरिहरकृपालुशर्मणामहोदयाः ।

१४ म० म० पं० हरिनारायणशास्त्रिणः ।

१५ म० म० पं० दुर्गाचरणसाङ्ख्यवेदान्ततीर्थ महोदयाः ।

१६ म० म० पं० श्रीलक्ष्मणशास्त्रिणो द्राविडाः ।

१७ म० म० पं० यादवजी त्रिकमजी आचार्य महोदयाः ।

१८ पण्डित श्रीरामभवनोपाध्यायमहोदयाः ।

१९ „ दर्शनालङ्कार श्रीदेवकीनन्दशास्त्रिणः ।

२० „ पूर्णचन्द्राचार्यः ।

२१ „ अखिलानन्दशर्माणः ।

२२ „ भगवानदत्त शर्माणोऽग्निहोत्रिणः ।

२३ „ भट्टश्रीनन्दकिशोरशास्त्रिणः ।

२४ „ तर्कविद्वान् श्रीनागेशशास्त्रिणः ।

२५ „ मल्लादि श्रीरामकृष्णशास्त्रिणो महाग्निचितः ।

२६ „ शास्त्ररत्नाकर श्रीकृष्णशास्त्रिणः ।

२७ „ गणपतिशास्त्री मोकाटे महोदयः ।

२८ „ गुलाबझा महोदयाः ।

२९ „ शरच्चन्द्र साङ्ख्यतीर्थः ।

३० „ माधवराव रामचन्द्रदाणी महोदयः एम्० ए० काव्यतीर्थश्च ।

३१ „ गणेशचन्द्रजी काव्यतीर्थः (चुरू)

३२ „ रेड्डी रङ्गाचार्य महोदयः ।

३३ „ बद्रीदासपुरोहितः ।

३४ „ देवदत्तमिश्रमहोदयः ।

सम्पादकः—३५ म० म० पं० श्रीअनन्तकृष्णशास्त्रिणो वेदान्तविशारदाः ।

सहकारिसंपादकाः—३६ पण्डित ताराचरण भट्टाचार्यः ।

३७ „ श्रीराजेश्वरशास्त्रि द्राविडो न्यायाचार्यः ।

३८ „ श्रीहाराणचन्द्रशास्त्री ।

३९ „ श्रीश्रीजीवन्यायतीर्थः एम्० ए० ।

दशमः प्रस्तावः—

(१०) सर्वेषां भारतवर्षीयाणां ब्राह्मणानां सङ्घटनार्थं च तत्तद्देशीयैः सर्वैरपि ब्राह्मणैः स्वस्वदेशे सम्मेलनस्य शाखासमितयः संस्थापनीयाः । यत्र च प्रदेशे पूर्वमेव ब्राह्मणसभा वर्तन्ते ताभिश्च शाखासमितित्वमवश्यमेव स्वीकर्तव्यम् ।

एकादशः प्रस्तावः—

(११) तत्तज्जातिभिः स्वयं समुत्कृष्टजात्यन्तरभावावलम्बनेन तत्र तत्र समाजे इदानीं विशेषत आघाताः क्रियमाणा अत्यन्तमेव शास्त्रदृष्ट्या समाजदृष्ट्या चायोग्याः । यथा खाती, जाङ्गडाः, वैद्याः, सुवर्णवणिजः, तक्षाः, कायस्थाः, माहिष्याः, अम्बष्ठाः, कम्मरेड्डि, तन्तुवाय, कैवर्तप्रभृतयः ।

द्वादशः प्रस्तावः—

(१८) उत्तरास्मिन् प्रदेशे श्रीमद्भगवत्पादशङ्कराचार्यस्थापितज्योतिर्मठस्य पुनश्च जीर्णोद्धारः कर्तव्य इतीयं सभा साभिनिवेशं सूचयति ।

त्रयोदशः प्रस्तावः—


(१३) त्रैलोक्यपावनश्रीभागीरथीप्रवाहः कुत्रापि न रोद्धव्यः, तथा मलमूत्रवाहकनलिकास्तत्र प्रवाहे नोत्सर्जनीयाः । तथा कृते धर्मनिष्ठानामस्माकं महती पीडा स्यात्, धर्महानिश्च भवति । इतीयं सभा सूचयति ।

प्रथममभ्यर्थनापत्रम् ।

प्रधानत आलोच्या विषयाः—

१ विवाहः । २ शुद्धिः । ३ स्पृश्यास्पृश्यविचारः ।
४ जातिपरिवृत्तिः । ५ आवशकं चान्यत् ॥

परिस्थितिविशेषेण शास्त्रपरिवर्तनवादिनः केचन, केचन तु शास्त्रं प्रमाणमूरीकृत्यैव परिस्थित्यनुगुणं व्याख्यानपद्धतिमात्रपरिवर्तनवादिनः, अपरे च प्राचीनव्याख्यानपद्धतिमेवालम्ब्य तत्तत्प्रमाणविशेषेण परिस्थित्यनुगुणमर्थशास्त्रप्राधान्योपष्टंभनेन शास्त्रोपयोगं व्यवस्थापयन्तः परे च धर्मशास्त्राविरोधेनार्थशास्त्रोपयोगाङ्गीकारेण प्राचीनपद्धत्या यथावच्छास्त्रोपयोगपक्षोऽपि न दोषायेति वादिन इति भिन्नभिन्नप्रस्थानाः समाजा इति वस्तुस्थितिकथनमिदम् ।



श्री १०८ द्वारका शङ्कराचार्य्य पादाः

P. M.

तत्रान्त्यपत्तावलम्बिनामुपान्त्यपत्तावलम्बिनां च संघटनं धर्मशास्त्रस्य वैयक्तिकाधिकारित्वमर्थशास्त्रस्य समाजाधिकारित्वमिति विवेचनेन, एवमन्तिमपक्षावलम्बिनामपि मध्ये शास्त्राणां प्राचीनपद्धत्यनुसारेण शुद्ध्यादौ प्रामाण्यमस्त्येव, तथा न तदस्तीति मतभेदनिरासेन संघटनम्, यथोपयोगं राजनीतिक्षेत्रेऽपि प्राचीनमतावलम्बिनां प्रवेशव्यवस्थापनं च विना जीवनाशाऽपि भारतीयानां सुदूरे इति नेदं कस्यापि तिरोहितम्। ततश्चेदमवश्यं प्राचीनमतावलम्बिनामप्यवसरप्राप्तम्-यत् स्वीयावान्तरसमाजकार्यानुपघातेन समाजान्तरैकवाक्यतया च यथासम्भवं समाजहितसमालोचनम्, तथा यथाशक्ति शक्तिमतिक्रम्य वा कार्यक्षेत्रेऽपि प्रवर्तनं चेति सर्व एव प्रतिग्रामं प्रतिगृहं चानुभवन्ति व्यवहरन्ति च; कार्यावसरे परं प्रायेण सर्वेप्यन्यथैव व्यवहरन्ति। एतन्निबन्धनमेव वयं मन्यामहे, व्यवस्थापकसभादिषु राजनीतिसभासु च प्राचीनधर्मविरोधिनो बहव एव प्रस्तावाः प्रस्तूयन्तेऽस्मदीयैरेव। अतोऽवसरप्राप्तमिदमस्माकं सर्वेषाम्-यत् प्रकृतसमयोपयोगिसमस्याविशेषाणां निष्पक्षपातं विना दुराग्रहं च व्यवस्था कथं शास्त्राणामपि यथायोगं रक्षणेन कर्तव्येति समालोचनम्, एवं यथाशक्ति कार्यक्षेत्रे प्रवर्तनं च। सर्वं चेदं सर्वेषां सनातनधर्मावलम्बिनां विना मेलनं न कार्यकारि भवतीति सनातनधर्मसभास्तास्ताः शाखारूपाः, एवं मूलसभा चैका सङ्घटनीया, यत्र सर्वेषां तत्तज्जात्यादिधर्मावलम्बिनां प्राचीनमतावलम्बिनां मेलनमवश्यं भावि। तदुपोद्घाततया चेदमवश्यं कर्तव्यम्-यत् सर्वासां समस्यानां पूर्वोक्तरीत्या समालोचनार्थं सर्वदेशीयपण्डितसम्मेलनम्, तथा तद्द्वारा प्रकृतसमस्यासु सनातनधर्मावलम्बिनामवलम्बनीयस्य मार्गस्योद्घोषणमिति सर्व एवेदं मन्यन्ते प्राचीनमतावलम्बिनः। यदा खलु सनातनधर्ममण्डलं कलकत्तानगरे स्थापितमासीत्तदा तेनापि प्रथमकर्तव्यतया पण्डितवरश्रीदीनयालुव्याख्यानवाचस्पत्यादीनां प्रोत्साहनेनेदमेव निर्णातमासीत्; न केवलमे-

केनानेन, किन्तु वङ्गीयब्राह्मणसभया, तथान्याभिश्च बहुभिरेव सभाभिर्बहुवारमिदमेवोद्घोषितमासीदिति सर्व एवेदं विजानन्ति ।

तमिमं सङ्कल्पं श्रीवङ्गीयब्राह्मणसभायाः, श्रीकलकत्तासनातनधर्ममण्डलस्य चान्यासां च सभानां फलेग्रहि व्यवस्थापयितुं काश्यां श्रीविश्वनाथप्रेरणया कार्तिकमासि सूर्योपरागादव्यवहितपूर्वं कार्तिककृष्णनवमीमारभ्य (६-११-१९२८) दिनत्रयं ब्राह्मणसम्मेलनमेकं सङ्घटनीयमिति निरणायि । इयन्तं हि कालं ब्राह्मणसम्मेलनी गौडादिप्रदेशेषु सङ्घटिता । शिवत्वप्राप्तकाशीवासिमहामहोपाध्यायश्रीशिवकुमारशास्त्रिप्रमुखाणाम्, मिथिलाधिपतेः, मद्रप्रदेशवास्तव्यमहामहोपाध्यायश्रीलक्ष्मणशास्त्रिप्रभृतीनामुत्कलमहामहोपाध्यायश्रीजगन्नाथमिश्रादीनां च तदा तत्र तत्र सम्मेलनं जातम् । तत्र तत्र सभाधिवेशने बहवः शास्त्रीयसिद्धान्ता अप्युद्घोषिताः । ये खलु कुत्रचन नवीनसंस्थासु तद्विरुद्धा आक्षेपा इदानीमुद्भाव्यन्ते, तत्समालोचनार्थमखिलभारतीयविद्वद्ब्राह्मणानाहूय विचारो ह्यवश्यकर्तव्यतां प्राप्तः । ये तावदाक्षेप्तारः, ये चाक्षेपपरिहर्तारः, सर्वेषामुपस्थितिः सादरमभ्यर्थ्यते ।

एतदधिवेशनमहिम्ना यथावसरं ब्राह्मणमहासम्मेलन्यामखिलभारतीयब्राह्मणपण्डितानां सहयोगः, भारतीयप्रदेशान्तरेष्वपि पश्चादधिवेशनं च भविष्यतीति सम्यगाशास्यते; यतो मद्रास्प्रदेशाद् बहवस्तत्तद्ग्रामपञ्चायतनधर्माचार्यादीनां प्रतिनिधयः, बहवश्च बम्बई इत्यादिविभागात् स्वव्ययेन प्रेषयिष्यन्त इति समधिगता लिपिबद्धा प्रतिज्ञा, श्रीवङ्गीयब्राह्मणसभया च वङ्गदेशीयाः प्रायेण द्विशतं पण्डिताः स्वप्रतिनिधिरूपेणात्र स्थायिसदस्याः स्वव्ययेनोपस्थापयिष्यन्ते ।

विश्वसिमो वयं वङ्गीयब्राह्मणसभाया एव नवममधिवेशनमिमामखिभारतवर्षीयब्राह्मणमहासम्मेलनरूपतां प्रापितमिति वङ्गीया बहव एवापरेऽपि पण्डितप्रवराः समुपस्थाय सम्मेलनकार्यं सफलयिष्यन्ति । सनातनधर्ममण्डलसभापि कलत्तानगरीया, यया प्रायेण सर्वोऽपि सम्मे-

लनव्ययभारः स्वीकृतः, सापि मरुदेशीयानां बहूनां पण्डितानामत्रोपस्थापनव्यवस्थां कारयिष्यतीति सिद्धार्थकथनमिदम्। अतः साञ्जलिबन्धमिदमेव श्रीमतां सर्वेषां सविधे प्रार्थ्यते—यत् स्वव्ययेन, स्वग्रामपञ्चायतनव्ययेन, स्वीयराजस्थानव्ययेन, केषाञ्चन धार्मिकाणां व्ययेन वा ये खलु सम्मेलनसहयोगदानेनास्माननुगृहीतुमिच्छन्ति, ते मासाभ्यन्तर एव स्वनामधामादिसूचनेनानुगृह्णन्त्वस्मान् सदयमिति।

अन्ते च तत्तादृशान् राजमहाराजादिधनिकोत्तमान् सनातनधर्माभिमानिनः सविनयमिदं प्रार्थयामहे-यत् सूर्योपरागसमयं कार्यं च सामाजिकं काशीक्षेत्रं च परमं पावनमुपलक्ष्य यथाशक्ति प्रतिनिधीनां केषांचन धूमशकटव्ययमात्रव्यवस्थापनेन सम्मेलनकार्यसम्पादनार्थं प्रेषणेनानुग्रहः कर्तव्यः। श्रीकाशीक्षेत्रधूमशकटस्थानत आरभ्य शकटप्रबन्धभोजनप्रबन्धादिभारं सर्वमपि सम्मेलनकार्यकारिसभैव निर्वक्ष्यतीति केवलं धूमशकटव्ययमात्रेण पण्डितप्रेषणमेकमेव वयं प्रार्थयामहे, नान्यत्किमपि। साञ्जलिबन्धं तत्तत्सनातनधर्मसंस्थाप्रवर्तकानां सविधे इदं निवेद्यते-यत् यथासौकर्यमचिरेणैव मासाभ्यन्तरे स्वप्रतिनिधिप्रेषणव्यवस्थादिव्यवस्थापनपूर्वकं स्वीयसहयोगादिसूचनेन, कर्तव्यांशोपदेशप्रेषणेनालोच्यविषयेषु स्वीयमतस्य संगृह्य प्रेषणेन चानुग्रहः कर्तव्य इति।

इति विधेयतमाः।

श्रीयुक्तानन्तकृष्णशास्त्री,
सम्पादकः
श्रीराजेश्वरशास्त्री द्राविडः,
श्रीश्रीजीवभट्टाचार्यः,
श्रीताराचरणभट्टाचार्यश्च
(संयुक्त सम्पादकाः)

श्रीयुक्तपञ्चाननतर्करत्नभट्टाचार्यः
(प्रबन्धकारिसमितिसभापतिः)
श्रीयुक्त लक्ष्मणशास्त्री द्राविडः
श्रीयुक्तवामाचरणभट्टाचार्यः
श्रीरामभवनोपाध्यायश्च
(सहकारिसभापतयः)

द्वितीयमभ्यर्थनम्—

महानुभावाः !

श्रीकाश्यामद्य कार्यनिर्वाहकसमित्येदमस्ति निर्धारितम्—यत् समालोच्येषु शुद्धि-विवाहजातिपरिवृत्त्यादिषु प्रश्नावली प्रथममेका या खल्वनन्तरपृष्ठे मुद्रापिता, पण्डितप्रवराणां श्रीमतां सविध उपस्थापनीया यस्या उत्तराणि समालोचयितं तत्तद्देशीयानां विशिष्टानां पण्डितानामुपसमितिरेकाऽचिरेण संघटयिष्यते ।

उपसमितिश्चेयं सम्मेलनात्पूर्वं कार्तिककृष्णप्रतिपदमारभ्य २९-१० २८ कार्तिककृष्णाष्टमीपर्य्यन्तं सर्वेषामुत्तराणां सप्रमाणं विचारविनिर्णयबुद्ध्या विमर्शनेन प्रारप्स्यतीत्यपि कार्यनिर्वाहकसमित्याज्ञयोपदिप्यते । आशास्यते पण्डितप्रवराः सर्वेऽप्याश्विनकृष्णाष्टमीतः पूर्वम् (६-१०-१९२८) स्वीयानामुक्तप्रश्नावल्युत्तराणां सदयं प्रेषणेनानुग्रहीष्यन्तीति । अन्ते पुनरिदं सप्रश्रयं प्रार्थ्यते-यदुत्तरसंग्रहावसरे निबन्धकाराद्दृतमीमांसापद्धतिरेव यद्यलम्ब्यते, तर्हि महाननुग्रहः स्यात् ।

प्रश्नावल्या अस्याः समालोचनं ये कुर्वन्ति ये च तेषां सर्वेषां महासम्मेलनावसरे विचारसभावसरे वा समुपस्थाय कार्येषु सहयोगं दित्सवः तत्तत्सभाद्वारा तत्तद्विद्यालयद्वारा, तत्तत्संस्थानद्वारा, स्वयं वा स्वनामधामाद्यचिरेण प्रेषयन्त्विति सप्रश्रयमभ्यर्थ्यते ।

अधिक श्रावण शुद्धतृतीयायाम् शनिवासरे । (१८-८-२८) } इति विधेयतमः श्रीपञ्चाननतर्करत्नभट्टाचार्यः ।

स्वागतसभाध्यक्षः ।

हिज हाइनेस महाराजाधिराज काशी-नरेश श्री प्रभुनारायणजी सिंह बहादुर के० टी०, जी० सी० एस० आई०, जी० सी० आई० ई, एल० एल० डी० महोदयः ।

सम्मेलनाध्यक्षः ।

हिज हाइनेस महाराजाधिराज आनरेबुल भारतधर्मदिवाकर सर रमेश्वरसिंहजी बहादुर जी० सी० आई० ई०, के० सी० आई० ई०, के० बी० ई०, डी० लिट् इत्यादि महोदयः ।

पृष्ठपोषकाः—

१ शास्त्रैकजीविताः सर्वे धर्माचार्याः ।
कलकत्ता वङ्गीय ब्राह्मणसभा ।
२ राजा श्रीशशिशेखरेश्वररायः रायबहादुर ।
३ कलकत्तासनातनधर्ममण्डलप्रवर्त्तको मारवाडीसमाजः ।
४ रायबहादुर श्रीरामेश्वरनाथानी (दुदवेवाला)

प्रबन्धकारिणीसमितिः ।

सभापतिः—

महामहोपाध्यायः पं० श्रीपञ्चाननतर्करत्नभट्टाचार्यः ।

सहकारिसभापतयः ।

महामहोपाध्याय पं० श्री वामाचरणभट्टाचार्य महामहोपाध्यायपण्डित श्रीलक्ष्मणशास्त्रिद्राविड पं० श्रीरामभवनोपाध्यायाः ।

सम्पादकाः

महामहोपाध्याय पं० श्रीयुक्तानन्तकृष्णशास्त्री,
पं० श्रीराजेश्वरशास्त्री द्राविडः, पं० श्रीताराचरणभट्टाचार्यः,
पं० श्रीश्रीजीवभट्टाचार्यः एम० ए० न्यायतीर्थश्च ।

ब्राह्मणमहासम्मेलननियमाः—

(१) निबन्धपर्यन्तधर्मग्रन्थप्रामाण्याविरोधेनैव विचारो भवितुमर्हति।

(२) मीमांसापद्धतिरेव विचारावसरेऽवलम्बनीया ।

(३) सनातनधर्मावलम्बिनो ब्राह्मणपण्डिता एव प्रतिनिधयो विचारकाश्च भवितुमर्हन्ति ।

(४) चत्वारो वर्णा अपि दर्शकपदमर्हन्ति ।

(५) विना प्रवेशपत्रं केषामपि सभायां न प्रवेशः ।

(६) यैः खलु यस्मिन्विषये विचारः करिष्यते, तद्विषये स्वीयमतप्रकाशको निबन्धः सम्मेलनदिनस्यैकमासतः पूर्वं सम्पादकसविधे यथासम्भवं प्रेषणीयः ।

(७) इतो मासद्वयाभ्यन्तरे प्रतिनिधीनां नामानि संख्या च तत्तद्देशीयसनातनधर्मसंस्थाभिः प्रेषणीयानि, येषां नाम्ना प्रवेशपत्रं यथावसरं प्रेष्येत ।

---

* श्रीविश्वनाथः शरणम् *

अखिलभारतवर्षीयब्राह्मणमहासम्मेलनम् ।

निमन्त्रणपत्रम् ।

विदितमिदं सर्वेषामखिलभारतवर्षीयब्राह्मणमहासम्मेलनस्य विचारसभा कार्तिककृष्णप्रतिपदामारभ्य, अर्थात् (२९-१०-२८) दिनमारभ्योपक्रमिष्यते । कार्यनिर्वाहकसमित्या कार्यप्रणालीनिश्चयप्रसंगेनेदमस्ति निर्धारितम्—यत् विचारसभायामेव तत्तत्पदे तत्तत्पण्डितानां मतानि संगृह्योपस्थितानां सर्वेषां धर्माचार्याणां हस्ते तानि सर्वाणि मतान्युपहर्तव्यानि, धर्माचार्यैश्चात्र निर्णयः सम्यग्विचार्य पूर्वोत्तरमतानां सयुक्तिकं संगृह्य च स्वमुखेनैव प्रकाशयिष्यते कार्तिककृष्णनवम्यां महासम्मेलनोपक्रम इति ।

महदिदं सौभाग्यम्-पूज्यपादश्रीमज्जगद्गुरु १००८ सङ्केश्वरशङ्कराचार्यचरणाः, पूज्यपादश्रीवल्लभसम्प्रदायप्रवर्तकश्रीनाथद्वाराधिपश्री १००८ गोवर्धनलालगोस्वामिचरणाः, पूज्यचरणश्रीयदुगिरियतिराजमठाधिपश्री१००८तिरुनारायणजीयरस्वामिचरणाः श्रीवैष्णवसम्प्रदायप्रवर्तकाः, अन्ये च बहव एव धर्माचार्याः स्वयमुपस्थाय सम्मेलनकार्यसहयोगदानेन सनातनधर्मसमाजं स्वीयशुभाशीर्वादेन चानुग्रहीष्यन्तीति ।

तत्र महासम्मेलनप्रथमदिन एव (६-११-२८) सर्वेषां धर्माचार्याणां विचारनिर्णयोद्घोषणं भविष्यति शुभाशीर्वादपुरःसरम् । द्वितीयदिने तृतीयदिने च (७-११-२८,८-११-२८) महाराजाधिराजश्रीदरभङ्गाधीश्वरश्री रामेश्वरसिंह बहादुरमहाशयानामाध्यक्ष्येणावशिष्टानि सनातनधर्मस-

द्घटनोपयोगितत्तादृशप्रस्तावादिकार्याणि सम्पत्स्यन्ते। अतः सविनयमिदं प्रार्थ्यते, प्रतिनिधिभिः पण्डितप्रवरैरन्यैश्च दर्शकमहोदयैराश्विनपूर्णिमादिने (२८-१०-२८) एव श्रीकाश्यामुपस्थितिः कर्तव्या तथा स्वयंसेवकद्वारा प्रबन्धकरणार्थं केन शकटेन कस्मिन्नवसरे श्रीकाश्यामुपस्थास्यत इति सूचनमचिरेणैव प्रेषणीयम्।

विचारसभा हि शास्त्रतत्त्वनिर्णयार्थैवेति निबन्धपर्यन्तधर्मग्रन्थप्रामाण्योरीकारेण नियामकानामाज्ञयैव प्रश्नकरणे उत्तरदाने वा सर्वेषामधिकारो नान्यथेति व्यवस्थया चैव भविष्यतीत्यपि सविनयं सूच्यते।

अन्ते सप्रश्रयं श्रीमतां सर्वेषां सनातनधर्माभिमानिनां सविधे विज्ञाप्यते-प्रतिनिधिरूपेण वा विचारसभायां महासम्मेलने वोभयत्रोपस्थितिसूचकस्य पत्रस्य प्रेषणेनानुग्रहः कर्तव्यः। विदितवेदितव्यानां श्रीमतां पुरतः किमधिकविलेखनेन-

इति विधेयतमः

१०७ नं० दशाश्वमेध घाट रोड, (बनारस) — श्रीपञ्चाननतर्करत्नभट्टाचार्यः। प्रबन्धकारिसभासभापतिः।

सूचनम्ः—

(१) प्रवेशत्रं विना सभायां केषामपि न प्रवेशः।

(२) प्रवेशपत्रं स्वयंसेवकद्वारा तत्तत्प्रतिनिधीनां दर्शकानां च श्रीकाश्यामेव दीयेत।

(३) विचारसभायां प्रश्नान् उत्तराणि च सर्वाणि यथायथं विलिख्य सभायामेवानुवाच्य हस्तात्तरमपि प्रष्टृसमाधात्रोः संगृह्येत।

(४) कार्तिककृष्णप्रतिपदमारभ्य प्रातरष्टमघटिकापर्यन्तं सायं तृतीयघटिकामारभ्य पञ्चमघटिकापर्यन्तं प्रत्यहं विचारसभा, कार्तिककृष्णसप्तम्यां विचारसभासमाप्तिश्च भविष्यति ।

(५) विचारसभायां प्रश्नावल्या एकैकप्रश्नसमालोचनानन्तरमेव भविष्यति । सत्यवसरेऽत्यावश्यकविषयान्तरविचारोऽपि भविष्यति ।

(६) कार्तिककृष्णसप्तमीमारभ्यैकादशीपर्यन्तं सहस्रचण्डीयागः ।

(७) कार्तिककृष्णांनवमीमारभ्य दिनत्रयं महासम्मेलनम् ।

(८) धर्माचार्याणां नगरप्रवेशादिसमयो सथासमयं सूच्येत ।

---

* श्रीविश्वनाथः शरणम् *

निमन्त्रण-पत्र ।

अखिलभारतवर्षीयब्राह्मणमहासम्मेलन

समस्त सनातनधर्मावलम्बीय महानुभावोंसे

सादर निवेदन ।

महाशय !

आगामी कार्तिक कृष्ण १ से लेकर १२ पर्य्यन्त तदनुसार ता० २९ अक्टोबर से ८ नवम्बर सन् १९२८ई० तक अखिलभारतवर्षीयब्राह्मणमहासम्मेलन श्रीकाशीपुरी में होनेवाला है, जिसमें कार्तिककृष्ण १ से सप्तमी

तक विवादास्पद विषयों के ऊपर विशिष्ट परिडतों का लेखबद्ध विचार होगा, जिसका निर्णय नवमी से ३ तीन दिन तक होनेवाले महासम्मेलन में प्रथम दिन श्रीजगद्गुरु श्री १००८ शङ्कराचार्य करवीर संकेश्वरपीठ तथा द्वारका,श्रीनाथद्वाराधीश श्रीगोस्वामि श्री १००८ श्रीगोवर्द्धनलालजी महाराज, यदुगिरियतिराजमठाधीश तिरुनारायणजीयरस्वामिमहाराज आदि समस्त धर्माचार्यों के श्रीमुखों से घोषित किया जायगा। द्वितीय तृतीय दिन सनातनधर्म की रक्षा तथा सनातन धर्मियों का सङ्घटन इत्यादि विशिष्ट२ उपयोगी विषयों के निर्णय करने के लिये महाराजाधिराजदरभङ्गानरेशश्रीरामेश्वरसिंहजी बहादुर सम्मेलनाध्यक्ष के पद को अलंकृत करेंगे।

इस शुभ अवसर पर सर्व जगद् के कल्याणार्थ सहस्रचण्डीयाग का भी ७सप्तमी से एकादशी तक विधिपूर्वक समारोह के साथ अनुष्ठान किया जायगा। देशदेशान्तर के कम से कम हजार गण्यमान्य विशिष्ट विद्वानों के सम्मिलित होने की सूचना पत्रद्वारा प्राप्त हुई है। इस समय आप लोगों की उपस्थिति अत्यन्त प्रार्थनीय है। आशा है आप लोग पधारकर सम्मेलनको सफल बनावेंगे।

ता० २२-१०-२८

आप का शुभचिंतक—
श्रीपञ्चाननतर्करत्न भट्टाचार्यः
प्रबन्धकारिणीसभा सभापति।

नोट---प्रवेश पत्रके विना सभामें किसीका प्रवेश नही हो सकेगा। सूचना प्राप्त होनेसे प्रतिनिधि तथा दर्शक पत्र स्वयंसेवकों द्वारा सेवामें भेज दिया जायगा।

॥ श्री विश्वनाथः शरणम् ॥

निमन्त्रण पत्र

अखिलभारतवर्षीयब्राह्मणमहासम्मेलन ।

समस्त सनातनधर्मी हिन्दुजनतासे विदित किया जाता है कि वर्तमान देशकाल की आवश्यकताको जानकर अखिल भारतीय विद्वान् ब्राह्मण मण्डलीने पवित्र काशीपुरीमें एकत्रित होकर विवादग्रस्त सामाजिक तथा धार्मिक विषयोंमें शास्त्रमर्यादानुसार विचार करना और सकल विद्वानोंके द्वारा निर्णीत मतसे हिन्दुजनताके कल्याण के लिये घोषित करना निश्चय किया है। तदनुसार आगामी कार्त्तिक कृष्ण १ से ११ अर्थात् ता० २८ अक्टूबर से ८ नवम्बर तक काशीकी नैमिषारण्य भूमि (मिसिर पोखरा) में विशाल मण्डप बनाकर महती सभा की जायगी। प्रथम सात दिन समग्र भारतसे एकत्रित विशिष्ट विद्वान् पंडितोंकी विचार सभा होगी, जिसके निर्णय महासम्मेलनके प्रथम दिन पूज्य आचार्योंके द्वारा जनताके सन्मुख प्रकट किया जायगा। इस धर्म कार्यमें उत्साह तथा आशीर्वाद प्रदानके लिये जगद्गुरु शङ्कराचार्य, शुद्धाद्वैतमठाधीश नाथद्वाराधिपति, विशिष्टाद्वैताचार्य यदुगिरियतिराजमठाधीश आदि जगद्गुरु आचार्यगण अपने अपने शुभागमनसे महासम्मेलनको कृतार्थ करेंगे।

श्रीमान् भारतधर्मदिवाकर महाराजाधिराज दरभङ्गाधिपति महोदय महासम्मेलन के द्वितीय तथा तृतीय दिन सभापति पदको अलंकृत करेंगे। प्रयोजन होनेपर और एक दिन भी उत्सव बढ़ाया जा सकेगा। अष्टमीके (ता० ५—११—२८) दिन श्रीवेद भगवान्की सवारी आचार्यों, राजन्यवर्ग और विद्वानोंके साथ पताका तोरण हाथी घोड़े सवार गाजे बाजे समेत अपूर्व धूमधामसे नगर प्रदक्षिणा करेगी। इस शुभ अवसर पर जगत् कल्याणार्थ सप्तमीसे एकादशी पर्यन्त वि-

धिपूर्वक सम्मेलन स्थानपर सहस्रचण्डी यागका अनुष्ठान होगा। आशा है सनातनधर्मप्रेमी समस्त सज्जन इस अनोंखे मौकेपर प्रतिदिन नियमित समय महासम्मेलन कार्य में सम्मिलित होकर इस पवित्र महान् उत्सवको सफल बनावेंगे। प्रवेशपत्र श्रीभारतधर्ममहामण्डल-कार्यालय तथा महासम्मेलन कार्यालयमें प्राप्त होगा। अथवा यथासमय सचना मिलने पर स्वयंसेवकों द्वारा भी पहुंचाया जा सकेगा।

निवेदक—

म० म० पं० पञ्चाननतर्करत्न भट्टाचार्य	स्वामी दयानन्दजी
म० म० पं० वामाचरण भट्टाचार्य	राजा मोतीचन्दजी (सी० आई० ई०)
म० म० पं० श्रीलक्ष्मणशास्त्री द्राविड	(रा० ब०) बाबू बटुकप्रसाद खत्री
म० म० पं० अनन्तकृष्णशास्त्री	(रा० ब०) कुं० नन्दलाल जी
म० म० पं० मुरलीधर झा	(रा० ब०) बाबू रामरतनदासजी
म० म० पं० प्रभुदत्तशास्त्री अग्निहोत्री	सेठ गौरीशङ्कर गोएनका
पं० रामभवनजी उपाध्याय	कुं० कवीन्द्रनारायण सिंह (एम्० एल० सी)
पं० भगवान्दत्तजी अग्निहोत्री	बाबू मङ्गलाप्रसाद सिंह
पं० देवकीनन्दनशास्त्री दर्शनालङ्कार	बाबू मूलचन्दजी खत्री
पं० रामयश त्रिपाठी	लालादामोदरदास खन्ना
पं० पूर्णचन्द्राचार्यजी	बाबू श्यामदासजी
पं० धर्मदत्तवेदशास्त्री	(रा० सा०) पं० रामचन्द्र नायक कालिया
पं० हरिनारायण तिवारी	(रा० सा०) पं माधोरामजी सण्ड
पं० गोपालभट्टभट्ट	मेहता पं० किशोरीलालजी
पं० विश्वेश्वरशास्त्री द्राविड	मेहता पं० मुरारीलालजी
पं० गणपतिशास्त्री मोकाटे	पं० जोशी दामोदर जी

पं० गोपालशास्त्री नेने
पं० जगन्नाथशास्त्री भारद्वाज (एम्० ए० एल० एल० बी०)
पं० नारायणशास्त्री खिस्ते
पं० शिवनाथजी झाडखण्डी एम्० ए०
पं० गङ्गाधरदीक्षित अग्निहोत्री
पं० गुलाब झा
पं० महादेव शास्त्रीजी
पं० विद्याविलास जी
पं० गौतमजी ज्योतिषी
पं० रणवीरदत्तजी सामवेदी
पं० विश्वेश्वरप्रसाद भट्टाचार्य
पं० मुरलीधरजी चौधरी
पं० धूमावतीप्रसाद पाण्डेय ।

कार्यक्रम ।

विचार सभा—२९ अक्टूबरसे ४ नवम्बर तक। प्रतिदिन प्रातः ८ से १० तक और अपराह्न ३ से ५ तक। स्थान—सनातनधर्म-विद्यालय, भुवेश्वर।

शोभा यात्रा—५ नवम्बर मध्याह्न १२ से सन्ध्याकाल तक। सवारी सम्मेलनके स्थान मिसिर पोखरेसे उठेगी गोदौलिया चौक मैदागिन कबीरचौरा लहुराबीर बेनिया होते हुए सभा भवनमें जायगी।

सम्मेलनोत्सव—६ नवम्बरसे ८ नवम्बर तक प्रतिदिन १२ बजेसे ५ बजे तक। प्रथम दिन आचार्यों द्वारा निर्णयका उद्घोष होगा। द्वितीय तृतीय दिन देश देशान्तरसे निमन्त्रित विद्वानोंके सुललित सारगर्भित वक्तृताएं भजनो-

पदेशक तथा गायकोंके मधुर सङ्गीत तथा आवश्यक मन्तव्यादि स्वीकार इत्यादि कार्य श्रीमान् महाराजाधिराज दरभङ्गानरेशके सभापतित्वमें होंगे ।

सहस्रचण्डी याग—सप्तमीसे एकादशी तक, महासम्मेलनके स्थानपर।

नोट—बाहरसे आने वाले सज्जन कृपया कन्टूनमेन्ट स्टेशन पर ही उतरें।

---

* श्रीविश्वनाथः शरणम् *

सूचना ।

अखिल भारतवर्षीयब्राह्मणमहासम्मेलनके तरफ से कातिक कृष्ण ८ सोमवार ता० ५-११-२८ के दिन के ठीक १२ बजे श्रीवेदभगवान्‌का जुलूस निकलेगा, जिसमें श्री १०८ जगद्गुरुशङ्कराचार्य श्री १०८ रामानुजाचार्य, श्री १०८ वल्लभाचार्य, महाराज काशीनरेश, महाराज दरभङ्गा आदि राजन्यवर्ग, स्थानीय रईसगण, तथा देश देशान्तर के प्रतिनिधि रूपसे आये हुए और स्थानीय समस्त पण्डितवृन्द आदि सनातनधर्मावलम्बी सज्जन शामिल होंगे, इस अवसर पर सब लोगों की उपस्थिति अवश्य प्रार्थनीय है ।

मन्त्री—

ब्राह्मणमहासम्मेलन

नोट—जुलूस सम्मेलन स्थानसे निकल कर गोदौलिया, चौक, मैदागिन, कबीरचौरा, लहुरावीर, बेनिया होते हुए सम्मेलन पण्डाल में पहुंचेगा ।

* श्रीविश्वनाथः शरणम् *

ब्राह्मणमहासम्मेलन-
विचारसभानियमाः ।

(१) धर्माचार्यनिर्वाचितास्तत्तद्देशीयाः पञ्च सप्त वा मध्यस्था भविष्यन्ति ।

(२) सुयोग्यः कश्चन नियामकोऽपि भविष्यति, यस्याज्ञया प्रश्नकरणे उत्तरकरणे वा निर्दिष्टानामेवाधिकारः ।

(३) प्रश्नोत्तरयोरुभयोरपि लिखितबद्धयोः प्रष्टृसमाधात्रोर्हस्ताक्षरेणसाकं सङ्कलनं भविष्यति ।

(४) वादिसङ्ख्यायाः प्रतिवादिसङ्ख्यायाश्च तत्तन्मतावलम्बिनां मध्यादेव निर्वाचितायाः साम्यमपेक्ष्यते ।

(५) निर्वाचितवादिप्रतिवादिव्यतिरेकेण कस्यापि भाषणे नाधिकारः ।

(६) वादिप्रतिवादिनां मध्ये एकस्यैव यस्य कस्यापि भाषणेऽधिकारः, अनेन साकमस्यैवेति तु न व्यवस्था ।

(७) निर्वाचितवादिप्रतिवादिव्यतिरेकेण तत्तन्मतावलम्बिनां दर्शकरूपेणैव प्रतिनिधीनामपि सतां स्वस्वमतावलम्बिनां निर्दिष्टस्थान एवोपवेशः समुचितः ।

(८) वैषयिकदर्शकानां पृथक् स्थानप्रबन्धः प्रवेशपत्रं च व्यवस्थाप्येत ।

(९) निबन्धपर्यन्तग्रन्थप्रामाण्यस्वीकारेण मीमांसकपद्धत्यैव विचारो भवितुमर्हति ।

१०—प्रश्नोत्तरप्रणाल्येव विचारावसरेऽवलम्बनीया, न व्याख्यानप्रणाली।

(१०) वादिप्रतिवादियुक्तीनां तारतम्यविवेचनेन धर्माचार्याणां सविधे स्वाशयोपहरणमेव मध्यस्थानां कार्यम् ।

(११) सयुक्तिसंग्रहं निर्णयोद्घोषणे धर्माचार्याणामेवाधिकारः ।
(१२) विना प्रवेशपत्रं न केषामपि विचारसभायां प्रवेशाधिकारः ।
(१३) प्रस्तुतविषयमतिरिच्य विषयान्तरवार्तापि न योग्या ।

इति विचारसभाव्यवस्थापकसभापतिः
प्रभुदत्तशास्त्री अग्निहोत्री ।
विचारसमिति मन्त्री
अनन्तकृष्णशास्त्री ।

विचारसभाकार्यप्रणाली ।

धर्माचार्यैः शुभाशीर्वादपुरःसरं विचार सभा समुद्घाट्येत । महासम्मेलनान्यतमसम्पादकेन समागतप्रबन्धसारांशोपस्थापनपूर्वकं विचारोपोद्घातः क्रियेत ।

एकैकविषयसमाप्त्यनन्तरं विषयान्तरस्य समालोचनं भविष्यति ।

प्रथमो विषयः—(क) स्त्रीणां पुंसां च विवाहकालसमालोचनव्यवस्थे ।
(ख) अवान्तरश्रेणीषु विवाहव्यवस्था ।

द्वितीयो विषयः—भागवतधर्मदीक्षास्वरूपाधिकार्यादिनिर्णयः ।

तृतीयो विषयः—पतितपरावर्तनम् ।

चतुर्थो विषयः—स्पर्शास्पर्शविचारः ।

पञ्चमो विषयः—व्रात्यसंस्कारः ।

षष्ठो विषयः—विधवाविवाहः ।

सप्तमो विषयः—चातुर्वर्ण्यव्यवस्था ।

स्थानम्—सनातनधर्मविद्यालयः, सूर्यकुण्डसमीपे । } दिनम्—कार्तिककृष्णप्रतिपदमारभ्य सप्तमीपर्यन्तम् ।

मध्याह्ने-१२ घटिकामारभ्य ५ घटिकान्तम् ।

प्रश्नावली—

१ः—स्त्रीणां पुंसां वा विवाहकालः कियदवधि कुत आरभ्य शास्त्रसम्मतः ?

२ः—तत्र वर्तमानपरिस्थित्यनुसारेण, शास्त्रानुसारेण च नियमनं कियदवधि योग्यम् ?

३ः—रजःप्रवृत्त्यनन्तरं विवाहस्य मुख्यत्वमुत गौणत्वमाहोस्वित आपत्कल्पत्वम् ?

४ः—ऋतुदर्शने वृषलीत्वबोधकानां वचनानां तात्पर्यं किम् ?

५ः—ब्राह्मणादिजातिषु अवान्तरश्रेणीनां परस्परं विवाहसम्बन्धः शास्त्रसम्मतो न वा ?

६ः—धर्मज्ञाः के वा कीदृशं वा धर्मपरिवर्तनं कर्तुमर्हन्ति ? किं सङ्कोचनाख्यम् (उत प्रवर्तनाख्यं धर्मपरिवर्तनम्) ।

७ः—विधवाविवाहो दम्पत्योर्विवाहमोक्षश्च शास्त्रदृष्ट्या योग्यः, उताविरुद्ध आहो निन्द्यः ?

८ः—अस्पृश्यानामस्पृश्यत्वं जातितो वा कर्मतो वा ?

९ः—म्लेच्छानामन्त्यजानां च स्पर्शविषये सभाप्रवेशविषये कूपोदकग्रहणविषये देवालयप्रवेशविषये चान्येभ्यः तारतम्यरक्षणं योग्यं न वा ? यदि योग्यं तदा कीदृशं तारतम्यं रक्षणीयम् ?

१०ः—भागवतधर्मदीक्षा जात्युत्कर्षप्रापिका वा न वा ?

११ः—यवनादिजातिः किं कर्मकृता, उत जन्मसिद्धा ?

१२ः—भागवतधर्मदीक्षायां जातिविशेषः प्रतिबन्धको वा न वा ?

१३ः—देवलस्मृतेः शूलपाण्यादिव्यवस्थानुसारेण प्रामाण्यमङ्गीकरणीयमुत न ?

१४:—कियदवधि म्लेच्छसंसर्गेण प्रायश्चित्तीयता ?

१५:—संवत्सरपर्य्यन्तं म्लेच्छसंसर्गिणां तदधिककालं यावत् म्लेच्छसंसर्गिणाञ्च प्रायश्चित्तविषये व्यवहार्यताविषये च किमैकरूप्यमुत वैरूप्यम् ?

१६:—व्रात्यसंस्कारः कियत्परम्परापर्यन्तं शास्त्रसिद्धः ?

१७:—जातिसामान्यमैहिककर्मकृतमव्यवस्थितमुत जन्मकृतं व्यवस्थितं च ?



विद्याविलास प्रेस, गोपालमन्दिर लेन, बनारस सिटी ।

भूमिका

मातामहमहाशैलं महस्तदपितामहम् ।
कारणं जगतां वन्दे कण्ठादुपरि वारणम् ॥

अखिलभारतवर्षीयब्राह्मणमहासम्मेलनप्रश्नावल्याः प्रथमद्वितीयतृतीयतुरीयपञ्चमषष्ठप्रष्ठप्रश्नानामुत्तराणि तत्तादृशां पण्डितवराणां श्रीमतां उपस्थितानां पुरतः सविनयं प्रथममुपहरामि ।

षण्णामपि प्रश्नोत्तराणां विशेषतः परस्परसम्बन्धो वर्तते इति प्रथमद्वितीयविषयसमालोचने विशेषतस्तत्साहाय्यं स्यादिति पिष्टपेषणमिदम् ।

महासम्मेलनं हि शास्त्ररक्षणेनापि समाजरक्षणोपायानालोचयितुमेव, सनातनधर्मावलम्बिनां संघटनार्थमेव च संघटितमिति सर्वसाधारणं धनमिति "परैस्तु कलहे प्राप्ते वयं पञ्चोत्तरं शत"मिति न्यायानुसारं सत्यपि मतभेदे मुक्त्यादिषूपास्यस्वरूपादिषु च तत्तद्धर्माचार्याणां विशिष्टविशिष्टानामुपस्थित्या सत्यं किमपि विशिष्टं प्रयोजनमादधीत, यदि सनातनधर्मावलम्बिनः सर्वेऽपि पण्डितप्रवराः वैयक्तिकविद्वेषादिपरित्यागेन परस्परं सुहृद्भावावलम्बेन च सम्यक् विचार्य कर्तव्यजातं निर्णेष्यन्तीति वस्तुस्थितिकथनमिदम् । यतः—

तत्वविनिर्णयार्थमेवेयं विचारसभा, न तु जयपराजयादिव्यवस्थापनार्थं बलाबलपरीक्षार्थं वेति ।

तुरीयप्रश्नान्तोत्तराणि श्रीमतां पुरतः षष्ठप्रश्नोत्तरेण साकं, पञ्चमप्रश्नोत्तरेण साकं प्रथमसमालोचनीयानि निर्दिष्टानीति

जानन्त्येव श्रीमन्तः सर्वेऽपि कार्यप्रणालीविचारसभानियमादर्शिनः।

स्त्रीणां विवाहकालसमालोचनविषये श्रीमतां पुरत इदानीमेतावन्तो मतभेदा उपस्थिताः।

(१) बाल्यकालमारभ्यैव विवाहः शास्त्रसम्मतः, एवमपि अष्टमवयसः पूर्वं विवाहनिषेधनियमनमत्यावश्यकमित्येकं मतम्। सर्ववर्णसाधारणमिदं—

सप्तसंवत्सरादूर्ध्वं विवाहः सार्ववर्णिकः।

इति वचनेन।

द्वितीयं तु मतं अष्टवयसः पूर्वं विवाहनिषेधनियमनस्थाने दशमवयसः पूर्वमिति परिष्करणेन प्रथममतस्यैव परिष्कृतं रूपान्तरम्।

अपरोऽयं विशेषः केषांचन मतेन—अष्टमवयसः पूर्वं विवाहनिषेधनियमनमिदं ब्राह्मणविषये, क्षत्रियादीनां तु एकादशवयसः पूर्वमेव विवाह इति नियमनं योग्यमिति। अपरं तु मतं द्वादशवयसः पूर्वं विवाहनिषेधनियमनं योग्यमिति पूर्वावधिनिष्कर्षः।

तत्रोपस्थापितेषु सार्धशताधिकप्रबन्धेषु—(१२) तिरुपतिविद्यालयपण्डिताः, (१७) श्रीवाणीशझामहोदयाः, (३२) श्रीकृष्णकुमारशास्त्रिणः, (३५) ब्रह्मप्रान्तीयब्राह्मणसभापण्डिताः, (४०) जयपुर श्रीसीतारामशास्त्रिप्रभृतयः, (४८) श्रीयुक्तललितकुमारसांख्यवेदतीर्थमहाशयाः, (४४) जलासुवादिब्राह्मणपण्डिताः, (५४) श्रीनाथचन्द्रकाव्यतीर्थादयः, (४६) सुरेन्द्रलालस्मृतितीर्थाः, (५३) फरीदपुरविद्वत्समितिश्च द्वितीयमतवलम्बन्ते।

तृतीयमतावलम्बिनस्तु—(११६) श्रीनरहरिवेंकटेशशास्त्रिणः, (१२१) श्रीबलवन्त जोशीमहोदयाश्च।

अन्ये तु सर्वे प्रथममतावलम्बिन इति नेदं प्रबन्धसारदर्शिनां तिरोहितम्।

परमावधिविषये तु—

केचन मन्यन्ते द्वादशवयसः पूर्वमेवर्तुदर्शने तददर्शने वा विवाहो योग्यः, न तु तदनन्तरम्, तदनन्तरं तु प्रायश्चित्तीयतेति।

इतरे तु—रजोदर्शनात्पूर्वं षोडशवयःपर्यन्तमपि विवाहो योग्य इति।

अपरे तु विंशतिवत्सरपर्यन्तं तदधिकवत्सरपर्यन्तं वा रजोदर्शनेऽपि विवाहो योग्य इति।

तत्रापि प्रथममतावलम्बिनां पीयूषधारादिधृतवचनानुसारेणान्तःपुष्पवत्त्वमपि दोषायेति मतम्, द्वितीयमतावलम्बिनां तु—

क्षेत्रज्ञा पञ्चदशभिः षोडशे चाम्बिका स्मृता।
एवं क्रमेण संपूज्या यावत्पुष्पं न जायते॥

इति वचनानुसारेण केषांचन षोडशवयस्येव पुष्पवत्त्वसम्भव इति।

सर्वथा तु मतद्वयेऽपि ऋतुदर्शनतः पूर्वं विवाह इत्यत्रैकमत्यमेव। इयान् विशेषः—रजोदर्शनानन्तरं वृषलीत्यस्य प्रायश्चित्तेनापि निवृत्तिरिति केषांचन मतम्, केषांचन तु आपत्कल्पतयाऽभ्यनुज्ञानात् तन्निवृत्तिरपि सम्भवतीति।

ये तु रजोनन्तरविवाहोऽपि योग्य इति वदन्ति, तेऽहि प्रायश्चित्तं नाननुष्ठेयं मन्यन्ते। संभाव्यते एवेयान् विशेषः—यत् यावत्प्रायश्चित्तमव्यवहार्यतेति व्यवहार्यतेति च। अत्र द्वितीयमतावलम्बिनोऽव्यवहार्यतापक्षावलम्बिनः, तृतीममतावलम्बिनस्तु व्यवहार्यतापक्षावलम्बिन इति प्रतिभाति।

तत्र केचन क्षत्रियादीनां गान्धर्वविवाहेन तद्योग्यतावादिनः,-केचित्तु सर्वेषां सर्वविवाहसाधारण्येन तद्योग्यतावादिनः। तत्र-

र्तुमती विवाहयोग्यतावादिनोऽधः प्रथमं निर्दिश्यन्ते।

तत्रापि केचित् वर्षत्रयपर्यन्तं तद्योग्यतावादिनः।

तत्र द्वितीयद्वितीयमतावलम्बिनः—

(४४) श्रीगणेशलालसारस्वताः। :(४५) रमानाथविद्यालङ्काराः।

द्वितीयप्रथममतावलम्बिनस्तु—

(११७) वि० एल् वेङ्कटप्पशास्त्रिणः, (१२६) श्रीकेशव लक्ष्मण दफ्तरी महोदयाः (१३०) श्रीरामचन्द्रशास्त्रिवेदान्तविशारद-काव्यव्याकरणशिरोमणयः।

प्रथममतालम्बिनस्तु—

(३६) तेन्नालिराममूर्तिशास्त्रिणः (११०) श्रीउमामहेश्वरशास्त्रिणः, (११) चिरुकुलपेद्दवेङ्कटरायशास्त्रिणः (१४५) वाराणसीविद्वत्परिषत्। अन्ये तु सर्वे द्विजेतरसर्वसाधारण्येन रजोनन्तरविवाहस्यापत्कल्पत्ववादिन एव।

(७६) श्रीमोदनाथविचाररत्नमहोदयास्तु—

अविवाहिता तु या कन्या पुष्पयुक्ता भवेद्यदि।
चान्द्रायणं व्रतं कुर्यात् सर्ववर्णेष्वयं विधिः॥

इति वचनात्सर्वसाधारण्येन रजोनन्तरविवाहस्यापत्कल्पत्वं प्रतिपादयन्ति।

प्रायश्चित्तानन्तरमपि तस्याः तत्पुत्रादेश्च पृथक् संस्थैव युक्तेति वादिनो ह्यत्र बहव एव वर्तन्ते।

पुंसां विवाहकालनियमनं तु अष्टादशमारभ्येति केचन, केचन षोडशमारभ्येति, केचनैकविंशतिवय आरभ्येति, प्रायेण सर्वे पञ्चाशद्वयसोऽधिकं विवाहनिषेधनियमनमेव योग्यं मन्यन्ते।

अथर्तुमतीविवाहोऽपि योग्य इति वादिनः-(११७)वि० एल० वेंकटप्पशास्त्रिणः (१२१) श्रीकेशव लक्ष्मण दफ्तरी महोदयास्तु

कालदेशपरिस्थित्यनुसारेण शास्त्रादिपरिवर्त्तने सर्वेषामधिकारवादिन इति भवन्तो जानन्त्येव ।

इदमेवात्र समालोचनीयम्—यत् धर्मप्रवर्त्तने सर्वेषां धर्मज्ञानामधिकार इति वदन्तः (१) श्रीसूर्यनारायणशास्त्रिणः, (१०१) मैमनसिंहहिन्दुसभापतयः (१२१) श्रीकेशव बलवन्त जोशीमहोदयाः परं परिवर्तनादौ दफ्तरीमहोदयादिमतावलम्बिनोपि—रजोऽनन्तरविवाहं परं न योग्यं मन्यन्ते । अन्ये तु रजोऽनन्तरविवाहयोग्यतावादिनो न धर्मपरिवर्तनेऽधिकारं मन्यन्ते ।

तत्र केचित् , मन्वादीनामेव प्रवर्त्तने निवर्त्तने चाधिकारः, इदानीन्तनानां तु शक्तिपर्यालोचनेन निवर्तनमात्रेऽधिकारः इति, परे तु इदानींतनानां तु शास्त्रार्थनिर्णय एव पारिषद इवाधिकार इति वदन्ति । सर्वमिदं श्रीमतां पुरतो विशदमुपहृतमिति न विस्तरो विशेषतोऽपेक्ष्यते इति विश्वसिमः ।

केचित् अवान्तरश्रेणीनियमस्तु शास्त्रासिद्धः, एवमप्याचारसिद्धत्वात् परिपालनीय एवेति, अन्ये तु बहवः शास्त्रसिद्ध एवायमिति न कथमपि परिवर्त्त्य इति मन्यन्ते ।
३०, ४२, ५१, ५६, ६०, ६१, ७५, ८०, १०१, ११७, १२८, १३०, १३२, १३७, १३८, १४३, १४५, संख्याकाः पण्डिताः नियमपरिवर्तनं शास्त्रासिद्धत्वात् योग्यं मन्यन्ते ।

तत्र केचन समानाचारास्ववान्तरश्रेणीषु नियमपरित्यागो योग्य इति वदन्ति, केचित्तु तत्रापि न योग्य इत्यपि सर्वमत्र विशदम् ।

सर्वं चेदं श्रीमतां पण्डितप्रवराणां सानुग्रहेण प्रेमपूर्वकेण तत्त्वविनिर्णयेच्छामूलकेन वैयक्तिकभावविशेषादिसत्त्वे तदनुप-

योगेन च विचारेण विना कथमपि न निर्णीतं स्यादिति सप्रश्रयं महासम्मेलनप्रबन्धकारिसभापक्षेणेदं प्रार्थ्यते, यत् सदयमस्मदनुरोधस्य सफलीकरणेन कृतार्थीकरणीयाः सर्वेपि सनातनधर्मावलम्बिन इति । इतः परं श्रीमन्तः पण्डितप्रवरा एव प्रमाणम् । इति ।

कार्तिक कृष्ण १ सोमवारे
सम्वत् १९८५

विधेयतमः
अनन्तकृष्णशास्त्री
सम्पादकः ।



श्री १०८ प्रतिवादि भयङ्कर श्रीमदनन्ताचार्य्य पादाः

॥ श्रीविश्वेश्वरः शरणम् ॥

अखिलभारतवर्षीय—

ब्राह्मणमहासम्मेलने

समालोचनीय-प्रश्नावलीनामुत्तराणि ।

——:**:०:**:——

(१) प्रश्नः—स्त्रीणां पुंसां वा विवाहकालः कियदवधि कुत आरभ्य शास्त्रसम्मतः ?

(२) प्र०—तत्र वर्तमानपरिस्थित्यनुसारेण, शास्त्रानुसारेण च नियमनं कियदवधि योग्यम् ?

(३) प्र०—रजःप्रवृत्त्यनन्तरं विवाहस्य मुख्यत्वमुत गौणत्वमाहोस्वित् आपत्कल्पत्वम् ?

(४) प्र०—ऋतुदर्शने वृषलीत्वबोधकानां वचनानां तात्पर्यं किम् ?

(१) उत्तरम्—श्रीसूर्यनारायणशर्मणां व्याख्यानवाचस्पतीनाम् (जयपुरीयसंस्कृतपाठशालातः ।)

विवाहकालनियमे विवाहस्य केवलमैहिकफलत्वाभावात् शास्त्रमूलत्वस्यैव योग्यत्वात् शास्त्रानुसारेणैव योग्यत्वं न त्वायुर्वेदाद्यनुसारेण । धर्मशास्त्रेण च विवाहः "षडब्दमध्ये नोद्वाह्या" इति वचनात् षडब्दमध्ये सर्वथा निषिद्धः । एवं सप्तसंवत्सरादूर्ध्वमेव विवाहः सार्ववर्णिक इति विवाहस्य निर्दिष्टत्वात् सप्तमे वयस्यपि नात्यन्तशिष्टसम्मतत्वम् । तथा चाऽष्टमवयसः पूर्वं विवाहनिषेधनियमनमतीव योग्यम् । अष्टमवयस आरभ्य विवाहकालो दशमपर्यन्तं काम्यो न नित्यः, दशम-

वयसोऽनन्तरं रजस्वलात्ववचनं गौर्यादिप्रशंसार्थम्, तथा चैकादशेऽपि वयसि विवाहो योग्य एव. द्वादशं वयस्तु परोऽवधिः। अत्र पराशरादिवचनानि मूलानि। तदतिक्रमस्तु सर्वथा न योग्यः। तथा चाऽष्टमनवमदशमवयस्सु बहूनां दृष्ट्या फलाम्नानात् प्रशस्तता, एकादशं तु वयो न प्रशस्तं न वा निन्दितम्। केषांचन मते तु दशमवयसि नग्निकात्वप्रतिपादनाद्दशमं वयोऽपि नग्निकादानस्य गर्हितत्वाज्जघन्यम्, एकादशं न तन्मतदृष्ट्याऽपि शास्त्रानुमतम्। सर्वथा तु रजोदर्शनात्प्राक् कन्यकादानमावश्यकम्। सति चैवं द्वादशेऽब्देऽस्य परावधेरेव बाल्यवैधव्यादिदुःखपरिहारार्थं लोकहितदृष्ट्या शास्त्राविरोधाच्च विवाहकालत्वव्यवस्थापनं योग्यम्। तत्रापि वरालाभादौ त्रयोदशं वयोऽपि ग्रहीतुं शक्यते। पुंसां तु—चतुर्विंशवर्षे विवाहः प्रथमकल्पः, विंशे मध्यमः, अष्टादशे गौणः, वर्त्तमानपरिस्थित्यनुसारेणाऽष्टादशात्पूर्वं पुंविवाहो वर्जनीयः। शक्तौ सत्यां पुत्रवतोपि चत्वारिंशत्पर्यन्तं विधुरस्य पुंसो विवाहो योग्यः, शक्तौ सन्तानाभावे तु पञ्चाशद्वयःपर्यन्तमपि विवाहो योग्यः, रजोनन्तरमपि स्त्रीणां विवाहः परमापत्कल्पतयाऽभ्यनुज्ञात एव। वृषलीत्वबोधकानां तु वचनानां तद्विवहनस्य प्रत्यवायहेतुतायामेव तात्पर्यम्।

(२) उ०—श्रीरामदेवत्रिपाठिनाम्। (बहवाराज "आरा")

प्रथमद्वितीयतृतीयचतुर्थप्रश्नानाम् न समालोचनमेतैर्महाशयैरुपक्षिप्तम्।

(३) उ०—श्रीगणेशदत्तनैय्यायिकानाम् (शेखावाटी।)

शास्त्रानुसारेणाऽष्टमवय आरभ्य दशमवयःपर्यन्तम्। एकादशेपि वयसि परिस्थित्यनुसारेण विवाहव्यवस्था न दोषाय। द्वादशवर्षे तु रजस्वलैव सर्वापि। पीयूषधारायां "वर्षद्वादशकादूर्ध्वं यदि पुष्प

बहिर्न हि। अन्तः पुष्पं भवत्येव पनसोदुम्बरादिवत्।" इति वचनं दृश्यते। तथा च द्वादशवयसोऽनन्तरं रजस्वलाविवाह एव स्यात्। स च विना प्रायश्चित्तं क्रियमाणः पित्रादीनां निन्दाप्रयोजकः, कृते प्रायश्चित्ते तु सोऽपि न दोषाय। पुंसां तु सप्तदशवय आरभ्य भवितुमर्हति विवाहो नोत्तरावधिरेतैर्निर्दिष्टः।

(४) उ०—श्रीभगवान् शास्त्रिणाम्।

पुंसामुपनयनकालस्यैव स्त्रीणां विवाहकालत्वादनुपनयन इवाऽविवाहे ऋतुमत्या अपि कन्यायाः सर्वज्ञनारायणादिभिर्व्रात्यताया उक्तत्वात् अष्टवर्षमारभ्यर्तुकालपर्यन्तं स्त्रीणां विवाहकालः। विवाहात् प्रागृतुमत्याश्चण्डालीत्वं "व्रात्यया सह संयोगे चाण्डाल्या तावदेव तु" इत्यादिमन्वादिवचनानुसारेण चतुर्वर्गचिन्तामणावपि प्रतिपादितम्। मुहूर्त्तमार्तण्डादिषु चतुर्थवत्सरवय आरभ्य दशमवयःपर्यन्तमेव विवाहयोग्यतेत्युक्तम्। तत्परिवर्तनं न कथमपि युक्तम्। पुरुषविषये किमपि नोक्तम्।

(५) उ०—वैदिकसमाज पालघाट, मदुरा धर्मशास्त्रसभा, कुम्भघोण-सनातनधर्मसभा, मायूरब्राह्मणसमाज, त्रिशिरःपुरब्राह्मण-समाज, चिदम्बर विद्यालयपण्डितवर्गादीनां प्रायेण सार्धसहस्र-जनानाम्।

शास्त्रदृष्ट्याऽति बाल्यकालमारभ्यापि विवाहो न निन्द्य ऋतुपर्यन्तम्। तथा च न शास्त्रतः पूर्वविधिविशेषे निन्दा गम्यते, तथापि परिस्थित्यनुसारेण शास्त्रानुसारेण चाऽष्टमवर्षात्पूर्वं विवाहनिषेधनियमनं स्त्रीणां, पुंसां षोडशवयसः पूर्वं विवाहनिषेधनियमनं स्त्रीणामृत्वनन्तरं पुंसां पञ्चाशद्वर्षवयसोऽनन्तरं विवाहनिषेधनियमनं च योग्यम्। सर्वेषामेतेषामपि कल्पतयर्तुमतीविवाहोपि सम्मतः।

(६) उ०—तिरुवाड़ी विद्यालयपण्डितानां सर्वेषाम्।

सर्वेषु विषयेषु पालघाट वैदिकसमाजसिद्धान्तेनैकमता एव।

इयान् विशेषः—आपत्कल्पतयाऽपि रजोनन्तरं विवाहो न स्त्रीणां सम्भवतीति ते मन्यन्ते ।

(७) उ०—मायूरशिवकृष्णशास्त्रिणाम् ।

एतेऽपि पालघाटवैदिकसमाजसिद्धान्तेनैकमता एव, इयान् विशेषः—कालस्थित्यनुसारेण चत्वारिंशद्वयसोऽनन्तरं पुंसां विवाहनिराकरणनियमनमावश्यकं मन्यन्ते । अपरोऽयं विशेषः, यदापत्कल्पतयापि ऋत्वनन्तरं विवाहो न ब्राह्मणानां, किन्तु शूद्राणामेव । वृषलीत्ववर्णनाभिप्रायश्च विना प्रायश्चित्तमव्यवहार्यतादावेव सर्वेषां मते ।

(८) उ०—विजयनगरपण्डितसमाजस्य ।

स्त्रीणां सप्तमवय आरभ्य विवाहकालः, पुरुषाणामष्टादशवयसः, स्त्रीणामृतोः प्राक्, पुरुषाणां पञ्चादशद्वयसः प्राक् विवाहयोग्यता, ऋत्वरनन्तरं स्त्रीणामापत्कल्पतया विवाहोऽभ्यनुज्ञातः शास्त्रेषु । परिस्थितिमनुसृत्य दशमवयस आरभ्य स्त्रीणां चत्वारिंशद्वयः पर्यन्तमिति पुंसां विवाहनियमनं योग्यम् ।

(९) उ०—नल्लान्चक्रवर्त्तिनाम् ।

सप्तमवयस आरभ्य वर्षद्वयं प्रशस्तः, तदनन्तरं वर्षद्वयं गौण एकादशेऽधमः, द्वादशे तु प्रायश्चित्तीयता, ऋत्वनन्तरं विवाहस्तु स्त्रीणां न योग्य एवेति वदन्ति । पुंसां विषये किमपि न वदन्ति ।

(१०) उ०—चित्पुरीपाठशालाध्यापकानाम् ।

गर्भाष्टमात् द्वादशवयः पर्यन्तं विवाहकालः स्त्रीणाम् । पुंसां तु पञ्चाशद्वयः पर्यन्तं विवाहकालः ।

(११) उ०—एम्० बी० सुब्रह्मण्यार्यादीनाम् ।

स्त्रीणां विवाहकाले न पूर्वावधिः । द्विवर्षात्प्रागपि विवाहे खननिषेधश्रवणात्, पुंसामष्टमवयस्युपनयनानन्तरमेकशाखाध्ययनकालानन्तरमेव विवाहयोग्यता, परिस्थित्यनुसारेण स्त्रीणामे-

कादशवयसः पूर्वं विवाहनिषेधो योग्यः। पुरुषविषये किमपि नोक्तम्।

(१२) उ०—तिरुपतिविद्यालयपण्डितानां सर्वेषाम्।

ते पालघाटवैदिकसमाजमतमेवानुवर्तन्ते। प्रायेण स्त्रीणां पुंसां विवाहविषये इयान् विशेषः—यद् दशवर्षमारभ्येति स्त्रीणां परं नियमनं पुंसां चाष्टादशवयस आरभ्येति नियमनं च योग्यं मन्यन्ते। रजोऽनन्तरविवाहस्त्वापत्कल्प एव, सोऽपि न संस्काररूपः, अर्थाद् तदनन्तरमूढायास्तत्पतेर्वा न कर्माधिकार इति चाभिप्रयन्ति। एतेषां मायूरशिवरामकृष्णशास्त्रिणां चास्मिन्नन्तिमेंऽशे साम्यमस्ति।

(१३) उ०—रामपुर राजपण्डित श्रीरामरत्न ओझा महाशयानाम्।

स्त्रीणामष्टवर्षमारभ्यर्तुकालपर्यन्तं षोडशवयस्यपि विवाहो भवितुमर्हति, एकादशवयस आरभ्येति नियमनं तु योग्यम्। पुंसां सप्तदशवयस आरभ्याष्टाचत्वारिंशद्वयःपर्यन्तं विवाहो योग्यः।

(१४) उ०—मल्लादि श्रीरामकृष्णसोमयाजि श्रीराघवशास्त्रि श्रीवेङ्कटविश्वनाथशर्मणाम्।

अष्टमवयस आरभ्यर्तुपर्यन्तं स्त्रीणां षोडशवय आरभ्य पञ्चाशद्वयःपर्यन्तं पुंसां च विवाहकालनियमनं शास्त्रपरिस्थित्युभयानुसारि भवति। रजस्वलाविवाहस्तु सर्वथा निन्द्यः।

(१५) उ०—मारवाड़ीब्राह्मणमहासम्मेलनसभापतीनाम्।

स्त्रीणामष्टमवयसः पूर्वं रजोदर्शनानन्तरं च विवाहो न युक्तः। पुंविषये तु किमपि नोक्तम्।

(१६) उ०—श्रीवागीश झा (मिथिला) महोदयनाम्।

दशवर्षमारभ्य स्त्रीणां षोडशवय आरभ्य पुंसां च विवाहकालः ऋत्वनन्तरं विवाहो गौणः, पुंविषये किमपि नोक्तम्।

(१७) उ०—कुरुगंटिवेङ्कटरामशास्त्रिणां तेनालीवासिनाम्।

अष्टमवयस आरभ्य द्वादशवयःपर्यन्तं स्त्रीणां पुंसां च षोडशवय

आरभ्य चतुश्चत्वारिंशद्वयःपर्यन्तं विवाहो योग्यः, न तु स्त्रीणां, ततः पूर्वं पुंसां तत उत्तरं च स योग्यः। रजोऽनन्तरं विवाहस्तु नापत्कल्पोऽपि, तस्या ऊढायाः शूद्रातुल्यत्वेन तत्पुत्रस्य न दायाद्यधिकारितापीति बोधनमेव वृषलीत्ववचनेनावगम्यते।

(१६) उ०—श्रीमल्लय्याशास्त्रिणाम्।

विवादस्य दानसप्तपदीसमावेशनादिरूपस्य दाने द्वितीयादिवयसोऽपि योग्यता, समावेशनादौ तु ऋत्वनन्तरमपि स योग्य इति। आपस्तम्बादिमते तु ऋत्वनन्तरमेव विवाहः समावेशनाङ्गविशिष्टः। गृह्यासंग्रहमते तु ऋतोः प्राक् वत्सरात् प्रागेव विवाहो युक्त इति मतम्। पुंविषये तु किमपि नोक्तम्।

(२०) उ०—परलाकमडिवैदिकसमाजस्य।

उत्कलनिबन्धकालसाराद्यनुसारेण स्त्रीणां जन्मावधि एकादशवयःपर्यन्तं विवाहयोग्यतावगम्यते। परन्तु शास्त्रपरिस्थित्युभयपर्यालोचने नवमवत्सरमारभ्यर्तुकालपर्यन्तं विवाहनियमनं योग्यम्। रजोनन्तरविवाहोऽपि स्त्रीणां योग्य एव, परंतु निबन्धाचाराद्यनुसारेण ब्राह्मणेतरविषयत्वमेव तस्य, ब्राह्मणानां त्वापत्कल्प एव।

(२१)–शामलकोटार्यमतसंघप्रतिनिधि श्रीसूर्यनारायणशास्त्रिणाम्।

स्त्रीणां सप्तमवय आरभ्य विवाहकालो रजोदर्शनतः पूर्वम्। पुरुषाणां सप्तदशवय आरभ्य पञ्चाशद्वयःपर्यन्तं विवाहयोग्यता, न तु ततः पूर्वमुत्तरं वा। रजस्वलाविवाहस्तु कलौ गान्धर्वादिविवाहकालस्य निषिद्धत्वादापत्कल्प एव।

(२२) उ०—शोलवन्दानयज्ञदीक्षितानाम्।

अष्टमवयस आरभ्य द्वादशवयःपर्यन्तं स्त्रीणां विवाहकालः। तदनन्तरं तु विवाहो रजोदर्शनानन्तरमापत्कल्पः।

(२३) उ०—हैद्राबादसनातनधर्मसंस्थापण्डितानाम्।

"द्वितीयमायुषो भागं कृतदारो गृहे वसेत्"इति वचनात् पञ्चवि-

शतिवर्षमारभ्य पुंसां विवाहकालः, ततः पूर्वं विवाहकरणं तु दशवर्षाद्योग्यमेव । स्त्रीणां तु रजोदर्शनानन्तरमापत्कल्प एव विवाहः ।

(२४) उ०—काम्पिलुसुब्बय्यशास्त्रिणाम् ।

ब्राह्मणकन्यानामष्टमवयस आरभ्य दशमवयःपर्यन्तं मुख्यकल्पः, तदनन्तरं प्रथमर्तुदर्शपनपर्यन्तं गौणः, तदनन्तरमापत्कल्पो निन्द्य इति यावत् । क्षत्रियकन्यानां तु रजोदर्शनपर्यन्तं मुख्यः कल्पः, तदनन्तरमृतुत्रयपर्यन्तं गौणः, तत आपत्कल्पः स्वयंवरः । पुंसां तु षोडशवयसः पूर्वं पञ्चाशद्वत्सरानन्तरं च विवाहो योग्यः, तन्मध्येऽपि न नियमः, विवाहस्य पुरुषेषु काम्यत्वम् । रजस्वलाया आपत्कल्पतयोढाया न धर्मकार्येऽधिकारः ।

(२५) उ०—मधुरारामसुब्रह्मण्यशास्त्रिणाम् ।

बाल्यमारभ्य विवाहस्य शास्त्रसम्मतत्वेऽपि अष्टमवयसः पूर्वं स्त्रीणां विवाहश्च योग्यः । ब्राह्मणानां द्वादशवयसोऽनन्तरमृतोः प्रागपि विवाह आपत्कल्प एव । रजोनन्तरं तु विवाहिताया न धर्मोपयोगितेति वदन्ति ।

(२६) उ०—सीयालिसुब्रह्मण्यशास्त्रिणाम् ।

स्त्रीणामष्टमवयः, पुंसामेकोनविंशतिमारभ्य च विवाहनियमनं योग्यम् । रजोनन्तरं विवाहकरणं साहसकार्यमेव, नात्रापत्कल्पत्वमपि ।

(२७) उ०—पीठापुरस्थलक्ष्मीनारायणशास्त्रिणाम् ।

पुंसां षोडशवय आरभ्य स्त्रीणामष्टमवय आरभ्यर्तुदर्शनपर्यन्तं च विवाहो योग्यः, अष्टमवयसः पूर्वं रजोनन्तरं च स्त्रीणां विवाहो न योग्यः । तत्रापि रजोऽनन्तरं स्त्रीणां विवाहो नापत्कल्पोऽप्यभ्यनुज्ञायते ब्राह्मणविषये शास्त्रेषु ।

(२८) उ०—श्रीरमापतिमिश्रशर्म राजपतिमिश्र भिकुदेव जोशीप्रभृतीनाम्।

स्त्रीणां रजोदर्शनतः प्राक् पुंसां गोदानानन्तरं यथासौकर्यं विवाहसमयः, नात्र नियमनं परिस्थित्यनुसारेण सम्भवति. परिस्थितीनामनेकरूप्यात्, रजोनन्तरविवाहस्तु न मुख्यो न वा गौणो न वापत्कल्पः। तद्विवाहे तु सन्ततीनामप्राशस्त्यं भवति।

(२९) उ०—नेपालस्थार्यालवीरेन्द्रकेसरिशर्मणाम्।

अष्टवयस आरभ्य स्त्रीणां पुंसां षोडशवयस आरभ्य विवाहो योग्यः, ऋतोः प्राक्। ऋत्वनन्तरं त्वापत्कल्पतया प्रायश्चित्तपूर्वकं विवाहोऽभ्यनुज्ञायते।

(३०) उ०—श्रीवेणीमाधवशास्त्रिणाम् (धारवाड।)

सप्तमाद्वयसो विवाहोपक्रमनियमनं स्त्रीणां, दशवर्षानन्तरं तु न योग्यम्। पुंसां षोडशवर्षादारभ्य पञ्चाशद्वयःपर्यन्तम्। परिस्थित्यनुसारेणाप्यनृतुमत्या एव षोडशवयःपर्यन्तमपि विवाहनियमो योग्यः। रजोनन्तराविवाहः सर्वथा निन्द्यः। तदनन्तरमूढा तु न धर्माधिकारिणी।

(३१) उ०—नागपुरब्राह्मणसभापण्डितानां म० म० पं० सदाशिवशास्त्रि म० म० पं० केशवशास्त्रि प्रभृतीनाम्।

स्त्रीणामष्टमवय आरभ्यर्तुकालपर्यन्तं विवाहो योग्यः। पुंसां विवाहकालावधिस्तु न कुत्रापि शास्त्रे दृश्यते। तथापि शिष्टाचारमनुसृत्याऽष्टादशवय आरभ्य पञ्चाशत्तमवयःपर्यन्तम्। ऋत्वनन्तरविवाहस्तु आपत्कल्प एव। ऋतोः प्राक् द्वादशवयसि कृतश्चेदपि सर्वेषां सम्मतो भवेदिति।

(३२) उ०—श्रीगणेशलाल सारस्वतानाम् (आगरा)।

स्त्रीणां विवाहस्य केवलं प्रजोत्पत्त्यर्थत्वात् ऋत्वनन्तरमेव सम्भवाद्गर्भधारणशक्तिवैकल्यपरिहारार्थमृतोः प्रागेव विवाहः, एवंश्मश्रूद्गमानन्तरमेव पुंसां च विवाहो युक्तः। ऋत्वनन्तरं वृषलीत्ववचन-

वत् "काममामरणा"दित्यपि रुच्या न। ऋतुमतीविवाहोऽपि वर्ष-त्रयपर्यन्तं योग्य इति वदन्ति ।

(३३) उ०—श्रीकृष्णकुमारशास्त्रिणाम् (आरा)।

स्त्रीणां शास्त्रदृष्ट्याऽष्टवयस आरभ्य शास्त्रपरिस्थित्युभयदृष्ट्या दशमवयस आरभ्य द्वादशमध्ये विवाहनियमनम्, पुंसां षोडश-वय आरभ्यैकपञ्चाशत्तमवयः पर्यन्तं विवाहनियमनं योग्यम् । रजो-नन्तरविवाहस्तु आपत्कल्पः । अन्यथा प्रायश्चित्तीयतेति वदन्ति ।

(३४) उ०—अनिर्दिष्टनाम्नां प्रबन्धकाराणाम् ।

पुंसां शास्त्रतः विंशतिवत्सरमारभ्याष्टाचत्वरिंशद्वयःपर्यन्तं, स्त्रीणां तु अष्टवर्षत आरभ्य ऋतुदर्शनपर्यन्तं विवाहकालः । ऋतु-मत्या विवाहो गौणः, विना प्रायश्चित्तं रजोवतीनां न व्यवहार्य-त्वमिति वदन्ति ।

(३५) उ०—शारदाप्रसादमिश्राणां (कलकत्ताशाकद्वीपीयब्राह्मणसभा)।

स्त्रीणामष्टमवयसःपूर्वं विवाहो न योग्यः, पुंसां तु यज्ञोपवीता-दूर्ध्वं प्रायश्चित्तास्मरणाद्यावत्सामर्थ्यं विवाह इति शास्त्रार्थः । परिस्थित्यनुसारेण तु पुंसां षोडशवत्सरमारभ्य विवाहव्यवस्था युक्ता । शिष्टसमाजानुमत्या परावधिनिर्णयोऽपि न दोषाय ।

(३६) उ०—कृष्णरायपुरस्थ श्रीवेंकटरामशास्त्रिणाम्

अस्ति बाल्यमारभ्यापि, "द्विवर्षात् प्राग्विवाहश्चेत् कन्याया मरणं यदि । खननं नैव कर्तव्यं मन्त्रसंस्कारमाचरेत्" इत्यादिवचनात् स्त्रीणां रजोदर्शनपर्यन्तं योग्यः, तदनन्तरं तु न योग्यः, पुंसां "पञ्चा-शद्वत्सरादूर्ध्वं न कुर्यात् पाणिपीडनम्" इति निषेधात् विवाहे प्रायश्चित्तीयतेति वदन्ति ।

(३७) उ०—ब्रह्मप्रान्तीयब्राह्मणमहासभापण्डितानाम् ।

शास्त्रतोऽष्टमवयस आरभ्य परिस्थित्यनुसारेण दशमवयस आर-भ्य स्त्रीणां रजोदर्शनपर्यन्तं पुंसां तु १६ वय आरभ्य पञ्चाशद्वयः-

पर्यन्तं विवाहव्यवस्था युक्ता, रजोदर्शनानन्तरं च प्रायश्चित्ताद्याधिक्यात् आपत्कल्पतयैव तदभ्यनुज्ञानसंभवः।

(३८) उ०—श्रीराघवशास्त्रिणाम्। (चिदम्बरम्)।

स्त्रीणां षष्ठवय आरभ्य द्वादशवयःपर्यन्तमापत्कल्पतया, अनाथानां रजोऽनन्तरमपि विवाहव्यवस्था न दोषाय। पुंसां तु षोडशवयस आरभ्य पञ्चाशद्वयःपर्यन्तं विवाहो न दोषाय। तदनन्तरं तु स दोषायैवेति वदन्ति।

(३९) उ०—तेन्नालि राममूर्त्तिशास्त्रिणाम्।

ब्राह्मणस्त्रीणामष्टमवयसोऽनन्तरमृतुपर्यन्तं विवाहकालः। ऋत्वनन्तरं तु न सम्भवत्येव धर्माधिकारादिकं विवाहे। क्षत्रियादीनां तु गान्धर्वविवाहाभ्यनुज्ञानात् ऋत्वनन्तरं वर्षत्रयमध्ये विवाहो गौण इति मन्यते।

(४०) उ०—जयपुर श्रीसीतारामशास्त्रिप्रभृतीनाम्।

स्त्रीणां दशमवय आरभ्य पुंसां षोडशवय आरभ्य विवाहव्यवस्था शास्त्रपरिस्थित्युभयानुसारेण भवति। रजोनन्तरं तु विवाहो दोषायैव।

(४१,४२) उ०—श्रीपट्टाभिरामशास्त्रिणाम् अभिनवसरस्वतीसम्पादकानाम्, रामशास्त्रिणां च।

अष्टमवयस आरभ्य द्वादशवयःपर्यन्तं स्त्रीणां षोडशवत्सरमारभ्य विवाहकालसंकोच एव कर्तव्यः, न तु तदुपचयः। रजोऽनन्तरं तु विवाहो न संभवत्येव धर्माधिकारप्रयोजकः।

(४३) उ०—नोवाखालीसंस्कृतविद्यालयपण्डितानाम्।

अष्टमवयस आरभ्य ऋतुकालपर्यन्तमेव शास्त्रपरिस्थित्युभयानुसारेण नियमनं विवाहकालस्य स्त्रीणां, पुंसां समावर्तनानन्तरं शूद्रेतराणां, शूद्राणां तु षोडशवयस आरभ्य विवाहकालनियमनं

योग्यम्। कन्याया अलाभे एव पुंसां नोद्वाहो युक्तः। वृषलीत्व-बोधकानां वचनानां रजोदर्शनात्पूर्वं विवाहावश्यंभावार्थत्वम्।

(४४) उ०—मेदिनीपुर जलासुवादिब्राह्मणपण्डितानाम्।

कन्यकानामष्टमवयस आरभ्य शास्त्रानुसारेण, परिस्थित्यनुसारेण दशमवयसः प्राक् द्वादशवयःपर्यन्तं, पुंसामुपनयनानन्तरमेव शास्त्रतः, परिस्थित्यनुसारेण चतुर्विंशतिवयस आरभ्य विवाहकाल-नियमनं योग्यम्। रजोयोगे तु विवाहो गौण आपत्कल्पो वा।

(४५) उ०—श्रीरमानाथविद्यालङ्काराणाम्।

अष्टमादिवय आरभ्य रजोदर्शनतः पूर्वं विवाहो योग्यः, रजो-दर्शनानन्तरं तु षोडशवत्सरमध्ये आपत्कल्पतया विवाहः स्त्रीणामभ्य-नुज्ञायते। बाल्यविवाहप्रथारक्षणमेव योग्यं, न तु तत्परित्याजनम्।

(४६) उ०—श्रीसुरेन्द्रनाथतर्करत्नभट्टाचार्याणाम्।

राजमार्तण्डे—

सप्तसंवत्सरादूर्ध्वं विवाहः सार्ववर्णिकः।

इत्यादिवचनात् सप्तवर्षानन्तरं दशवर्षपर्यन्तं कन्याया विवाह कालो मुख्यः। ततः परं नग्निकाया विवाहकालो गौणः। वृषलीत्व-बोधकवचनानामप्राशस्त्यपरत्वं परिस्थित्यनुसारेण सप्तवर्षानन्तरं द्वादशवर्षात्प्राक् कन्यायाः, एकविंशतिवर्षानन्तरे त्रिंशद्वर्षपर्यन्तं पुरुषस्य विवाहः सङ्गतः।

(४७) उ०—खुलनाजिलांतर्गतकतिपयग्रामनिवासिपण्डितानाम्।

सप्तसंवत्सरादूर्ध्वं विवाहः सार्ववर्णिकः।

इत्यादिवचनम्। स्मार्तभट्टाचार्यैः द्विवर्षायाः शूद्रपत्न्याः पञ्चवर्षीय-शूद्रेणापि विवाहः स्वीकृतः।

अनूढभार्यः शूद्रस्तु षोडशाद्वत्सरात्परम्।
मृत्युं समधिगच्छेत्तु मासं तस्यापि बांधवाः॥

इतिशङ्खवचनं च

चत्वारिंशद्वत्सराणां साष्टानां च परे यदि ।
स्त्रिया वियुज्यते कश्चित् स तु रण्डाश्रमी मतः ।
अष्टचत्वारिंशदब्दं वयो यावन्न पूर्यते ।
पुत्रभार्याविहीनस्य नास्ति यज्ञेऽधिकारिता ॥

इति भविष्यपुराणम् ।

एतद्वचनानुसारेण वर्तमानपरिस्थित्यनुसारेण नियमनमुपयुज्यते। ऋतुदर्शने वृषलीत्वबोधकवचनानि अनापदि पित्रादीनां तद्वोढुश्च प्रत्यवायमवगमयन्ति ।

(४८) उ०—श्रीयुक्तललितकुमारसाङ्ख्यवेदतीर्थमहाशयानाम् ।

रजःप्रवृत्तेः प्रागेव कन्याया विवाहः कार्यः, अनूढायाः रजोदर्शने मातापितृभ्रातॄणां दोषस्मरणात् अनूढायाः कन्याया रजोदर्शने वृषलीत्वेन भ्रूणहत्याश्रवणेन च सर्वथा अव्यवहार्यत्वं गम्यते। परिस्थित्यनुसारेण दशमवर्षीयायाः विवाहो योग्यः। तथापि सप्तसंवत्सरादूर्ध्वमेव विवाहः शास्त्रीयः कन्यानां, पुरुषाणां एकविंशतिमारभ्य त्रिंशत्पर्यन्तं विवाहः शास्त्रसम्मतः।

(४६) उ०—श्रीनारायणविद्यारत्न श्रीविश्वनाथतर्कभूषणमहोदययोः ।

वर्तमानपरिस्थित्यनुसारेण ऋतुप्रवृत्तिसमयात्पूर्वपर्यन्तं स्त्रीणां विवाहनियमनं योग्यम् । रजःप्रवृत्यनन्तरं विवाहस्याऽऽपत्कालिकवृषलीत्वबोधकवचनानां प्रायश्चित्तार्हत्वे निन्द्यत्वे च तात्पर्यम्।

(५०)उ०—मैमनसिंहधर्मसभापण्डितानाम् ।

शास्त्रीयनियमपरिवर्तनं न युक्तम् ।

(५१) उ०—श्रीदुर्गासुन्दरभट्टाचार्याणाम् ।

सामाजिकपारिवारिकपारिपार्श्विकव्यवहारेण विवाहात्परमेव-अस्मद्देशीयस्त्रीणामवगुण्ठनं दृश्यते, ततः पूर्वं तदभावात् याद्दृच्छिकगमनादितश्च मनोविकारकपुरुषसंलापादिसंसर्गविभावना-

प्रायश एव सम्भवितुमर्हति। उपर्युक्तशिक्षासंयमाभ्यासप्रयोगे अभिभावका अनेके एवासमर्थाः। विवाहात्पूर्वं रजोदर्शने आत्यन्तिकनिन्दाश्रुतेश्च रजोदर्शनपूर्वकालपर्यन्तं विवाहसमयनिरूपणं कर्तव्यम्। अतएव धृताधोवसनाया गौर्याः प्राप्तौ विवाहकर्त्रा यतनीयमित्युक्तमुद्वाहचन्द्रालोके।

(५२) उ०—श्रीसीतानाथविद्याभूषणानाम्।

वर्तमानपरिस्थितेः शास्त्राननुमोदितत्वात्तदनुसारेण यत्किञ्चिदपि नियमनं शास्त्रैकशरणानामनभिप्रेतमेव सर्वदा भावि।

(५३) उ०—श्रीकुमुदचन्द्रकाव्यव्याकरणतीर्थानाम्।

तदेव।

(५४) उ०—श्रीनाथचन्द्रकाव्यतीर्थद्वारकानाथवेदान्ततीर्थयोः।

स्त्रीणां मासत्रयाधिकषड्वर्षात् दशमवर्षपर्यन्तं विवाहकालो मुख्यः, पुंसामुपनयनानन्तरं अष्टचत्वारिंशद्वर्षपर्यन्तम्। रजःप्रवृत्यनन्तरं विवाहस्यापत्कल्पत्वमेव। वृषलीत्वबोधकवचनानां व्यवहारायोग्यत्व एव तात्पर्यम्।

(५५) उ०—श्रीविनोदविकासदेवन्यायतीर्थानाम्।

पूर्ववदेव। परिस्थित्यनुसारेण शास्त्रानुसारेण च रजोदर्शनात्पूर्वं षोडशवर्षपर्यन्तं नियमनं योग्यं, रजःप्रवृत्यनन्तरं विवाहस्य अत्यापत्कल्पत्वम्।

(५६) उ०—श्रीरामपदस्मृतितीर्थानाम्।

परिस्थित्यनुसारेण द्वादशवर्षादारभ्य षोडशवर्षपर्यन्तं स्त्रीणां, पुंसां च विंशतिवर्षावधि त्रिंशद्वर्षपर्यन्तं विवाहकालः शास्त्रसम्मतः। विशेषकारणवशात् पुंसां विवाहः अष्टचत्वारिंशद्वर्षपर्यन्तं शास्त्रसम्मतः। ऋतुदर्शनात् प्राक् कन्यादानमत्यन्तमावश्यकम्।

(५७) उ०—श्रीभूतनाथवेदान्तशास्त्रिणाम्।

पुंसां सप्तदशवर्षादारभ्य अष्टचत्वारिंशद्वर्षपर्यन्तं विवाहकालः

शास्त्रसम्मतः। स्त्रीणां च प्राग्रजोदर्शनात्। रजसि प्रवृत्ते योषितां बहुदोषसम्भावनाऽस्ति। सरजस्कतया तस्याश्चित्त विक्षेपः, तदार्त्तववैफल्यम्, पित्रोः सहोदरस्य च भ्रूणहत्यादिपापं, तस्याः कन्यायाश्च वृषलीत्वादि पातित्यं, तद्भर्तुः वृषलीपतित्वदोषश्च।

रजःप्रवृत्ते नारीणां रिरंसा जायते भृशम्।

इत्यादिवचनान्यत्र प्रमाणानि। अन्या च महती शारीरिकी हानिः, या पुनरनूढा असंस्कृता पितुःनिलये रजो दृष्ट्वा स्वभावरिरंसुतया स्वप्ने मैथुनमाचरेत्, तां प्रकृत्योक्तमायुर्वेदे—

ऋतुस्नाता तु या नारी स्वप्ने मैथुनमाचरेत्।
आर्त्तवं वायुरादाय कुक्षौ गर्भं करोति हि॥
मासि मासि प्रवर्धेत स गर्भो गर्भलक्षणः।
कललं जायते तस्मात् वर्जितः पैतृकैर्गुणैः॥

केशस्नाय्वस्थिशिराधमनीदन्तनखरेतः शून्यं कललं जायत इत्यर्थः। अन्यच्च भावप्रकाशे—

यदा नार्यावुपेयातां वृषस्यन्तौ कथञ्चन।
मुञ्चन्त्यौ शुक्रमन्योन्यमनस्थिस्तत्र जायते॥

अनस्थिः अल्पकोमलास्थिरित्यर्थ इति टीका। परं सुशासितायामपि कन्यायां न प्रसह्य प्रकृतिमवरोद्धुं शक्नोति कश्चित्। यद्येवमनिष्टं जायेत, तर्हि का गतिरस्माकं धर्मैकजीवितानामार्याणामिति चिन्त्यम्। अतएव मनुनाप्युक्तम्—

कालेऽदाता पिता वाच्यो वाच्यश्चानुपयन् पतिः। इति परिस्थित्यनुसारेणापि इयमेव व्यवस्था।

रजोदर्शनात्प्राक्कन्या देया इत्यनेन भारतवासिनामार्याणां नैकविधः काल उक्तः, देशभेदेन प्रकृतिस्वास्थ्यादिभेदेन चात्र कालभेदस्य अवश्यम्भावित्वात्। अत एव सुष्ठूक्तं मेधातिथिना

'अष्टवर्षात् (आरभ्य) ऋतोः प्राक्' इति। रजःप्रवृत्त्यनन्तरं विवाहस्य न मुख्यत्वं, किं तु हेयत्वं हानिकरत्वं च। हानिरपि दैहिकी सामाजिकी च। वृषलीत्वबोधकवचनानां व्रात्यवत्पातित्यसूचकत्वम्। पाश्चात्याः कथयन्ति सङ्करप्रजा बलवत्यो भवन्ति इति, तदर्थं ते सङ्करोत्पादनाय यतन्ते। येन केनाप्युपायेन अर्थजनबलवृद्धिरवश्यं करणीयेति तद्देशीयानां सिद्धान्तः। नास्माभिरेवंविधं अनुचितं बलमभिलष्यते।

(५८) उ०—पूर्वस्थलीब्राह्मणमहासम्मेलनोपसमितिपण्डितानाम्।

अन्यत्सर्वं पूर्ववदेव। परन्तु—

नैनः किंचिदवाप्नोति न च यं साऽधिगच्छति।

इत्यनेन ऋतुमत्याः कन्याया वोढुश्च दोषाभावो दर्शितः, तथाऽपि पुरुषान्तरोपभुक्तत्वसंशयाल्लोकविद्विष्ट एव।

(५९) उ०—श्रीसुरेन्द्रलालस्मृतितीर्थानाम्।

स्त्रीणां दशमे वर्षे पुंसां चतुर्विंशतिवर्षे शूद्रस्य षोडशवर्षे विवाहनियमनं योग्यम्। ऋतमतीविवाहो लोकविद्विष्ट एव।

(६०) उ०—श्रीचिन्तामणिस्मृतितीर्थानाम्।

स्त्रीणां शूद्राणां च चूडाकालद्विवर्षानन्तरं द्विजानां समावर्तनसंस्कारानन्तरं आजीवनमेव विवाहः शास्त्रसम्मतः। न च—

सप्तसंवत्सरादूर्ध्वं विवाहः शास्त्रसम्मतः।
कन्यायाः शस्यते राजन्नन्यथा धर्मगर्हितः॥

इति वचनात्सप्तवर्षाभ्यंतरे न विवाहो भवितुमर्हतीति वाच्यम्। तत्र 'शस्यते' 'धर्मगर्हित' इत्याभ्यां निन्दितत्वस्यैव प्रतिपादनात्। अत एवोक्तं शुद्धितत्वे—'यत्र द्विवर्षीयायाः शूद्रपत्न्या मरणे स्वमशौचं तत्र तद्वोढुः पञ्चमाब्दीयस्य मरणे द्वादशाहाशौचवैषम्यापत्ते'रिति। न च तथापि—

साष्टचत्वारिंशदब्दं वयो यावन्न पूर्यते ।
पुत्रभार्यावियुक्तस्य नास्ति यज्ञेऽधिकारिता ॥

इति वचनात् अष्टचत्वारिंशद्वर्षानन्तरं विवाहस्याशास्त्रीयत्वमिति वाच्यम् । तत्र यज्ञकर्मानधिकारप्रतिपादनमुखेन तन्मध्ये विवाहावश्यकताया एव प्रतिपादितत्वात् । न च पुत्रोत्पादनायोग्यदशायां कथं विवहः, तदानीमपि—

नकमपि विना कुर्यात् विधानं भार्यया द्विजः ।

इत्यादिवचनावगतवैधकर्मानुष्ठानोपयोगात् । वर्तमानपरिस्थित्यनुसारेण विवाहस्य पूर्वोक्तं शास्त्रीयकालमुल्लङ्घ्य अन्यथा कालकल्पनं शास्त्रविदां सर्वथा असम्मतमेव ।


(६१) उ०—श्रीअन्नदानाथभट्टाचार्याणाम् ।

सर्वेषामेव दानानामेकजन्मानुगं फलम् ।
हाटकगृहगौरीणां सप्तजन्मानुगं फलम् ॥

इति स्मृतिः गौर्या दानं विशेषतः प्रशंसति ।

दशवर्षा भवेत्कन्या अत ऊर्ध्वं रजस्वला ।

इतिसंवर्तवचने दशवर्षाधिकवयस्काया निन्दाश्रवणात् सप्तमवर्षादूर्ध्वं दशवर्षपर्यन्तं विवाहो युक्तः । विश्वसारतन्त्रोक्तद्वादशाब्दादारभ्य विंशतिवर्षपर्यन्तं यत्सुकुमारीत्वविधानं तत्कौलानां कुमारीपूजने ज्ञेयम् । द्विजातिपुरुषाणां तु समावर्तनानन्तरमेव विवाहकालः । सर्वधर्मग्रासी वर्तमानकालस्तु प्राचीनकालवर्तिस्त्रीरपेक्ष्य वर्तमानस्त्रीणामल्पे वयसि रजोयोगमुत्पादयति । तथा च वृषलीकन्याया विवाहे रजोदोषश्रवणात्सम्प्रति कालव्यवहारस्थित्या विवाहकालस्य सङ्कोच एव प्राप्तः । रजोनन्तरविवाहस्य गौणत्वापत्कल्पत्वसंदेहेऽस्माभिः पृच्छ्यते, प्रमादकृतरजःप्रवृत्त्यनन्तरं विवाहस्य गौणत्वजिज्ञासा ? आहोस्वित् इच्छाकृतरजः प्रवृत्त्यनन्तरम् ? प्रथमे कल्पे, विवाहः आपत्कल्प एव, द्वितीये-



अखिलभारतवर्षीयब्राह्मणमहासम्मेलनस्य चित्रम् ।

गौणत्वम् । वृषलीत्वबोधकवचनानां वृषलीविवाहनिषेधे तात्पर्यम् ।

(६२) उ०—श्रीदयालतर्कतीर्थानाम् ।

सर्वमपि पूर्ववत् । वृषलीत्वबोधकवचनानां तद्वोद्दुर्दृढतर-पापभागित्वे तात्पर्यम् ।

(६३) उ०—फरीदपुर विद्वत्समिति सम्पादकानाम् ।

स्त्रीणां द्वादशवर्षतश्च मुनिभिः पुंसां चतुर्विंशके
उद्वाहो विहितस्तु वेदविहितो लोकस्थितिं कांक्षिभिः ।
एषा पद्धतिरेव सम्प्रति पुनर्योग्या भृशं भारते
नान्या स्याद्गतिरत्र विज्ञविदुषां नूनं मता सर्वतः ॥
कालोऽयं त्वतिदुस्तरः कलिरहो यस्य प्रभुत्वं स्फुटं
यस्माद्द्य हि धर्मसम्मतगतिर्नो सम्मता सर्वतः ।
येषां शास्त्रमतेन कृत्यकरणे ह्यास्था परा धर्मतः
तेषां स्मार्तविधानतोऽष्टप्रभृतौ कन्याप्रदानक्षमः ॥
गौरीदानविधेर्विरोधनिपुणैः प्रोक्तं व्यवस्थाप्यते
ये वा सम्प्रति चञ्चलास्तु चपलाः संस्कारमाकांक्षिणः ।
तेषां मोहविमोचनात्तु सुतरां पुष्पोद्गमात् पूर्वतः
कन्याया दशवर्षतो गणनतो द्वित्र्युत्तराद्वा पुनः ॥
विवाहात्पूर्वतः स्त्रीणां रजश्चेत्परिदृश्यते ।
आपत्कल्पत्वमेवात्र भविता कस्यचिन्मते ॥
वयं तु न हि लुप्ताः स्मस्तत्रापि साम्प्रतं पुनः ।
यतः कौलीन्यमेवाद्य नामशेषत्वमृच्छति ॥
तस्मात्साङ्कर्यदोषेण समाजो जर्जरायते ।
कालेऽप्यनूढकन्यानां जातं चेदृतुदर्शनम् ॥
तादृग्भार्योद्वाहकारिपत्युर्नरकगामिता ।
सर्वथा वर्जनीयोऽसौ समाजहितकामिभिः ॥

(६४) उ०—श्रीहृषीकेशवेदान्ततीर्थानाम् ।

पूर्ववदेव ।

(६५) उ०—श्रीहरकुमार स्मृतितीर्थ तर्कपञ्चाननकविरत्नानाम् ।

रजोदर्शनात् पूर्वं कन्याया विवाहः । रण्डाश्रमित्वात्पूर्वं पुरुषस्य विवाहः शास्त्रसिद्धः । रजःप्रवृत्त्यनन्तरं विवाहस्य मुख्यत्वम् । वृषलीत्वबोधकं तु शास्त्रं किञ्चिन्न्यूनतां बोधयति ।

(६६) उ०—तर्कतीर्थ श्रीभवरञ्जनशर्मणाम् ।

स्त्रीणां जन्मकालमारभ्य मासत्रयाधिकषड्वर्षानन्तरमाजीवनं विवाहकालः । पुंसामपि विंशतिवर्षानन्तरमाजीवनम् । सम्भवति चेदष्टचत्वारिंशद्वर्षाभ्यन्तरे ।

(६७) उ०—श्रीहरिदाससिद्धान्तवागीशभट्टाचार्याणाम् ।

पूर्ववदेव ।

(६८) उ०—महेन्द्रकुमारस्मृतिभूषणभट्टाचार्याणाम् ।

शास्त्रोदितनियमपरिवर्तनं न युक्तं, वृषलीत्वबोधकवचनान्यर्थवादः ।

(६९) उ०—श्रीरामदेवशर्मणाम् ।

पूर्ववदेव ।

(७०) उ०—भिषक्पुराणतीर्थोपाधिकश्रीगदाधरमङ्गलानाम् ।

पूर्ववदेव ।

(७१) उ०—सतीनाथस्मृतितीर्थानाम् ।

पूर्ववदेव ।

(७२) उ०—श्रीसुरेशचन्द्रकर्मविद्यानिधीनाम् ।

पूर्ववदेव ।

(७३) उ०—सुरेन्द्रनाथदेवशर्मणाम् ।

षोडशवर्षाया विवाहबोधकं महाभारतवचनं युगान्तरविषयं

शैत्यप्रधानदेशविशेषपरं वा। श्रूयते च पुनः ऋग्वेदे कुष्ठरोगाक्रान्तायाः कस्याश्चित् कन्याया आरोग्यलाभानन्तरं चत्वारिंशद्वर्षमतीत्य ततः परं तस्या विवाहः, तेनैव किं चत्वारिंशद्वर्षं सर्वासां स्त्रीणां विवाहकालः कल्प्येत ? । तेन ऋतुदर्शनात् प्राक् स्त्रीणां विवाहो योग्यः, पुंसां तु पूर्ववदेव।

एतैस्तु प्राचीनमतपोषकाणि पूर्वोक्तानि निखिलान्यपि प्रमाणानि महता परिश्रमेणान्विष्यान्विष्य लिखितानि।

(७४) उ०—श्रीकालीचन्द्रस्मृतितीर्थानाम्।

वर्तमानपरिस्थित्यनुसारेणापि वयोनियमनं न योग्यम्। रूपगुणार्थवैषम्येन नियमपरिपालनोसम्भवात् महानर्थसम्भवाच्च। अन्यत्सर्वं पूर्ववदेव।

(७५) उ०—श्रीआनन्दकुमारतर्कवागीशानाम्।

पूर्ववदेव।

(७६) उ०—श्रीप्राणानन्दकविभूषणसिद्धान्तरत्नसरस्वतीनाम्।

पूर्ववदेव।

(७७) उ०—श्रीसूर्यकुमारतर्कसरस्वतीनाम्।

पूर्ववदेव।

(७८) उ०—श्रीरामगोपालस्मृतिरत्नानाम्।

पूर्ववदेव।

(७९) उ०—श्रीमोदनाथविचाररत्नानां कूचविहारराजसभापण्डितानाम्।

यत्तु—

वर्षपञ्चदशं यावत्कन्यादानं न दुष्यति।
देशाचारात् कुलाचारान्नान्यदीयं विधर्मतः॥

इति विवाहभास्करधृतकुलाचारलिखितस्मृतिवचनं तदरजस्काविषयमेव। न च प्रागृतोः कन्याया न दानमिति मनुभाष्यकारमेधातिथिव्याख्यानात् ऋतुदर्शनान्तरं कन्याया विवाह इति

वाच्यम्। तस्यायमर्थः, यथा आद्यऋतोरन्यत्र कन्याया दानं तथा ऋतुदर्शनात्प्रागेव कन्याया दानमित्यर्थः। नन्वस्तु तावद्ब्राह्मणपक्ष एव अरजस्काविवाहविधिः।

यस्तु तामुद्वहेत कन्यां ब्राह्मणो मदमोहितः।
असम्भाष्यो ह्यपाङ्क्तेयस्स ज्ञेयो वृषलीपतिः॥

इति वाक्यात्, न पुनः क्षत्रियादाविति चेन्न।

अविवाहिता तु या कन्या पुष्पयुक्ता भवेद्यदि।
चान्द्रायणं व्रतं कुर्यात् सर्ववर्णेष्वयं विधिः॥

इति रिपुञ्जयवचनात् ब्राह्मणादिसर्ववर्णानामेव प्रायश्चित्तश्रवणात्। पुंसस्तु कन्यापेक्षया त्रिगुणकालेन सार्धद्विगुणकालेन सपादैकगुणेन चाष्टचत्वारिंशद्वर्षपर्यन्तं विवाहो निरूपितः। तत्र क्रमेण प्रमाणानि–

वर्षैरेकगुणां भार्यां त्रिगुणः स्वयमुद्वहेत्।

इति कल्पतरूद्धृतविष्णुपुराणवचनम्।

त्रिंशद्वर्षोद्वहेत्कन्यां हृद्यां द्वादशवार्षिकीम्।

इति मनुवचनम्।

पुमान्विंशतिवर्षश्चेत् पूर्णषोडशवर्षया।

इतिभुजबलभीमवचनम्।

अष्टचत्वारिंशदब्दं वयो यावन्न पूर्यते।
भार्यापुत्रविहीनस्य नास्ति यज्ञेऽधिकारता॥ इति॥
पञ्चाशोर्ध्वं वनं व्रजेत्। इति वचनं च।

(८०) उ०—श्रीचट्टलग्रामधर्ममण्डलीपडितसभायाः।
पूर्ववदेव।

(८१) उ०—प्राचीनकामरूपपण्डितसभायाः;
पूर्ववदेव।

(८२) उ०—श्रीजगदीशचन्द्रदेवशर्मणाम् ।

पूर्ववदेव ।

(८३) उ०—चट्टग्रामान्तर्गतकेलीशहरस्थपण्डितसमितेः ।

अनाश्रमी न तिष्ठेत्तु क्षणमात्रमपि द्विजः ।

आश्रमेण विना तिष्ठन् प्रायश्चित्तीयते त्वसौ ।

समावर्तनोत्तरकालो मुख्यः प्रतीयते ।

(८४) उ०—श्रीनवीनचन्द्रन्यायपञ्चाननानां श्रीरामन्यायरत्नानां च ।

वृषलीत्वबोधकवचनानां द्विजातेर्विवाहनिषेधबोधकतया ज्ञानतोऽज्ञानतो वा विवाहे कृते वृषलीत्वमापन्नायाः कन्याया-स्तत्पत्युरपि तदुत्पन्नसन्ततेरपि पातित्यमित्येव तात्पर्यम् ।

(८५) उ०—श्रीमहेन्द्रचन्द्रकाव्यतीर्थसांख्यार्णवानाम् ।

पूर्ववदेव ।

(८६) उ०—श्रीसूर्यनारायणस्मृतिभूषणभट्टाचार्याणाम् ।

रजःप्रवृत्त्यनन्तरं वृषलीत्ववोधकवचनेषु ब्राह्मणमात्रपरिदर्शनादुपलक्षणत्वग्राहकप्रमाणान्तरादर्शनाच्च ब्राह्मणवरस्यैतादृशकन्यापरिणयात्तादृशो दोषः ।

(८७) उ०—श्रीगोपालचन्द्रस्मृतिव्याकरणतर्कतीर्थभागवतिस्मृतिन्याय-वेदान्तरत्नानाम् ।

स्त्रीणामपुष्पितानां गौणमुख्यभेदेनाष्टमवर्षात् षोडशवर्षपर्यन्तं विवाहकालः शास्त्रसम्मतः । तथा च स्मृतिसारः—सप्तमाद्वत्सरा-दित्यादि अन्यथा धर्मगर्हित इत्यन्तम् ।

अङ्गिराः—अष्टवर्षा भवेद्गौरी अत ऊर्द्ध्वं रजस्वला—इत्यन्तम् । रजस्व-लेति अन्तरस्थरजोयुक्ता भवतीत्यर्थः । गौणकालमाह—कुलाचारे स्मृतिः—

वर्षपञ्चदशं यावत् कन्यादानं न दुष्यति ।
देशाचारात्कुलाचारान्नान्यदीयं विधर्मतः ॥

महाभारते—

त्रिंशदब्दः षोडशवर्षां भार्यां विन्देत नग्निकाम् ।
अतोऽप्रवृत्ते रजसि कन्यां दद्यात् पिता सकृत् ॥

इति विवाहभास्करे लिखनात् । अत एव एकवर्षा भवेत्सन्ध्ये-त्याद्यभिधाय—

क्षेत्रज्ञा पञ्चदशभिः षोडशे चाम्बिका स्मृता ।
एवं क्रमेण सम्पूज्या यावत्पुष्पं न जायते ॥

इति तन्त्रसारधृतयामलीयेनाप्येवंविधायाः पूज्यत्वमुक्तम् । यत्तु-

प्राप्ते तु द्वादशे वर्षे यदा कन्या न दीयते ।

इत्यादिवचनान्तरं, तत्प्रकटरजस्काविषयमिति तत्रैवोक्तम् । पुंसां तु समावर्तनकालादारभ्य त्रिंशद्वर्षपर्यन्तं मुख्यकालः. ततः पञ्चाशद्वर्षपर्यन्तं गौणकालः प्रतीयते । 'वने पञ्चाशतो व्रजेत्' इति श्रुतेः । रजःप्रवृत्त्यनन्तरं 'यस्तु तां वरयेत्कन्याम्' इत्यादिकाश्यपीये तादृशकन्याया धर्म्यविवाहे ब्राह्मणस्य दोषश्रवणादसवर्णीयावद्वैदिकविवाहानुष्ठानादिकं विना संगृहीतारूपगौणकल्पत्वमेव विवाहस्य भवितुमर्हति। इतरत्रैवर्णिकानां तु तादृशकन्याविवाहे न दोषः। एतदेव शम्भुनाथेन भास्करग्रन्थेऽभिहितं यथा—"तेन एवंविधया शकुन्तलया दुष्यन्तविवाहोऽपि श्रूयते । मनुनापि,

गान्धर्वो राक्षसश्चैव धर्म्यौ क्षत्रस्य तौ स्मृतौ ॥

इत्यादिना तादृशविवाहस्य क्षत्रियादेर्नाधर्महेतुत्वमुक्तम् । वृषलीत्वमपि ब्राह्मण्या एव, ब्राह्मणप्रतियोगिकविवाहे ब्राह्मण्या एव प्रागुपस्थितत्वा"दिति । 'अक्षता च क्षता चैव'इतियाज्ञवल्क्यीयमपि क्षत्रियादिविषयमिति । किं च वरकन्ययोः संस्कारविशेषो हि वि-

वाह इति भास्करकृतविवाहलक्षणमप्यत्र न सङ्गच्छते, कन्यात्वाभावादिति। वृषलीत्वबोधकवचनानां तु 'न गृहम्' इत्यादिवाक्ये 'सर्वान्पुरुषार्थान्समश्नुते' इत्यत्र सर्वशब्दस्य यावत्वावच्छिन्ने शक्तत्वात् 'सपत्नीको धर्ममाचरेत्' इति श्रवणाच्च ब्राह्मणस्य ब्राह्मादित्रयविवाहे यथा धर्मार्थकाममोक्षपुरुषार्थचतुष्टयं स्यात् तथा तया सह न स्यादित्यत्र तात्पर्यम्।

(८८) उ०—श्रीरामलालतर्कतीर्थानाम्।

पूर्ववदेव।

(८९) उ०—ठक्कुर श्रीराखालानन्दशास्त्रिणाम्।

रजःप्रवृत्तौ वृषलीत्वबोधकानां वचनानां अव्यवहार्यत्वे तात्पर्यं द्रष्टव्यम्। तत्संसर्गिणामपि तथाविधानदर्शनात्।

(९०) उ०—श्रीबंकिमविहारिकाव्यतीर्थानाम्।

पूर्ववदेव।

(९१) उ०—श्रीशारदाचरणस्मृतितीर्थानाम्।

स्त्रीणां सप्तसंवत्सरादूर्ध्वं द्वादशवत्सरपर्यन्तं प्रशस्तो विवाहः। अतः परमप्रशस्तो न तु पर्युदस्तः। पुंसां तु ब्राह्मणस्योपनयनात्परं, एवं क्षत्रियवैश्ययोरपि, शूद्रस्य चतुर्विंशतिवर्षात्परं, सर्वेषामष्टचत्वारिंशद्वर्षपर्यन्तम्। अतः पूर्वापरयोर्न पर्युदासः, किं तु न प्रशस्तः। वर्तमानसमये स्तनोद्गमसमये एव प्रशस्तो विवाहकालः। अगत्या तु तदधिककालेऽपि स्त्रीणां विवाहः। पुंसां तु समाजरीत्यनुसारेण।

(९२) उ०—श्रीवासुदेवचौधरी व्याकरणतर्कतीर्थन्यायरत्नानाम्।

वर्तमानसमयेऽपि शास्त्रनिर्दिष्टनियम एव माननीयः। यद्यपि कालप्रभावेण लोकोऽसद्वृत्तिमाचरति, तथापि असद्वृत्त्याचरणविधायकं किमपि नियमनं न सम्भवति। वृषलीत्वबो

धकवचनैरिदं ज्ञायते यद्रजःप्रवृत्त्यनन्तरं स्त्रीणां विवाहदानं पापजनकं गृहस्थस्य सर्वतोभावेनाममङ्गलकरं तदिति।

(९३) उ०—श्रीत्रैलोक्यनाथस्मृतिभूषणानाम्।

पूर्ववदेव।

(९४) उ०—श्रीध्रुवानन्दन्यायरत्नानाम्।

शतानन्दः—

गर्भादष्टमवर्षे तु दशमे द्वादशेऽपि वा।
कन्यापरिणयः शस्त इति वात्स्यादिसम्मतम्॥

गर्भादिति सर्वत्रान्वयः। अत एव जन्मावधि सप्तमे वर्षे गौरीत्वमाह कश्यपः—

सप्तवर्षा भवेद्गौरी दशवर्षा तु कन्यका॥ इति॥

कन्याविवाहकाल एव वरविवाहस्य मुख्यः कालः। कन्याधिकवयसः कन्याधिकप्रमाणस्य च वरस्य विधानकालो गौणः। 'अनाश्रमी न तिष्ठेत्'इत्यादिवचनात्।

(९५) उ०—श्रीदेवुलवाडचतुष्पाठीपण्डितानाम्।

वृषलीवत् तस्यास्तद्वोढुश्च दैवादिकृत्येषु अनधिकारित्वसूचनाय वृषलीति संज्ञा।

(९६) उ०—चटगाँव एनाथबाजार संस्कृतविद्यालयपण्डितानाम्।

पूर्ववदेव।

(९७) उ०—श्रीदिनाजपुरधर्मसभापण्डितानाम्।

वर्तमानपरिस्थित्यनुसारेण शास्त्रानुसारेण च रजोदर्शनात्पूर्वमेव विवाहकालनियमनं स्त्रियो योग्यम्। यतः स्त्रीणां रजःप्रवृत्त्यनन्तरमपि विवाहाभावे—

दीर्घं वा युवती कन्या निवसेत् पितृवेश्मनि।
विना तु भर्तृसंसर्गं भ्रष्टात्वं साधिगच्छति॥

इति नीतिशास्त्रेण भ्रष्टात्वं स्यात्, ततः स्वच्छन्दचारिणीनां

स्त्रीणां त्यागः शास्त्रे विहितः, न तु कदापि ग्रहणं सम्भवति। पुंसामपि कलौ दीर्घकालब्रह्मचर्याभावेऽपि विवाहे असमाप्तजिगीषस्य स्त्रीचिन्तनेन अध्ययनप्रतिबन्धकताशङ्कया, किं च चतुर्विंशतिवर्षात्पूर्वं सर्वेषामङ्गप्रत्यङ्गानामदार्ढ्यात् तत्पूर्वमेव रामानुरक्तौ तदानीं तत्र जातानां तनयानां दौर्बल्यमल्पायुष्ट्वं च स्यादिति चतुर्विंशतिवर्षमारभ्यैव विवाहकालनियमनम्। रजःप्रवृत्त्यनन्तरं विवाहस्य न मुख्यत्वं न वा गौणत्वं न वाऽऽपत्कल्पत्वं, परंतु,

यस्तु तामुद्वहेत्कन्यां ब्राह्मणो ज्ञानदुर्बलः।
असम्भाष्यो ह्यपाङ्क्तेयः स ज्ञेयो वृषलीपतिः॥

इति निन्दार्थकवाक्येन निषिद्धत्वमेवावगम्यते, ततश्च शास्त्रान्तरे रजःप्रवृत्त्यनन्तरं दानप्राशस्त्यविधायकं वचनं यदि समूलं प्रमितं स्यात् तदा तत्कलीतरपरत्वेन व्याख्येयम्। न च दृष्टरजस्काया निन्दनं कलीतरपरं, प्राशस्त्यं तु कलिपरं, इति वैपरीत्यं कुतो न स्यादिति वाच्यम्। यतो हेतुरित्यधिकृत्य—

स्त्रीत्वे पुंस्त्वे च हि रतिर्विप्रत्वे सूत्रमेव हि।

इत्यादिभागवतीयकलिवर्णनश्लोकैः कलौ जनानां शिश्नोदरपरायणत्वावगमात्, अविशेषेण स्त्रीपुंसोरुभयोरेव दीर्घकालीनब्रह्मचर्यनिषेधात्, 'स्वैरिण्यश्च स्त्रियः सदा' इत्यनेन कलौ स्त्रीणां स्वैरिणीत्वख्यापनेन रजःप्रवृत्त्यनन्तरमपि विवाहे व्यभिचारिणीत्वादिशंका दुर्निवारा, ततश्च कलौ रजःप्रवृत्त्यनन्तरं विवाहस्य निषिद्धत्वमेव न्याय्यम्। ननु यदि कलौ शिश्नोदरपरायणत्वमेव दीर्घकाले ब्रह्मचर्याभावे हेतुरिति उपन्यस्यते, तर्हि पुंसां कथं चतुर्विंशतिवर्षात्पूर्वं विवाहो निषिध्यत इति चेन्न, कलौ शिश्नोदरपरायणत्वात् दीर्घकालीनं शास्त्रोक्तब्रह्म-

र्षयं स्त्रीपुंसोरुभयोरेवाशक्यम्, ततश्च चतुर्विंशतिवर्षमारभ्य यो विवाहकालोऽभिहितः, स तत्पूर्वमङ्गप्रत्यङ्गानामदाढर्यात् तत्परं च दाढर्यात् सन्तानानां दीर्घायुष्ट्वाय, न तु तत्पूर्वं सर्वथैव विवाहाभावो ज्ञाप्यते। न चैवं स्त्रीणामपि चतुर्विंशतिवर्षात्पूर्वं सर्वाङ्गानामदाढर्यात् चतुर्विंशतिवर्षमारभ्यैव विवाहकालोऽस्त्विति वाच्यम्। बीजदाढर्यादेव सन्तानस्य दृढत्वात्, तत्र क्षेत्रदाढर्यस्यानुपयोगित्वात्। दृष्टा हि लोके उर्वरायां भूमौ सलिलसंसिक्तायां कोमलायां न तु दृढायां परिपुष्टदृढबीजवपने बलवतां वृक्षाणामुत्पत्तिः। तत्र यथा एतद् बीजमेभिर्दिनैः परिपुष्टं भवतीति कालनियमोऽस्ति, न तथा एतत्क्षेत्रमेभिर्दिनैः परिपुष्टं भवतीति कालनियमोऽस्ति। यदा यदैव सलिलसंसिक्तं कर्षितं च स्यात्, तदा तदैव तत्कालीनपुष्टबीजवपने पुष्टवृक्षाणामुत्पत्तिस्तद्वदत्रापि। यदा यदैव उर्वरा नारी ऋतुमती स्यात्, तदा तदैव परिपुष्टरेतसा परिपुष्टसन्तानानामुत्पत्तिः, नात्र स्त्रीणां वयःकृतं किंचिदप्युपयोगित्वमस्ति। अथैवं कलौ विधवास्त्रीणां दीर्घकालीनब्रह्मचर्यरक्षणं कथमुपपद्येतेति चेत्। सत्यम्। सम्भोगाशैव रतिप्रवृत्तौ हेतुः। विधवास्त्रीणां तु इह जन्मनि सम्भोगाशाविरहेण रतिप्रवृत्त्यभावात्, 'निराशः सुखी पिङ्गलावत्' इति सांख्यदर्शनोक्तदृष्टान्तेन सुखेनैव ब्रह्मचर्यरक्षणं सम्भवति। प्राप्तयौवनानां कुमारीणां तु समवयस्कायाः कस्याश्चिद्विवाहे कदा वयं वयस्यावत् स्वामिसङ्गता भविष्याम इत्याकांक्षायाः प्राबल्याद् ब्रह्मचर्यरक्षणं प्रायश एव सुदूरपराहतमिति दिक्।

(६८) उ०—श्रीतारानाथन्यायतर्कतीर्थ-श्रीतारकेश्वरस्मृतितीर्थयोः।
पूर्ववदेव।

(६६) उ०—श्रीपूर्ववङ्गीयसुवर्णग्रामान्तर्गतकृष्णपुरासनातनधर्ममण्डलप्रतिनिधीनाम्।

यमः—

अग्रे माहिषिकं दृष्ट्वा मध्ये च वृषलीपतिम्।
अन्ते वार्धुषिकं दृष्ट्वा निराशाः पितरो गताः ॥

मनुः—

अनिन्दितैः स्त्रीविवाहैरनिन्द्या भवति प्रजा।
निन्दितैर्निन्दिता नृणां तस्मान्निन्द्यान्विवर्जयेत्।

(१००) उ०—श्रीरजनीनाथस्मृतितीर्थनाम्।

पूर्ववदेव।

(१०१) उ०—मैमनसिंहहिन्दुसभापतीनाम्।

ऋतुमतीविवाह ःशास्त्रविरुद्धः। इतिहासतस्तु ज्ञायते सीतासावित्रीदमयन्तीनां ऋतुकालात्परत्र विवाहो जातः। पुंसां तु षोडशवर्षात्पूर्वं विवाहस्तु कथमपि न योग्यः, चतुर्विंशतिवत्सरादूर्ध्वं तु प्रशस्तः। परिस्थित्यनुसारेण विविच्यमाने चतुर्दशवर्षात्प्राक् कुमार्या विवाहः कथमपि न योग्यः। पुंसां चाष्टादशवत्सरात्पूर्वं विवाहो न योग्यः। वृषलीत्वबोधकवचनानां तत्पूर्वंतनविवाहप्राशस्त्ये तात्पर्य्यम्।

(१०२) उ०—श्रीरामकिंकरतकृरत्नभट्टाचार्यणाम।

कन्यायाः पञ्चमवर्षात्परं दशवर्षपर्यन्तुं पुंसः पञ्चदशवर्षादष्टचत्वारिंशद्वर्षपर्यन्तं विवाहः शास्त्रसम्मतः। वर्तमानसमयानुसारेण अष्टमवर्षात्परं रजःप्रकाशकालपूर्णपर्यन्तं कन्यायाः. पुंसस्तु पञ्चदशवर्षात्परं त्रिंशत्तमवर्षपर्यन्तं योग्यः।

'पित्रागारे कुचकुसुमयोः सम्भवो वा यदि स्यात्।'

इत्यादिद्विरागमनकर्तव्यताबोधकवचनबलात् द्विरागमनस्य रजःप्रकाशात्पूर्वं यथाऽवसरः स्यात् तावत्पर्यन्तमिति प्रतिभाति।

(१०३) उ०—श्रीतारिणीचरणतर्कचूडामणीनाम्।

वृषलीत्वबोधकवचनानां पातित्यबोधकत्वम्।

(१०४) उ०—श्रीदयालकृष्णतर्कतीर्थानाम् ।

पूर्ववदेव ।

(१०५) उ०—श्रीआशुतोषस्मृतिरत्नानाम् ।

स्त्रीशूद्रयोर्विवाहपूर्वावधिकस्य शास्त्रतः सुस्पष्टमनुपलभ्यमानतया चूड़ाकरणानन्तरं तत्कालः कल्पनीयः ।

येषां च न कृताः पित्रा संस्कारविधयः क्रमात् ।

इत्यादिनारदवचने संस्काराणां क्रमकर्तव्यताभिधानात् ।

आवृत्ततीर्थगमने प्रतिघाते च कर्मणि ।

कालात्यये च कन्यायाः कालदोषो न विद्यते ॥

अष्टवर्षा भवेद्गौरी नववर्षा च रोहिणी ।

दशमे कन्यका प्रोक्ता अत ऊर्ध्वं रजस्वला ॥

तस्मात्संवत्सरे प्राप्ते दशमे कन्यका बुधैः ।

प्रदातव्या प्रयत्नेन न दोषः कालदोषतः ॥

इत्यङ्गिरोवचनेऽष्टमवर्षाद्युपादानं प्रशंसार्थम् । यत्तु शूद्रस्य षोडशवर्षोपरि विवाहकालो बहुशो दर्शितः शुद्धितत्त्वे रघुनन्दनेन, तदपि न्यायवर्तिशूद्राणां विवाहप्रशस्तकालपरतया बोद्धव्यम् । न तु तत्पूर्वकालव्यवच्छेदार्थम्, रघुनन्दनेनैव पञ्चमाब्दीयशूद्रस्य द्विवर्षायाः कन्यायाश्च विवाहस्याङ्गीकृतत्वात् । पुरुषस्य तु भार्यात्वसम्पादकज्ञानरूपविवाहकर्तृत्वेन पञ्चमाब्दादर्वाक् तादृशज्ञानानुदयात् शूद्रस्याप्यपूर्णपञ्चमाब्दस्य न विवाहव्यवहारः । शास्त्रसम्मतविवादकालः प्रागवधारितः, वर्तमानपरिस्थित्यनुसारेण तत्र नियमान्तरकल्पनं नानुमन्यामहे । वस्तुतस्तु शास्त्रोक्तश्रुतशीलवते वराय प्रदत्तायां कन्यायां दोषलेशस्याप्यसम्भवात् राज्ञां सामाजिकानां च बलमवलम्ब्य शास्त्रयुक्त्युमोदिताष्टमादिवर्षीयकन्यादाननिवारणापेक्षया दस्यूनामिव स्वच्छन्दचारिणां "ऋतौ भार्यामुपेयात्" इत्यादिशास्त्रातिक्रामणां

लोकातिवर्तिनां च दुर्वृत्तानां कुमार्यामवैधाचरणनिवर्तने राजकीयादिबलावलम्बनमेव युक्ततरमिति मन्यते ।

(१०६) उ०—श्रीहरेन्द्रचन्द्रसिद्धान्तवागीशानाम् ।

सर्वत्र चिरन्तनसदाचारपरिरक्षणमेव योग्यम् ।

(१०७) उ०—श्रीदिवाकरमिश्रवेदान्तपञ्चाननानाम् ।

जन्मावधिमासद्वयाधिकषड्वर्षानन्तरं जन्मावध्येकादशवर्षपर्यन्तं स्त्रीणां विवाहकालो मुख्यः । त्रिगुणितकन्याविवाहकाल एव वरविवाहस्य मुख्यकालः शास्त्रानुगुणः, व्यवहारानुसारेण स्त्रीणां रजोदर्शनात्प्रागेव विवाहकालो गौणः । कन्यालाभ एव कन्याधिकवयसः कन्याधिकप्रमाणस्य च वरस्य विवाहकालो गौणः । रजःप्रवृत्त्यनन्तरं कन्याविवाहस्य आपत्कल्पत्वम् । अत्र गुणवत्पात्रालाभरूपा आपत् । वृषलीत्वबोधकानां वचनानां वोढुर्निन्द्यत्वे तात्पर्यम् ।

(१०८) उ०—श्रीगुरुचरणस्मृतिरत्नानाम् ।

सप्तसंवत्सरादूर्ध्वं द्वादशवर्षात्पूर्वं स्त्रीणां विवाहकालः । द्विजातीनां पुंसां ब्रह्मचर्यात्परं सप्ततिवर्षपर्यन्तं विवाहकालः, शूद्रादीनां षोडशवर्षात्परम् । सर्वदा विवाहकालस्य शास्त्रानुसारेणैव नियमनं योग्यम् । रजःप्रवृत्त्यनन्तरं विवाहस्य जघन्यत्वम् । वृषलीत्वबोधकवचनानां नग्निकावस्थायामवश्यदाने तात्पर्यम् ।

(१०९) उ०—श्री पं० रविनाथशर्मणाम् ।

रोमकाले तु सम्प्राप्ते सोमो भुञ्जीत कन्यकाम् ।
रजःकाले तु गन्धर्वा अग्निर्भुङ्क्ते कुचागमे ॥
तस्मादव्यञ्जनोपेतामरजामपयोधराम् ।
अभुक्तां चैव सोमाद्यैर्दद्याद्दुहितरं सदा ॥
गौरीं ददद्विष्णुलोकं ब्रह्मलोकं तु रोहिणीम् ।
कन्यां ददत् स्वर्गलोकं रौरवं च रजस्वलाम् ॥

अष्टवर्षा भवेद्गौरी नववर्षा तु रोहिणी ।
दशवर्षा भवेत्कन्या अत ऊर्ध्वं रजस्वला ॥

इत्यादिभिरंगिरोवचनैःपञ्चमवर्षमारभ्य दशवर्षपर्यन्तं कन्याविवाहः प्रशस्त इति ज्ञायते । स्त्रीणां विवाहस्योपनयनस्थानीयत्वेन उपनयने पञ्चमाब्दादधिकारस्य सर्वसम्मतत्वात् । स्मृत्यन्तरे तु

जन्मतो गर्भाधानाद्वा पञ्चमाब्दात्परं शुभम् ।
कुमारीवरणं दानं मेखलाबन्धनं तथा ॥

इति स्पष्टमेवोक्तम् । वस्तुतस्तु—

सोमः प्रथमो विविदे गन्धर्वो विविद उत्तरः ।
तृतीयो अग्निष्टे पतिस्तुरीयस्ते मनुष्यजाः ॥
सोमोददद्गन्धर्वाय गन्धर्वोऽददद्ग्नये ।
रयिं च पुत्राँश्चादादग्निर्मह्यमथो इमाम् ।

इति श्रुत्या—

पूर्वं स्त्रियः स्युर्भुक्ताश्च:सोमगन्धर्ववह्निभिः ।

इत्यादिस्मृत्या च जन्मोत्तरं सार्धवर्षसप्तकं वर्षषट्कं वा यावत् सोमादिभिर्भुज्यमानतया नान्यभोग्या भवितुमर्हति । अतएव—

षडब्दमध्ये नोद्वाह्या कन्या वर्षद्वयं यतः ।
सोमो भुंक्ते ततस्तद्वत् गन्धर्वश्च तथाऽनलः ॥

इति ज्योतिर्निबन्धग्रन्थः संगच्छते । तर्हि अंगिरोवचनस्य का गतिरिति चेत, प्रत्यक्षश्रुतिविरोधेऽप्रामाण्यमेव । रजोदर्शनात्पूर्वं विवाहः प्रशस्ततर इति वा तस्य तात्पर्यम् । द्वादशवर्षं यावत् वर्तमानपरिस्थित्यनुसारेण विवाहो योग्य इति वक्तुं साम्प्रतम् । तदयं निष्कर्षः, पञ्चमाब्दमारभ्य दशवर्षं यावत् , षष्ठवर्षमारभ्य वा दशाब्दं यावत् , सप्तमवर्षमारभ्य दशाब्दं वा, अष्टमवर्षमारभ्य दशवर्षपर्यन्तं वा, कन्यादानं मतभेदेन साम्प्रतम् । एकादशवर्षमारभ्य द्वादशवर्षपर्यन्तं यावत्कन्यादानं

मध्यमम् । त्रयोदशमारभ्य षोडशहायनं यावत् सर्वथा रजोयोग-सम्भवात् निन्द्यम् ।

वन्ध्या तु वृषली ज्ञेया बृषली तु मृतप्रजा ।
अपरा बृषली ज्ञेया कुमारी या रजस्वला ॥
तस्याः पतिर्यो वृषलस्तदन्नमतिनिन्दितम् ।
बृषलान्नं प्रगृह्णन्ति वृषलास्ते प्रकीर्तिताः ॥

इत्यादिवचनाद् बृषलीपतेरन्नस्य निन्द्यत्वात् सर्वथा तस्या विवाहो निन्द्य इति तद्वचनम् ।

(११०) उ०—श्रीउमामहेश्वरशास्त्रिणाम् ।

स्त्रीविवाहकालविषये श्रुतिर्वीरमित्रोदये,
पितुर्गेहे तु या कन्या रजः पश्यत्यसंस्कृता ।
सा कन्या वृषली ज्ञेया तत्पतिर्वृषलीपतिः ॥

इति स्मृतिषु च गर्भाष्टमादिदशवर्षान्तकाले विवाहो विधीयते सार्ववर्णिकीनां स्त्रीणाम् । कुत्रचित्तु जन्मप्रभृति आसप्तमवर्षं, एकादशवर्षप्रभृति आरजोदर्शनं कालो विहितः, कुत्रचन रजोदर्शनानन्तरमपि यावद्वर्षचतुष्टयं कालो विहितः कुत्रचन रजोदर्शनानन्तरं प्रायश्चित्तं विधाय विवाह उक्तः । कुत्रचित्तु रजोदर्शनानन्तरं परित्यागं विधाय विवाहाभाव उक्तः । एवं पञ्चधा विप्रतिपत्तिः । तत्र एवं व्यवस्था, सार्ववर्णिकीनामेव कन्यानां गर्भाष्टमादिदशमपर्यन्तो मुख्यो विवाहकालः । जन्मप्रभृति सप्तमान्तः एकादशवर्षप्रभृतिरजोदर्शनपूर्वभावी च कालो गौणः सार्ववर्णिकीनाम् । रजोदर्शनोत्तरं वर्षत्रयावधिकः प्रायश्चित्तपूर्वकः पित्रादिकर्तृकविवाहकालः चतुर्थवार्षिकस्वयम्वरकालश्च क्षत्रियादीनामापत्कल्पः, न तु ब्राह्मणीनाम् । दृष्टरजस्कानां ब्राह्मणीनां तु परित्यागो विवाहाभावश्च, न तु कयाचिदपि दिशा प्रायश्चित्तादिपूर्वको विवाहः । यावद्दात्रभावप्रयुक्तस्वयम्वरोऽपि

राजानुमतिपूर्वको रजोदर्शनपूर्वभावी ब्राह्मणीनामापत्कल्पः प्रायश्चित्तपूर्वकः । अदृष्टरजस्कानां क्षत्रियादीनां तु प्रायश्चित्तरहितः स इति । समावर्तनकालोत्तरं पुंसां विवाहकालः । समावर्त्तनकालश्च शास्त्रतो ज्ञेयः । इदानीं च वेदाध्ययनस्य प्रायशो लुप्तत्वात् म्लेच्छभाषाशिक्षणस्यैव तत्स्थानापन्नतया ब्रह्मचर्यस्य तत्रानावश्यकतया उपनयनोत्तरमेव पुंसां विवाहकालो योग्यः । वर्तमानपरिस्थित्यनुसारेणापि शास्त्रीयकालपरिवर्तनं न युक्तम् ।

चण्डाली वर्धकी वेश्या रजःस्था या च कन्यका ।
ऊढा च या सगोत्रेण वृषल्यः पञ्च कीर्तिताः ॥

इत्यादिविज्ञानेश्वराद्युदाहृतस्मृतिवचनानुरोधेन चाण्डाल्यादिवद्वर्ज्यत्वबोधने एव वृषलीत्वबोधकवचनानां तात्पर्यम् । तथाहि, हेमाद्रौ प्रायश्चित्तकाण्डे "असंस्कृतकन्यारजोदर्शनप्रायश्चित्त" मिति प्रतीकमुपादायोक्तम्, "देवलः,

पितुर्गेहे तु या कन्या रजः पश्यत्यसंस्कृता ।
सा कन्या वृषली ज्ञेया तद्भर्ता वृषलीपतिः ॥

वृषलः शूद्रः । मार्कण्डेयः,

या कन्या पितृवेश्मस्था यदि पुष्पवती भवेत् ।
असंस्कृता परित्याज्या न पश्येत्तां कदाचन ॥
विवाहे च न योग्या स्यात् लोकद्वयविगर्हिता ।
एतां परिणयन्विप्रो न योग्यो हव्यकव्ययोः ॥
स तस्यां जनयेत्पुत्रं कानीन इति कथ्यते ।
माता पिता च पुत्रश्च त्रयस्ते वृषलाः स्मृताः ॥
यदा पुष्पवती कन्या तदैव त्यक्तमर्हति ।
न तत्र दोषस्तस्यास्ति गेहस्था चेत्स दोषभाक् ॥" इति ।

अत्र तस्यामुत्पन्नस्य कानीनत्वकथनेन पितृदायाद्यनधिकारित्वमपि सूच्यते, कानीनस्य अक्रमोढासुतत्वेन,

उभौ चानर्हतां भागं जारजातककामजौ ।

इत्यनेन जारजातत्वकामजत्वाभ्यां दायाभावस्य व्यवहार-काण्डे स्पष्टत्वात् ।

(१११) उ०—एम्० वी० शङ्करनारायणशास्त्रिणाम् ।

स्त्रीणां गर्भाष्टमाद्द्वादशं मुख्यः कालो विवाहस्य, ततः परं ऋतोः प्राग्गौणः कालः । पुंसां विवाहकालो विंशादापञ्चाशत् ,ततः परं न शास्त्रसम्मतः । गर्भपञ्चमोपनयने तु सप्तदशादारभ्यापि शास्त्रीयः । वर्तमानपरिस्थित्यनुसारेण शास्त्रानुसारेण च ऋतु-कालपर्यन्तं स्त्रीणां विवाहकालः कथंचिदभ्युपगन्तुं शक्यः । वृष-लीत्वबोधकवचनानां तात्पर्यं बृहस्पतिराविश्चकार । बृहस्पतिः,

पितुर्गेहे तु या नारी रजः पश्यत्यसंस्कृता ।
भ्रूणहत्या पितुस्तस्याः सा नारी वृषली स्मृता ॥
यस्तां विवाहयेत्कन्यां ब्राह्मणो मदमोहितः ।
सततं सूतकं तस्य ब्रह्महत्या दिने दिने ॥
यः करोत्येकरात्रेण वृषलीसेवनं द्विजः ।
स भैक्षभुक् जपन्नित्यं त्रिभिर्वर्षैर्व्यपोहति ॥
वृषलीगमनं चैव मासमेकं निरन्तरम् ।
इह जन्मनि शूद्रत्वं मृतः श्वा चैव जायते ॥ इति ।

बौधायनः—

दद्याद्गुणवते कन्यां नग्निकां ब्रह्मचारिणे ।
अपि वा गुणहीनाय नोपरुन्ध्याद्रजस्वलाम् ॥

(११२) उ०—मल्लादिदक्षिणामूर्तिशास्त्रिणाम् पुष्पगिरिशङ्कराचार्यमठ-प्रतिनिधीनाम् ।

स्त्रीणां द्विवर्षादारभ्य यावद्दशवर्षपर्यन्तं विवाहस्य मुख्यः कालः । पुंसां तु समावर्तनानन्तरं मुख्यः काल इति शास्त्र-व्यवस्था । वर्तमानपरिस्थितिः न शास्त्रविरुद्धा, अतः परिव-

र्तनस्य नैवावसरोऽस्ति। परिवर्तनस्यावश्यकर्तव्यत्वेऽपि दशवर्षाभ्यन्तर एव विवाहः कार्य इति नियमः कर्तव्यः। एवमपि आधुनिकसंस्कारकाणामप्रियमेव सम्पत्स्यते। रजोनन्तर विवाहस्य आपत्कल्पत्वमेव। वृषलीत्वबोधकवचनानां कन्यापतिप्रभृतीनामसंव्यवहार्यत्वबोधकत्वम्।

(११३) उ०—श्री अमृत उर्फ बापू सदाशिव गणकशिरोमणिधर्मोपदेशकानाम्।

जन्मतो गर्भतो वा पञ्चमप्रभृति अष्टमवर्षपर्यन्तं कन्याविवाहे उचितः कालः। षड्वर्षोत्तरं वर्षद्वयं प्रशस्तः। नवमदशमयोर्मध्यमः। एकादशवर्षे अधमः द्वादशाब्दे प्रायश्चित्तार्हः पुंसस्तु षोडशवर्षादारभ्य योग्यः। वर्तमानपरिस्थित्यनुसारेण द्वादशवर्षात्प्रागेव कन्याविवाहः प्रशस्तः। रजोदर्शनानन्तरविवाहो गौण एव। परन्तु वधूवरयोः जातकमेलनं यदि रजोदर्शनात्प्राक् न भवति तदानीं तु मुख्य एव। वृषलीत्वबोधकवचनैः पत्युः स्त्रीत्वप्राप्तिः, स्त्रियाश्च पुरुषत्वप्राप्तिर्बोध्यते।

(११४) उ०—श्रीचिरुकुलपेद्दिवेङ्कटरमणशास्त्रिणाम्।

अष्टमवर्षप्रभृति दशमवर्षपर्यन्तं स्त्रीणां विवाहकालो मुख्यः। एकादशद्वादशवर्षीयायास्तु ऋतोः प्राक् विवाहकालो गौणः। षोडशवर्षात्प्रभृति चत्वारिंशत्पर्यन्तं पुंसां विवाहकालो मुख्यः। एवं च परिस्थित्यनुसारेण स्त्रीणां अष्टमवर्षात्प्रभृति, पुंसां च षोडशवर्षात्प्रभृति विवाहनियमनं योग्यम्। रजस्वलाविवाहः शास्त्रदृष्ट्या ब्राह्मणानां न मुख्यः, न गौणः न वा आपत्कल्पः। ब्राह्मणकन्या रजस्वलात्वात्प्रागेव विवाह्या, न पश्चादित्येव वृषलीत्वबोधकवचनानां तात्पर्यम्।

(११५) उ०—बड़ोदास्थराजकीयपण्डितानाम्।

स्त्रीणां विवाहोऽष्टमवर्षादारभ्य रजोदर्शनात्प्राक्। पुंसां च

विंशतिवर्षादूर्ध्वं यौवनपर्यन्तं शास्त्रसम्मतः। नियमनस्यावधिरप्ययमेव। रजोनन्तरं विवाहस्यापत्कल्पत्वम्। वृषलीत्वबोधकवचनानां प्रायश्चित्तप्रसङ्गनिवारणे तात्पर्यम्।

(११६) उ०—कुम्भकोणस्थराजकीयसंस्कृतकलाशालापण्डितानाम्।

न किमपि लिखितम्।

(११७) उ०—सी० एल० वेङ्कटप्पशास्त्रिणाम्।

अनुरूपवरलाभकालः स्त्रीणां विवाहकाल इति शास्त्रसिद्धान्तः। पुंसामपि षोडशादूर्ध्वं अष्टाचत्वारिंशद्वर्षपर्यन्तमिति बहुधा प्रतिपादितेऽपि विद्याग्रहणात्परं विवाहकालः समुचित इति भाति।

वर्णाश्रमाचारवती प्रवृत्तिर्न कलौ नृणाम्।
विवाहा न कलौ धर्म्या न शिष्यगुरुसंस्थितिः।

इत्यादिवचनानुसारेण—

प्रजनार्थं स्त्रियः सृष्टाः सन्तानार्थं च मानवाः।

इतिमनुवचनानुसारेण च

त्रिंशद्वर्षो वहेत्कन्यां हृद्यां द्वादशवार्षिकीम्।
त्रिंशदब्दः षोडशाब्दां भार्यां विन्देत नग्निकाम्।
रोमकाले तु सम्प्राप्ते सोमो भुङ्क्ते च कन्यकाम्।
स्तनौ दृष्ट्वा तु गन्धर्वो रजो दृष्ट्वा हुताशनः॥
देवदत्तां पतिर्भार्यां विन्दते नेच्छयात्मनः।

इत्यादिवचनैः, 'सोमः प्रथमो विविदे' 'गृभ्णामि ते सुप्रजास्त्वाय' 'अपश्यं त्वा मनसा' 'आरोहोरु' इत्यादिमन्त्रलिङ्गबलात्, विवाहे समावेशनस्य प्रधानाङ्गत्वाच्च रजोदर्शनादूर्ध्वं स्त्रीणां विवाहकालस्य मुख्यकालत्वाभ्युपगमे न कापि क्षतिरिति प्रतिभाति। एवंरीत्या रजोनन्तरविवाहस्य मुख्यत्वमेव। उदितसूर्यार्घ्यनिन्दा अनुदितसूर्यार्घ्यश्लाघामेव करोतीतिन्यायानुसारेण वृषलीत्वबोधकवचनं रजोदर्शनात्पूर्वकालीनदानस्य श्लाघामेव करोति।

न चेदेवं, गार्गीमैत्रेयीप्रभृतिब्रह्मवादिनीनामपि वृषलीत्वप्राप्त्या महाननर्थः स्यात्। दानविवाहयोश्च अन्योन्यसम्बन्धो नास्त्येव।

(११८) उ०—श्रीनरहरि व्यङ्कटेश शास्त्रि अष्टाधिकारिणामअद्वैतनिष्कप्रचारकाणाम्।

ऋक्संहिताभाष्ये सायणाचार्यैः कामोत्पत्तेः पूर्वं सोमः, अल्पकामोत्पत्तौ गन्धर्वः, पूर्णकामोत्पत्तौ अग्निश्च भुङ्क्ते, अनन्तरं च मनुष्यः इति पारस्करगृह्यसूत्रे च प्रतिपादितत्वात् पूर्णकामोत्पत्तिकालात् द्वादशवर्षादूर्ध्वमेव कन्याया विवाहो योग्यः। तथा पारस्करगृह्यसूत्रे 'अजातलोम्नीं विपुंसीं च नोपहसेत् (का०२क०१८सू०६) इत्यत्र हरिहरगदाधरौ—"समयेपि न जातानि लोमानि यस्याः सा अजातलोम्नी, कूर्चादिविकारेण पुरुषाकारां स्त्रियं नोपहसेत्, उपगमनशब्देन अभिगमनमुच्यते" इत्युक्तवन्तौ। तथा आश्वलायनगृह्यसूत्रेऽपि "त्रिरात्रमक्षारालवणाशिनौ स्यातामधः शयीयाताम् (अ० १ खं० ८)' इत्यत्र "अक्षारालवणाशिनौ ब्रह्मचारिणौ अलङ्कुर्वाणौ अधः शायिनौ स्याताम्, अत ऊर्ध्वं त्रिरात्रं द्वादशरात्रं सम्वत्सरं वा एक ऋषिर्जायते" इति तद्व्याख्यातृभिः सूत्रोक्तनियमपरिपालनानन्तरमेव पतिगोत्रप्राप्तिः कन्याया भवतीति स्पष्टमेव प्रतिपादितम्। अतः परिस्थित्यनुसारेण स्त्रीणां विवाहस्य द्वादशवर्षमारभ्य पञ्चदशवर्षपर्यन्तं मुख्यकालनियमनं योग्यं, तदितरकालेषु तु सर्वथाऽयोग्यम्। पुंसां च एकविंशतिवर्षादारभ्य त्रिंशद्वर्षपर्यन्तं विवाहनियमनं योग्यम्, तदुपरितनवयस्कैस्तु विवाहेच्छुभिर्विधवाविवाहः कार्यः। ऋतुदर्शनोत्तरं विवाहो मुख्य एव, "सम्वत्सरं न मिथुनमुपेयातां द्वादशरात्रं षड्रात्रं त्रिरात्रमन्ततः" इतिपारस्करसूत्रोपरि जयरामहरिहराभ्यां "सम्वत्सरादिपक्षाशक्तौ त्रिरात्रपक्षाश्रयेऽपि, चतुर्थीकर्मानन्तरं

पञ्चम्यादिरात्रावभिगमनम्। चतुर्थीकर्मणः प्राक् तस्याः भार्यात्वमेव नोत्पन्नं, विवाहैकदेशत्वाच्चतुर्थीकर्मण" इत्युक्तत्वात्। एवं च पञ्चदशवर्षानन्तरं षोडशवर्ष एव कन्याविवाहस्य गौणः कालः। उभयकालातिक्रमे आपत्कल्पः। वृषलीत्वबोधकवचनानां तु उपनयनस्थानापन्नविवाहोत्तरं अवश्यकर्तव्यब्राह्मणोचितसन्ध्यावन्दनादिव्रतलोपनिमित्तप्रत्यवायबोधने तात्पर्यम्। प्रायश्चित्तेन च तादृशप्रत्यवायपरिहरणमगत्या करणीयम्।

(११६) उ०—श्रीमधुसूदनस्मृतिरत्नानाम्।

प्राचीनपक्षवदेव।

(१२०) उ०—श्रीदामोदरमिश्राणाम्।

पूर्ववदेव।

(१२१) उ०—श्रीकेशव बलवन्त जोशी महोदयानाम्।

पुंसां २१ तः ३० वर्षपर्यन्तम्। स्त्रीणां च १३ तः २० पर्यन्तं विवाहनियमनं योग्यम्, वैद्यकशास्त्रानुसारात्। ऋत्वनन्तरविवाहः आपद्धर्म एव, निन्द्यश्च। वृषलीत्वबोधकवचनानां ऋतुमत्या असंस्कृतायाः शङ्कितव्यभिचारत्वबोधने तात्पर्यम्।

(१२२) उ०—श्रीसीताराम विट्ठल ट्रिकेकर महोदयानाम्।

प्राचीन पक्षः।

(१२३) उ०—श्रीधुण्डिराज पुरुषोत्तम विवलकर महोदयानाम्।

(१२४) उ०—श्रीमहाराज नाथूराम शर्मणाम्।

(१२५) उ०—श्री पं० जगदीश झा शर्मणाम्।

(१२६) उ०—रमेश्वरलताविद्यालयपण्डितानाम्।

प्राचीनपक्षः।

(१२७) उ०—श्रीजीवनदत्तशर्मब्रह्मचारिमहोदयानाम्।

ननु चिकित्साशास्त्रे अष्टाङ्गहृदये प्रथमाध्याये,

पूर्णषोडशवर्षा स्त्री पूर्णविंशेन सङ्गता।

शुद्धे गर्भाशये मार्गे रक्ते शुक्रेऽनिले हृदि ॥
वीर्यवन्तं सुतं सूते ततो न्यूनाब्दयोः पुनः ।
रोग्यल्पायुरधन्यो वा गर्भो भवति नैव वा ॥

इत्युक्ततया पूर्वोक्तधर्मशास्त्राणां विरोध इति चेन्न । तस्य गर्भाधानपरत्वेन विवाहपरत्वाभावात् ।

(१२८) उ०—श्रीलक्ष्मण बलवन्त चितले शास्त्रि महोदयानाम् ।
प्राचीनपक्ष एव ।

(१२९) उ०—श्रीकेशव लक्ष्मण दफ्तरी महोदयानाम् ।
ऋतुमतीविवाहोपि योग्य एव । तत्र दोषस्तु दशाविशेषे वसिष्ठेनोक्तः,

यावन्ति कन्यामृतवः स्पृशन्ति,
तुल्यैः सकामामभियाच्यमानाम् ।
भ्रूणानि तावन्ति हतानि ताभ्यां
मातापितृभ्यामिति धर्मवादः ॥

तथा च कन्येच्छाधीनौ विवाहाविवाहाविति फलितम् । पुंसां तु शास्त्रोक्तविवाहकालः प्राशस्त्यार्थ एवेति सर्वमवदातम् ।

(१३०) उ०—श्रीरामचन्द्रशास्त्रिवेदान्तविशारदव्याकरणकाव्यशिरोमणीनाम् ।

ब्राह्मणस्य ऋतुमतीविवाहः सङ्गत एव ।
अपि वा गुणहीनाय नोपरुन्ध्याद्रजस्वलाम् ॥

इति वचनं तु न हि कश्चिदभिवाञ्छेत्संवर्ध्य कन्यकां गुणहीनाय प्रदातुं शारिकामिव बिडालायेति हेतोः ऋतोःप्राक् विवाहस्य स्तावकमेव । अत एवाभिज्ञानशाकुन्तले शकुन्तलाया विवाहात् प्राक् रजस्वलात्ववर्णनमपि सङ्गतम् । तथा च ऋतोः प्राक्कालस्य मुख्यत्वेऽपि गुणवद्वरलाभानुरोधेन रजस्वलाविवाहोपि न्याय्य एव । वृषलीत्वबोधकवचनानां च—

योऽनधीत्य द्विजो वेदमन्यत्र कुरुते श्रमम् ।
स जीवन्नेव शूद्रत्वमाशु गच्छति सान्वयः ॥

इत्यादिना तुल्ययोगक्षेमत्वमेव ।

(१३१) उ०—कुम्भकोणस्थ पण्डित श्रीसुन्दरशास्त्रिणाम् ।

(१३२) उ०—कुम्भकोणस्थश्रीशेषशाय्यय्यङ्गार्यमहोदयानाम् ।

न किमपि लिखितम् ।

(१३३) उ०—श्रीभागवतुलवेङ्कटरामावधानिनाम् ।

(१३४) उ०—श्रीहीरालालशास्त्रिणाम् ।

प्राचीनपक्षः ।

(१३५) उ०—श्रीकाञ्चीकामकोटिपीठेशजगद्गुरुशङ्कराचार्यमठास्थान-पण्डित श्रीपञ्चापगेशशास्त्रिणाम् ।

अत्र विषये किमपि न लिखितम् ।

(१३६) उ०—विद्याविशारद के० रामशास्त्रिणाम् ।

(१३७) उ०—श्रीललितमोहनस्मृतितीर्थानाम् ।

प्राचीनपक्षः ।

(१३८) उ०—कुम्भकोणस्थ अग्निहोत्रिगोपालदेशिकाचार्याणाम् ।

न किमपि लिखितम् ।

(१३९) उ०—कुम्भकोणस्थाग्निहोत्रिदेशिकताताचार्याणाम् ।

प्राचीनपक्षः ।

(१४०) उ०—कुम्भकोणस्थ के० श्रीनिवासताताचार्याणाम् ।

न किमपि लिखितम् ।

(१४१) उ०—श्रीललितकुमारसाङ्ख्यवेदान्ततीर्थानाम् ।

(१४२) उ०—श्रीभगवतीलालशर्मविद्याभूषणानाम् । (जोधपुर, मारवाड)

(१४३) उ०—श्रीहरिरामशास्त्रिणाम् ।

(१४४) उ०—श्रीमोहनजी काशीरामजी शास्त्रिणाम् ।

प्राचीनपक्षः ।

(१४५) उ०—वाराणसीविद्यापरिषद्विदुषाम् ।

स्त्रीणां मध्ये ब्राह्मणीनां विवाहकालोऽष्टमवर्षात्मको मुख्यः प्रशस्ततमः, नवमवर्षात्मकः प्रशस्ततरः, दशमवर्षात्मकः प्रशस्तः । तदूद्ध्वं यावद्रजःप्रवृत्तिर्न स्यात् तावत् सामान्यकालः । सामान्यकालमध्ये एकादशादिवर्षात्मक उत्तरोत्तरस्मात् श्रेयान् पूर्वः पूर्वः, श्रेयःपात्रलाभेऽष्टमवर्षात् पूर्वमपि विवाहः सम्भवति । क्षत्रियादीनां स्त्रीणामष्टमनवमवर्षयोर्विवाहः फलविशेषार्थः, ऋतुकालात् पूर्वं सप्तमाद् वर्षादूद्ध्वञ्च स्त्रीणां विवाहः सार्ववर्णिकः । क्षत्रियस्त्रीणां गान्धर्वविवाहस्तु गुणवत्पात्रालाभप्रयुक्तऋतुकालानन्तरमपि भवति शास्त्रार्थाक्षिप्तः । द्विजातिस्त्रीणां विवाहस्योपनयनसंस्कारस्थानपातितताया मनुना कीर्त्तनात् । क्षत्रियस्त्रीणामेकादशवर्षात्मककालो वैश्यस्त्रीणाञ्च द्वादशवर्षात्मकः कालो मुख्य इति गम्यते । स च कालो गर्भादेव गणनीयः । "गर्भादेकादशे राज्ञो गर्भात्तु द्वादशे विश" इति मनुना तयोरुपनयनमुख्यकालकीर्त्तनात् । किन्तु तत्र रजःप्रवृत्तिसम्भावनायां तत्पूर्वमेव विवाहः । सम्भावना च शरीरावस्थादर्शनाद् भवति । द्विजातीनां पुंसां समावर्त्तनोत्तरम् अष्टचत्वारिंशाब्दवयःपर्यन्तं विवाहसामान्यकालः, त्रिंशद्वर्षपर्यन्तः कालस्तु श्रेयान्, तत्र तत्र पूर्वः पूर्वः प्रशस्तः । शूद्रस्य तु पुंसः षोड़शवर्षात्मकः कालो मुख्यः, तदुत्तरं क्रमादपकृष्टो यावच्छक्तिस्थितिमिति सामान्यकालः । अत्र च प्रमाणम्—"सप्तमाद्वत्सरादूद्ध्वं विवाहः सार्ववर्णिक" इति । अत्र च "अष्टवर्षा भवेद्गौरी नववर्षा तु रोहिणी । दशमे कन्यका प्रोक्ता अत ऊद्ध्वं रजस्वला ॥ सम्प्राप्ते द्वादशे वर्षे यस्तु कन्यां न यच्छति । मासि मासि रजस्तस्याः पिता पिबति शोणितं" इति । ततः षोडशवर्षीयां भार्य्यां विन्देत नग्निकाम्"इति, "वैवाहिको विधिः स्त्रीणां

संस्कारो वैदिकः स्मृतः" इति "ऋतुत्रयं प्रतीक्ष्यैव कन्या कुर्यात् स्वयम्वरम् ।" इत्यादीनि प्रमाणानि ।

सप्तमवर्षपर्यन्तं स्त्रीणां विवाहो न देय इति नियमनं कर्त्तुं शक्यते। पुंसां तु विवाहवयोनियमनं द्विजातिषु समावर्त्तननियमाधीनं, समावर्त्तननियमने विवाहवयोनियमने च "अनाश्रमी न तिष्ठेत्तु दिनमेकमपि द्विज" इत्यादिवचनस्य व्याघातः प्रसज्येत। समावर्तनसंस्कारस्तु षोडशवर्षादर्वाग् न व्यवस्थापयितव्यः। अतः षोडशवर्षप्रवृत्तेःपूर्वं विवाहो न विधेय इति नियमनं कर्त्तुं शक्यते। अवधिकालस्तु सपुत्रत्वापुत्रत्वशरीरपाटवादिभेदप्रयुक्त इति समाजविवेकाधीनः। इदञ्च नियमनं सामाजिकशक्त्यधीनं न तु राजशक्त्यधीनं कर्त्तव्यम् ।

रजःप्रवृत्त्यनन्तरं विवाहस्य मुख्यत्वं नास्ति, ब्राह्मणीनां तादृग्विवाहस्यापत्कल्पत्वं, क्षत्रियादिस्त्रीणां गौणत्वम् ।

ऋतुदर्शनात् पूर्वं पात्रालाभे ऋतुमत्या विवाहः सम्भवति, तस्याश्च विवाहः प्रायश्चित्तं विना न कार्य इति प्रतिपादनाय वृषलीत्ववचनम् ।

(१४६) उ०—श्रीकाशीपण्डितसभायाः ।

"यावच्चैलं न गृह्णाति यावत्क्रीडति पांसुभिः ।
यावद्दोषं न गृह्णाति तावद्भवति नग्निका ॥".

इति नग्निकालक्षणस्यातिबाल्यावस्थामारभ्य, "नग्निकानागतार्तवा" इतिकोशानुसारेणर्तुकालपर्यन्तमवगमात् "प्रयच्छेन्नग्निकां कन्यामृतुकालभयात् पिता" इत्यादिवचनेन मैथिलनिबन्धाशौचकौमुद्यादौ वङ्गीयस्मार्तभट्टाचार्यादिनिबन्धेषु च द्विवर्षमारभ्यापि विवाहे आशौचव्यवस्थादिदर्शनेन चातिबाल्यावस्थामारभ्यापि विवाहो न शास्त्रविरुद्धः, "षडब्दमध्ये नोद्वाह्या"-इति निर्णयसिन्ध्वाद्युदाहृतं वचनम्,

६

जन्मतो गर्भाधानाद्वा पञ्चमाब्दात् परं शुभम् ।
कुमारीवरणं दानं मेखलाबन्धनं तथा ॥

इति वर्जनं तु ततः पूर्वतनस्य विवाहस्य मुख्यत्वनिषेधपरम्, न तु तन्निन्द्यत्वपरम् । तथा चाद्ययावदनुष्ठितानां बाल्यविवाहानां न शास्त्रविरुद्धत्वं, न वा तदुत्पन्नसन्तानानामधर्मप्रजात्वं चेति स्पष्टं प्रतीयते इति स्त्रीणां विषये ऋतुकालपर्यन्तं विवाहकालः । तत्राष्टमवयस आरभ्य फलाम्नानात् ततो दशमवयःपर्यन्तं मुख्यकालत्वम् । ततः पूर्वमनन्तरं चर्तुकालपर्यन्तं गौणकालत्वम्ः ततः परं तु वृषलीत्वादिकीर्तनात् निन्द्यत्वमापत्कल्पत्वं वा, तत्रापि वर्षत्रयमध्य एव विवाहेन धर्मप्रजोत्पत्तिः, तनन्दतरं तु वृषलीपतित्वादिना धर्मव्यवहारायोग्यत्वादिकमितिव्यवस्थाऽनुसन्धेया । यत्तु पुनर्विवाहिताया रजोदर्शने वृषलीत्वमुक्तम्, तदिदं क्षत्रियादीनां येषां वृषलीविवाहो विषिद्धः, तेषामपि रजोऽनन्तरविवाहायोग्यतापरम्, तथा च—

यस्तां समुद्वहेत्कन्यां ब्राह्मणो मदमोहितः ।

इति वचने ब्राह्मणपदं क्षत्रियादेरप्युपलक्षणम् । अत एव—

यः करोत्येकरात्रेण वृषलीसेवनं द्विजः ।

इति निन्दावाक्ये द्विजनिर्देश उपपद्यते, सर्वथा तु रजोनन्तरविवाहो द्विजविषय आपत्कल्प एव । केचित्तु क्षत्रियाणां गान्धर्वविवाहस्य स्वयंवरणस्य च संस्काररत्नमालायां दर्शनात् स्वयंवरणस्य च—

त्रीणि वर्षाण्युदीक्षेत कुमार्यृतुमती सती ।
ऊर्ध्वं तु कालादेतस्मात् विन्देत सदृशं पतिम् ॥

इति विधानात् वर्षचतुष्टयपर्यन्तं रजोऽनन्तरमपि स्वयंवरणं,

परं गौणमिति वदन्ति। सर्वथा दानपूर्वकविवाहो द्विजानां रजोनन्तरमापत्कल्प एव।

पुंसां तु केशान्तश्चैवं षोडश इति समावर्तनस्य षोडशे वयस्यभ्यनुज्ञानात्; तदारभ्यापि विवाहो न दोषाय। परमावधिस्तु—

चत्वारिंशद्वत्सराणां साष्टानां च परे यदि।
स्त्रिया वियुज्यते कश्चित् स तु रण्डाश्रमी मतः॥
अष्टचत्वारिंशदब्दं वयो यावन्न पूर्यते।
पुत्रभार्यावियुक्तस्य नास्ति यज्ञेऽधिकारिता॥

इति अष्टाचत्वारिंशद्वयसोऽनन्तरं यज्ञानधिकारबोधनात्,

अनाश्रमी न तिष्ठेत्तु दिनमेकमपि द्विजः।

इतिवचनसिद्धानाश्रमित्वदोषाप्रसक्तेश्च न विवाहावश्यकता।

पञ्चाशद्वत्सरादूर्ध्वं न कुर्यात् पाणिपीडनम्।

इति निषेधोऽप्यत्रानुसन्धेयः।

इदानीं तु स्त्रीणां कामोद्रेकादिना रजोदर्शनस्य द्वादशादिवयसि प्रायेण नियतं सम्भाव्यमानतया द्वादशवयसः पूर्वमवश्यं विवाहः कर्तव्यः, तथाऽष्टमवयसोऽनन्तरमेव विवाहः कर्तव्य इति नियमनं च परिस्थित्यनुगुणं योग्यमेव। अष्टमनवमदशमैकादशवयोमध्ये विवाहकालविशेषनियमनं तत्तत्पञ्चायतनसभाधीनं तत्तत्पितृभ्रात्रादिनिर्णयाधीनं च न दोषाय। साधारणपरिस्थितिस्तु शास्त्रानुसारिणी अष्टमवयसः पूर्वं विवाहनिषेधनियमनमात्रे उपयुक्ता; यतो मुख्यकालप्रतीक्षणानन्तरं गौणकल्पानुसरणस्यैव मुख्यत्वम्, न तु तदप्रतीक्षणेनेति स्त्रीविषये व्यवस्था। पुंविषये तु व्यवस्था पूर्वमेवोपक्षिप्ता।



* श्रीविश्वनाथः शरणम् *

अखिलभारतवर्षीय—

ब्राह्मणमहासम्मेलने

समालोचनीयप्रश्नावलीनामुत्तराणि ।

——:*:——

(५) पञ्चमः प्रश्नः—ब्राह्मणादिजातिषु अवान्तरश्रेणीनां परस्परं विवाहसम्बन्धः शास्त्रसम्मतो न वा ?

(१) †उत्तरम्—अवान्तरश्रेणीनां परस्परविवाहसम्बन्धः शास्त्राविरुद्धः; विवाहादौ ब्राह्मणादिजातेरिवावान्तरश्रेणीनामनुल्लेखात् । परंतु चिरप्रचलिताचारविरुद्धत्वात् न तत्प्रवर्तनं योग्यम् ।

(२) उ०—भिन्नाचारवतां भिन्नशीलानां चावान्तरश्रेणीनां विवाहसम्बन्धो वर्णसङ्करवदनर्थायैव । विवाहे समानशीलत्वमप्येकं निमित्तम् । तथा च नावान्तरश्रेणीनां विवाहसम्बन्धं युक्तं पश्यामः ।

(३) उ०—शास्त्राविरुद्ध एवावान्तरश्रेणीनां परस्परं विवाहसम्बन्धः, तथाप्याचारादिविरोधात् न तत्प्रवर्तनं योग्यम् ।

(४) उ०—न किमपि लिखितम् ।

(५,६,७) उ०—देशकुलधर्माणां शास्त्राविरुद्धानां प्रमाणत्वात् देशकुलाद्याचारसंरक्षणान्यथानुपपत्त्या नावान्तरश्रेणीनां विवाहसम्बन्धो योग्यः, आचारसाङ्कर्यादिसंभवात् । एवं च द्वितीयमतेनैकवाक्यता । कुलपरीक्षार्थमपि तस्योपयोगः । सह्याद्रिखण्डादौ

---

† निबन्धकाराणां नामानि प्रथमप्रश्नोत्तरनिबन्धस्थसङ्ख्यानुसारेण ज्ञेयानि । विशेषस्थलेष्वेव निबन्धानां सङ्गृहीतत्वात्तदतिरिक्तांशलेखनं निबन्धकर्तृभिः क्षन्तव्यमिति प्रार्थयामः ।

अवान्तरश्रेणीनां विवाहसम्बन्धो निषिद्धोऽपि। स्मृतिसारसमुच्चयेऽपि निषेधो वर्तते। प्रायश्चित्तानुष्ठानादि तत्रैव विवेचितम्।

(८) उ०—देशभेदप्रयुक्तावान्तरश्रेणीनां विवाहसम्बन्धो न कार्य इत्युद्वाह्यकन्यालक्षणपरिशीलनेनावगम्यते। तथा च प्रथममतेनैकवाक्यता।

(९) उ०—न किमपि लिखितम्।

(१०, ११, १२, १३, १४, १५, १६, १७, १८. १९) उ०—अनिषिद्धोऽप्यवान्तरश्रेणीनां विवाहसम्बन्ध आचारविरोधादप्रमाणम्। प्रथममतेनैकवाक्यता।

(२०) उ०—आचारभेदात्, अवान्तरश्रेणीनां देवलकादीनां कर्मविशेषकृतत्वात्, कुण्डगोलकादीनामव्यवहार्याणां संस्थाभेदात्, संस्थाभेदेषु तद्रक्षणेन विवाहसम्बन्ध एव योग्यः, न तु तद्विघटनेन।

(२१) उ०—स्पष्टं विरोधाभावेपि आचारविरोधान्नावान्तरश्रेणीनां विवाहो योग्यः।

(२२) उ०—तुल्यदेशसमयाचारेष्वेव विवाहसम्बन्धो योग्यः।

(२३) उ०—न किमप्यत्र लिखितम्।

(२४) उ०—आचारानुसार्येवार्थो ग्रहीतव्यः।

(२५) उ०—कुलपरीक्षणोपयोगितयाऽवान्तरश्रेणीरक्षणमत्यावश्यकं विवाहे,

शिखां पुण्ड्रं च सूत्रं च समयाचारमेव च।
पूर्वैराचरितं कुर्यादन्यथा पतितो भवेत्॥

इति वचनात्।

(२६) उ०—

सामयाचारिका धर्मा जातिभेदकुलोद्भवाः।
ग्रामाचाराः परिग्राह्या ये च विध्याविरोधिनः॥

इति देवलवचनादिसिद्धत तदवान्तराचाराविरोधाच्चावान्तरश्रेणीरक्षण-मत्यावश्यकम् ।

(२७) उ०—

कन्यादानं पितुः श्राद्धं सोमपानं तथैव च।
स्वबन्धुष्वेव कुर्वीत नान्यथा, पतितो भवेत् ॥
यस्तु देशानुरूपेण कुलमार्गेण चोद्वहेत् ।
नित्यं स व्यवहार्यः स्यात् वेदाच्चैतःप्रदर्श्यते ॥

इत्यादिनिर्णयसिन्धूद्धृतवचनैर्देशाचारादिरक्षणस्यावश्यकत्वात् विवाहे तत्तदवान्तरानादिसिद्धभेदपरिपालनमावश्यकम् ।

(२८) उ०—न किमपि लिखितम् ।

(२६) उ०—आचारभेदाद्देशभेदादिना न विवाहः सम्भवति तत्तदवान्तर-श्रेणीपरित्यागेन ।

(३०) उ०—यत्र कूटस्थेषु पातित्यादिकं, ता विहायावान्तरश्रेणीसम्बन्धो न दोषाय। हेमाद्रौ प्रायश्चित्ताध्यायेऽवान्तरश्रेणीषु विवाहा-करणस्याहंकारमूलकत्वप्रतिपादनात् ।

(३१) उ०—"यथा कन्या तथा हवि" रिति वचनेन परस्परमार्त्विज्यश्राद्धभोजनादिकं यत्रावान्तरश्रेण्यां, तत्रैव विवाहो योग्यो नान्यत्र; समानदेशीयानामपि भिन्नकुलाचारादीनां न विवाहसम्बन्धो योग्यः ।

(३२) उ०—शास्त्रतो यद्यपि न निषेधः स्पष्टः, तथाप्याचारविरोधाद-प्रामाणिकः ।

(३३) उ०—आचारव्यवहारादिभेदान्नावान्तरश्रेणीनां विवाहसम्बन्धः शास्त्रसम्मतः ।

(३४) उ०—आचाराभावान्न, भवति, शिष्टैर्व्यवस्थापनं तु यदि योग्यं मन्यते, तर्हि कर्तुं शक्यते ।

(३४) उ०—आचारादिभेदान्न विवाहसम्बन्धोऽवान्तरश्रेणीषु सम्भवति ।

(३६) उ०—न किमपि लिखितम् ।

(३७) उ०—त्रयस्त्रिंशप्रबन्धकाराणामेवेदं प्रबन्धान्तरम् ।

(३८) उ०—कुलशुद्धिज्ञानार्थमवान्तरश्रेणीनियमो विवाहेऽपेक्षित एव ।

(३९) उ०—गुर्जरत्वाद्यवान्तरजातिर्दत्तकादाविव कन्यादानेऽप्यपेक्षितेति धर्मसिन्धुतोऽवगम्यते, तत्तदवान्तरजातिष्वपि आचारादिभेदान्न विवाहसम्बन्धो युक्त इति ।

(४०) उ०—न किमपि लिखितम् ।

(४१) उ०—शास्त्रानिषिद्ध एव, परं तु आचारविरुद्धः ।

(४२) उ०—अवान्तरश्रेण्यवान्तरश्रेणीपरित्यागोऽपि संभवति ।

(४३) उ०—अवान्तरश्रेणीनियमो न शास्त्रसिद्धः ।

(४४) उ०—अवान्तरश्रेणीनियमपरित्यागो न दोषाय ।

(४५) उ०—कुलाचारविरोधादप्रामाण्यं स्पष्टं, शास्त्रनिषेधो नास्ति ।

(४६) उ०—तदेव ।

(४७) उ०—तदेव ।

(४८) उ०—ब्राह्मणादिषु अवान्तश्रेणीनां परस्परविवाहसम्बन्धाद्वर्ण-संकरो भवेत् ।

संकरो नरकायैव कुलघ्नानां कुलस्य च ।
पतन्ति पितरो ह्येषां लुप्तपिण्डोदकक्रियाः ॥
दोषैरेतैः कुलघ्नानां वर्णसंकरकारकैः ।
उत्साद्यन्ते जातिधर्माः कुलधर्माश्च शाश्वताः ॥
उत्सन्नकुलधर्माणां मनुष्याणां जनार्दन ।
नरके नियतं वासो भवतीत्यनुशुश्रुम ॥

इति गीतावचनात् ।

(४९) उ०—अवान्तरश्रेणीषु परस्परं विवाहोऽप्रशस्त एव, सदृशाना-हरेद्दारान्' इत्यादिवचनात्, सदाचाराभावाच्च ।

(५०) उ०—ब्राह्मणादिष्ववान्तरश्रेणीनां विवाहसम्बन्धो न शास्त्रसम्मतः ।

(५१) उ०—अवान्तरश्रेणीषु विवाहो भवितुमर्हति ।

(५२) उ०—अवान्तरश्रेणीनां परस्परं विवाहसम्बन्धो न योग्य इत्यत्र वचनं नोपलभ्यते ।

(५३, ५४, ५५, ५६, ५७) उ०—
पूर्ववदेव ।

(५८) उ०—अवान्तरश्रेणीनां विवाहो न विरुद्धः, भोजनवत् ।

(५९) उ०—एवमेव ।

(६०) उ०—एवमेव ।

(६१) उ०—ब्राह्मणजातिषु अवान्तरश्रेण्यो यथा, स्कन्दपुराणे—

सारस्वताः कान्यकुब्जा गौड़ा मैथिलकोत्कलाः ।
पञ्च गौडा इति ख्याता विंध्यस्योत्तरवासिनः ॥

तथा, वैदिकवारेन्द्राभ्यामपि भेदः, कायस्थे उत्तरराढीदक्षिणराढीवंगजवारेन्द्रकायस्थश्रेणयः । तथा च रामानन्दधृतकायस्थकुलदीपिकायां,

अथ वल्लालभूपश्च अम्बष्ठकुलनन्दनः ।
चकारातिप्रयत्नेन कुलशास्त्रनिरूपणम् ॥
आदिशूरानीतान्विप्रान् शूद्रांश्चैव तथाऽपरान् ।
एतेषां संततीः सर्वा आनयत्स निजालये ॥
यत्र यत्र स्थिता विप्रास्तत्र देशे निरूपिताः ।
श्रेणीद्वयं तु निर्णीतं राढीवारेन्द्रसंज्ञकम् ॥
तथैव द्विविधं प्रोक्तं कुलं च तद्द्विजोत्तम ।
शूद्रस्यातश्चतस्रश्च नृपेण श्रेणयः कृताः ॥
उत्तरदक्षिणराढौ च वंगवारेन्द्रकौ तथा ।
इति चतस्रः संज्ञाः स्युस्तत्तद्देशनिवासनाम् ।
कुलं चतुर्विधं तेषां श्रेणीश्रेणीविशेषतः ॥ इति ॥

एवं च सारस्वतादिपञ्चब्राह्मणानामेकवर्णत्वेन परस्परविवाहे प्राचीनाचाराभाव एव प्रतिबन्धकः।

पाणिग्रहणसंस्कारः सवर्णासूपदिश्यते ।

इत्यादिवचनेन सवर्णविवाहस्यैवोपदेशात्। तथा कायस्थानामपि एवमेव ज्ञेयम्। असवर्णब्राह्मणानां तु परस्परान्नपानादिभक्षणाभावात् विवाहो निषिद्ध एव।

(६२) उ०—पूर्ववदेव।

(६३) उ०—श्रेणीतोऽवान्तराणां हि ब्राह्मणादिषु जातिषु।
दोषायाल्पोपि संसर्गः कुतो वोढाहसम्मतिः॥

(७५) उ०—अवान्तरश्रेणीनां परस्परविवाहे न कापि क्षतिः।

(८०) उ०—कान्यकुब्जीयानां मैथिलानां वैदिकानां वारेन्द्रश्रेणीयानां च परस्परं विवाहो न शास्त्रतो निषिद्धः, किं तु चण्डालादिपुरोहितानां ब्राह्मणानां तदितरेषां च परस्परं विवाहादिसम्बन्धः शास्त्रनिषिद्ध एव।

(६०) उ०—

ययोरात्मसमं वित्तं जन्मैश्वर्याकृतिर्भवेत्।
तयोर्विवाहो मैत्री च नोत्तमाधमयोः क्वचित्॥

(१०१) उ०—अवान्तरश्रेणीषु विवाहो योग्यः।

(१०७) उ०—अवान्तरश्रेणीनां परस्परं विवाहः आचारविरुद्धत्वात् त्याज्यः।

(१०८) उ०—अवान्तरश्रेणीषु विवाहः न शास्त्रविरुद्धः।

(१०६) उ०—

उत्कृष्टायाभिरूपाय वराय सदृशाय च।
अप्राप्तामपि तां कन्यां तस्मै दद्याद्यथाविधि॥

इति मनुवचनात्सदृशे कन्या देया। सादृश्यं च तयोर्न ब्राह्मणादिजातित्वेन, अपि त्वाचारवत्त्वेन, तस्य च तासां भक्ष्याभक्ष्येषु मातुलदुहितृपरिणयादिषु च परस्परं भेदात् न तासां पर-

स्परं विवाहः सम्भवति ।

(११०) उ०—येषामाचारभेदो मतभेदो वा नास्ति, तेषामवान्तरश्रेणीस्थानां परस्परं विवाहः न शास्त्रविरुद्धः, किं तु सदाचारविरुद्धः।

(१११) अवान्तरश्रेणीषु विवाहो न युक्तः, आचारविरोधात् ।

(११२) उ०—ब्राह्मणादिजातिषु अवान्तरश्रेणीनां विवाहः शास्त्रदृष्ट्या दुष्टः, तथाहि, विदितसूत्रगोत्रयोः एकशाखासम्बद्धयोः अनुस्यूतसम्बन्धयोरेव पाणिग्रहः शास्त्रसम्मतः। अस्ति च प्राचीनैः कथ्यमाना एतद्विषयसमर्थनपरा कथा काचित् । कश्चन शिष्टमूर्धन्यः एलेश्वरोपाध्यायः स्वकन्यायै समुचितं वरमन्वेषमाणः औत्तरेभ्यो देशेभ्य आगताय विदितविद्याय ब्राह्मणवेषधारिणे कस्मैचिच्चाण्डालाय अविदिततद्वृत्तान्तः तां दत्वा अनन्तरं तद्वृत्तान्तं ज्ञात्वा तां सह तेन चण्डालेन निष्कासितां कृत्वा कृतप्रायश्चित्तः तदाप्रभृत्येव शिष्टसम्मत्या आन्ध्रदेशवर्तिनां ब्राह्मणानां वेलनाडू तेलगाण्यं इत्यादिशाखाविभागमारचयामास। अद्यापि च शिष्टाः वेलनाडूसम्बन्धिनः तेलगाण्यंशिष्टानां कन्याः न परिणयन्ति, नापि वा तेलगाण्यंशिष्टा वेलनाडूशिष्टकन्या विवाहयन्ति । अपि च सम्प्रदायभेदाच्च नैवावान्तरश्रेणीनां पाणिपीडनं शास्त्रसम्मतम् । तथाहि । सन्दृश्यन्ते किल दाक्षिणात्यानामान्ध्रदेशीयानां च सम्प्रदायभेदा बहवस्तथैव अन्यास्वपि शाखासु । अतः अवान्तरश्रेणीनां विवाहः न शास्त्रसम्मतः ।

(११३) उ०—परम्परानुसारेण वेदशाखासूत्रकुलधर्मकुलाचारमन्त्राचारविचारैः सदृशश्रेणीकानामेव परस्परं विवाहो योग्यः, तदुक्तं पराशरस्यमांगिरोभिः—

कुलमार्गेण चोद्वहेत्—इति ।

(११४) उ०—अवान्तरश्रेणीनां परस्परं विवाहो न शास्त्रसम्मतः, आचारविरुद्धत्वात् ।

(११५) उ०—आर्यावर्तवासिनो बहवो ब्राह्मणाः सम्मिलिताः सुखोपजीवनार्थं देशान्तराणि गत्वा तत्र समुदायीभूय सुखेन कालं नयन्ति स्म। तदानीं देशाद्देशान्तरगमने वाहनादिसौकर्याभावात् तत्तद्देशोचितवेषभाषाचारादीन् कल्पयित्वा न्यवसन्। कालपरिणामेन वंगाः, तैलंगाः, आन्ध्राः, द्राविडाः, कार्नाटाः, महाराष्ट्राः, कोङ्कणाः, माध्वा इति पृथक् पृथक् तत्तद्देशनाम्ना प्रसिद्धिं गताः। तस्माद्ब्राह्मणेषु अवान्तरजातिकल्पनमसंगतमेव। तेषां विवाहादिसम्बन्धकरणे को वा शास्त्रप्रतिषेध इति न ज्ञायते।

(११८) उ०—नारायणभट्टः,

स्वशाखी चेद्वरो न स्यात् कस्मै देया तु कन्यका।
स्वशाखोक्तविधानेन दद्यात्तां परशाखिने॥

इति धर्मप्रवृत्तौ उक्तवान्।

कुलं शीलं वपुर्विद्या वयो वित्तं सनाथता।
गुणाः सप्त वरे यस्मिंस्तस्मै कन्या प्रदीयते॥

इत्यादिवचनैः शास्त्रविरुद्धत्वावगमेऽपि परिस्थित्यनुसारेण अवान्तरश्रेणीषु परस्परं विवाहो योग्य एव।

(११९. १२०, १२१) उ०—परस्परं विवाहः शास्त्रविरुद्धो नास्ति।

(१२२) उ०—अवान्तरश्रेणीषु विवाहो न योग्यः।

(१२३) उ०—मातुलकन्यापरिणेतृव्यतिरिक्तावान्तरश्रेणीषु परस्परं विवाहसम्बन्धो योग्यः।

(१२४) उ०—द्राविडानां द्राविडेषु गौडानां गौडेषु विवाहो योग्यः, सर्वत्र समानाचारेषु विवाहो योग्य इति तत्त्वम्।

(१२५,१२६,१२७,१२८) उ०—अवान्तरश्रेणीषु विवाहो न योग्यः।

(१२९) उ०—अवान्तरश्रेणीनामुल्लेखस्तु कस्यामपि स्मृतौ नास्त्येव। महार्णवग्रन्थे तु तत्र जातीनां केवलं निवासदेशा एव कथिताः, तावतां च किमपि न निश्चितं भवति।

(१३२) उ०—अवान्तरश्रेणीष्वपि परस्परं विवाहो योग्यः।

(१३०) उ०—अवान्तरश्रेणीषु प्रमाणानि तावदुच्यन्ते। तथाहि। "शूद्राणामनिरवसितानामिति सूत्रे अवान्तरभेदं प्रकल्पयति पाणिनिस्तदनुगुणां लौकिकीं व्यवस्थां च। पतञ्जलिर्धर्मशास्त्रकाराश्चात्रानुकूलाः। मिताक्षरायां "गोपनापितकुम्भकारकुलमित्रार्धिकनिवेदितात्मानो भोज्यान्नाः" इत्युक्तम्। देवलका नाम अवान्तरो भेदः, तेषां परस्परं भेदाश्च सन्ति। तथा हि आगमप्रामाण्ये अत्रिः—"अवालुका देवलकाः, कल्पदेवलकाः, गणभोगदेवलकाः, भागवतवृत्तिरिति चतुर्थः, एते उपब्राह्मणाः" इति॥

(१३३) उ०—अवान्तरश्रेणीषु विवाहो न दोषाय।

(१३६) उ०—अवान्तरश्रेणीषु विवाहो न शास्त्रसम्मतः, आचारविरोधात्।

(१३७,१३८) उ०—अवान्तरश्रेणीषु विवाहसम्बन्धः शास्त्रीयः।

(१४३) उ०—न शास्त्रीयः।

(१४४) उ०—रूढ्या निषिद्धः।

(१४५) उ०—अवान्तरश्रेणयो हि द्विरूपाः, शास्त्रमूलाः कल्पिताश्च। कल्पना च प्रायेण रागद्वेषमूला। रागद्वेषौ च क्वचित् शास्त्रानुकूलौ क्वचिदतद्रूपौ च। शास्त्रमूलाः श्रेणयो नागरब्राह्मणेषु दृश्यन्ते। तथा दाक्षिणात्यौदीच्यानां विप्रत्तिपत्तिभेदस्य बौधायनोक्तस्य दर्शनादनुमीयते सारस्वतादिदशविधा ब्राह्मणश्रेणयश्च। एवं भेदमूलकविवाहाभावः शास्त्रीयभेदाख्यानादनुमितो नागरब्राह्मणविषये कण्ठतश्चोक्तः। कल्पिताश्च श्रेणयो या गौणमण्डले कान्यकुब्जमैथिलराढीयवारेन्द्रश्रेणयः, कायस्थादीनाञ्च काश्चिदवान्तरश्रेणयः, तासामन्योन्यं विवाहाभावः साक्षाच्छास्त्रतो न गम्यते, परमाचारतः प्रचरति। अस्याचारस्य मूलप्रतिज्ञानात् शास्त्रनिषिद्धाचरणप्रतिरोधाय परित्यागोऽपि भवितुमर्हति, यदि तत्र श्रेयोऽनुमन्येरन्निति।

(११६) उ०—

"भ्रातॄणामेकजातानामेकश्चेत् पुत्रवान् भवेत् ।"

इति मनुवचनप्रसङ्गेन दत्तकदीधितिदत्तकतिलकदत्तकसिद्धान्तमञ्जर्यादौ, निर्णयसिन्ध्वादौ, विवाहसम्बन्धयोग्यजातिविशेषविचारप्रसङ्गेन, सह्याद्रिखण्डे च पञ्चद्राविडपञ्चगौडाद्यवान्तरविभागस्य व्यवस्थापनपूर्वकं पुत्रादिदानप्रतिग्रहयोग्यत्वं तत्तदवान्तरश्रेणीनामेवेति व्यवस्थापनात्, स्कान्दे नागरखण्डे,

चतुर्वेदा अपि त्याज्या अन्यस्थानसमुद्भवाः ।
दैवे कर्मणि पित्र्ये च कन्यादाने विशेषतः ॥

इति स्थानभेदेन तत्तदवान्तरविभागमादायैव विवाहादिगुरुतरसम्बन्धव्यवस्थापनात्,

"अध्वर्यूद्गातृहोतॄणां सन्ति सूत्राण्यनेकशः ।
यत्रास्ते योनिसम्बन्धः सूत्रज्ञातिकुलोचितः ॥
विवाहे सोमश्राद्धे च अग्न्याधाने विशेषतः ।
एतैः स्वजातिभिः कुर्यादन्यथा पतितो भवेत् ॥"

इति बौधायनीयधर्मरहस्ये विवाहादौ सूत्रविशेषजातिविशेषकुलविशेषणामेव सम्बन्धो योग्यः, न तु ब्राह्मणत्वादिव्यापकजातिमादायेति निरूपणात्,

कन्यादाने तथा श्राद्धे कुलीनो ब्राह्मणस्सदा ।

इति कुलीनत्वस्य विशेषतोऽपेक्षितस्य परीक्षोपयोगितया कुलपञ्जिकादिरक्षणाद्यावश्यकत्वस्य कुमारिलपादादिभिरपि तन्त्रवार्तिकादौ विवेचनात्,

अन्येऽपि नागराः सन्ति वेदवेदाङ्गपारगाः ।
श्राद्धार्हा यज्ञयोग्याश्च कन्यायोग्या विशेषतः ॥
प्रधानत्वेन सर्वेषां नागरैश्चापि कृत्स्नशः ।
तेन ते गौरवं प्राप्ताः स्थानेऽत्रैव विशेषतः ॥

तस्माच्छ्राद्धं प्रकर्तव्यं विप्रैश्चाष्टकुलोद्भवैः ।
अप्राप्तौ चैव तेषां तु कार्यं नागरसम्भवैः ॥

इति गत्यन्तरासम्भव एव नागरेष्वेवावान्तरविभागान्तरेषु विवाह योग्यत्वोपपादनात्,

एवं ज्ञात्वा प्रयत्नेन श्राद्धे यज्ञे च पार्थिव ।
कन्यादाने विशेषेण योज्याश्चाष्टकुलोद्भवाः ॥

इति विशिष्य कन्यादाने तत्तदवान्तरकुलनियमावश्यकताया ज्ञापनात्, स्मृतिसारसमुच्चयेऽवान्तरविभागान्तरे विवाहकरणे दाक्षिणात्यानां गङ्गास्नानस्यान्येषां श्रीरामेश्वरयात्रायाश्च, अथ वा समाजदण्डस्य प्रायश्चित्तस्य व्यवस्थापनाच्च विवाहेऽवान्तरश्रेणीनियमो बहोः कालादनुवर्तमानोऽवश्यपरिपालनीयः । गत्यन्तराभावादतिव्याप्त्यावान्तरश्रेणीपरित्यागस्तु,

स्वशाखी चेद् वरो न स्यात् कस्मै देया तु कन्यका ।
स्वगृह्योक्तविधानेन दद्यात्तां परशाखिने ॥

इति वचनात् समाजानुमत्या नायोग्य इति तु वयं पश्यामः । सांप्रतं कथमपि वरालाभाद्यापत्तिनिर्णयस्तु तत्तदवान्तरसमाजाधीन एव, न तु तत्तद्व्यक्त्यधीन इति तु नियमोऽवश्यभावीति मन्यामहे ।

प्रथमप्रश्नोत्तरनिबन्धकारनामावलीसङ्ख्यानुरोधेनैवात्रापि निबन्धकाराणां नामानि ज्ञेयानि ।

* श्रीविश्वनाथः शरणम् *

अखिलभारतवर्षीय—

ब्राह्मणमहासम्मेलने

समालोचनीयप्रश्नावलीनामुत्तराणि ।

—:*:—

(६) षष्ठ प्रश्नः—धर्मज्ञाः के वा कीदृशं वा धर्मपरिवर्तनं कर्तुमर्हन्ति ? किं सङ्कोचनाख्यम् ? उत प्रवर्तनाख्यं धर्मपरिवर्तनम् ?

(१, २, ३, ४, ५, ६, ७, ८, ९, १०, ११, १२, १३, १४, १५, १६, १७, १८, १९) उत्तरम्—धर्मज्ञानां स्वार्थनिरपेक्षाणां श्रुतिस्मृतिपुराणादिपूर्वापरसंदर्भविदां सङ्कोचनाख्यं धर्मपरिवर्तनमेव कर्तुमर्हतेत्यत्र सर्वेषामैकमत्यम् । तिरुपतिविद्यालयपण्डितास्तु प्रायश्चित्तविषये प्रवर्तनाख्यमपि परिवर्तनं शक्तिपर्यालोचनानुसारेण कर्तुं शक्नुवन्तीति वदन्ति । शेखावाटीश्रीसीतारामशास्त्रिणस्तु धर्मस्य वेदमूलत्वात् न कीदृगपि परिवर्तनं धर्मज्ञाः कर्तुमर्हन्तीति वदन्ति । तेनालीवेंकटरामशास्त्रिणस्तु स्मृत्यर्थनिर्णय एवाधिकारो धर्मज्ञानाम्, न तु संकोचने प्रवर्तने वाधिकार इति वदन्ति । मायूरशिवरामकृष्णशास्त्रिणो नेदानींतनानां धर्मज्ञानां संकोचेऽप्यधिकारः, मन्वादीनां त्वासीदिति वदन्ति । मदनमोहनवेदान्तशास्त्रिणोऽपि न परिवर्तनं धर्मस्य युक्तमिति वदन्ति अन्यैस्तूत्तरं न दत्तम् ।

(२०,२१) उ०—किमपि न लिखितम् ।

(२२) उ०—मन्वादीनामेव परिवर्तनाधिकारोऽतीन्द्रियज्ञानशक्तिमतां नास्मदादीनामिति मन्यते ।

(२३) उ०—न किमपि लिखितम् ।

(२४) उ०—श्रुतिस्मृत्याद्यविरुद्धे धर्मपरिवर्तने धर्मज्ञा अधिकारिणः ।

(२५,२६) उ०—पूर्ववदेव।

(२७) उ०—धर्मज्ञानां संकोचन एवाधिकारः।

(२८) उ०—धर्मज्ञानां न परिवर्तनलेशोऽप्यधिकारः, स तु मन्वादीनामेव; इदानीं तु तदर्थनिर्णय एवाधिकारः।

(२९) उ०—धर्मानुष्ठातारो विज्ञाश्च धर्मज्ञाः संकोचे कालभेदेनावस्थाभेदेन च समर्थाः।

(३०) उ०—इदमेव मन्यते।

(३१) उ०—जीवानां धर्मज्ञानां न प्रवर्तनाख्यपरिवर्तनाधिकारः, किन्तु संकोचनाख्यधर्मपरिवर्तन एवाधिकारः।

(३२) उ०—

त्र्यवरा परिषत् ज्ञेया धर्मसंशयनिर्णये एवाधिकारः।
इति मनुवचनात् धर्मनिर्णय एवाधिकारः।

(३३) उ०—न किमपि लिखितम्।

(३४) उ०—कालशक्त्यनुसारिवेदशास्त्रार्थनिर्णय एव धर्मज्ञानामधिकारो न नूतनधर्मप्रवर्तने।

(३५) उ०—संकोचन एवाधिकारः।

(३६,३७) उ०—न किमपि लिखितम्।

(३८) उ०—मन्वादीनामेव परिवर्तनाधिकारः, नाधुनातनानाम्।

(३९,४०) उ०—न किमपि लिखितम्।

(४१) उ०—अधीतवेदशास्त्रा धर्मज्ञा धर्मनिर्णय एवाधिकारिणो न तु धर्माधर्मव्यवस्थापनायाम्, तत्र मन्वादीनामेवाधिकारात्।

(४२) उ०—संकोचन एवाधिकारः। तत्रापि नेदानींतनानामधिकारः।

(४३, ४४, ४५, ४६) उ०—प्रायश्चित्तादिसंकोचन एवाधिकारः।

(४७) उ०—मन्वादयो मुनय एव धर्मज्ञाः, ते संकोचनं परिवर्तनं च कर्तुमर्हन्ति।

(४६) उ०—इदानीन्तनानां धर्मपरिवर्तने धर्मसङ्कोचने च नाधिकारः।

न शक्यन्तेऽधुना कर्तुं शक्तिहीनैरिदन्तनैः।

इत्यादिवचनात्।

(५०) उ०—ऋषिभिस्तत्तुल्यैर्वा विना धर्मपरिवर्तने कापि न क्षमः।

(५१)उ०—देशकालपात्रानुसारेण कुत्रचित्सङ्कोचनं कुत्रचित्प्रवर्तनं च धर्मज्ञैः कर्तव्यम्।

(५२,५३) उ०—शक्तिहीनैरिदानीन्तनैः सङ्कोचनादिकं कर्तुमशक्यम्।

(५४) उ०—शास्त्रज्ञा यथावदाचरणशीला धर्मज्ञाः शास्त्रविरुद्धं प्रवर्त्तनाख्यं धर्मपरिवर्तनं कर्तुमर्हन्ति।

(५५) उ०-विष्णुस्मरणरूपं सङ्कोचनाख्यं धर्मपरिवर्तनं कर्तुमर्हन्ति।

(५६) उ०-धृतिक्षमादिमनूक्तधर्माचरणरताः वर्तमानपरिस्थित्यनुसारेण धर्मपरिवर्तनं कर्तुमर्हन्ति।

(५७,५८,५६,६०,६१,६२,६३) उ०—त्रिकालदर्शिन एव धर्मज्ञाः, ये च ऐहिकप्रतिष्ठार्थं कदर्थेन शास्त्रं व्याख्याय स्वधर्मं प्रचारयन्ति ते दण्ड्याः, न तु धर्मज्ञाः।

(६४) उ०-स्वस्वजातिमनतिक्रम्य धर्मपरिवर्तनं युक्तिसहम्।

(६६) उ०-नियमनिषेधविधिविहितधर्मेतरधर्मं वेदार्थाविरोधिना तर्केण वेदधर्मोपदेशानुसन्धायिनस्ते धर्मज्ञाः संकोचयितुमर्हन्ति।

(७७) उ०-मीमांसारीत्या धर्मपरिवर्तनं युक्तम्।

७६) उ०-श्रुतिस्मृत्युदीरितं धर्ममाचरन्तो येऽन्यानुपदिशन्ति ते खलु धर्मज्ञा मन्यन्ते। अत एव के वयं धर्मपरिवर्तनकर्तारः, तादृशज्ञानाभावात्।

(८०) उ०-संकोचनाख्यं धर्मपरिवर्तनं कर्तुमर्हन्ति।

(८३) उ०-वानप्रस्थादानरूपं प्रवर्तनाख्यं धर्मपरिवर्तनं कर्तुमर्हन्ति।

अपि च "चण्डालः श्वपचःक्षत्ता" इत्यादि, "रजकश्चर्मकारश्च" इत्यादिजातिभिन्नानां तन्तुवायसूत्रधारप्रभृतिजाति-

विशेषाणां वर्तमानपरिस्थित्यनुसारेण सच्छूद्रान्तर्गतत्वेन जात्युत्कर्षविषये न क्षतिर्भविष्यति। तत्स्पृष्टजलपाने शास्त्रतो विशेषदोषाश्रवणादिति।

(१००) उ०- इदानीं यादृशधर्माचरणं भवति, तदालोचनेन प्रायश एव ब्राह्मणादीनां सन्ध्यादिवर्जनं दृष्टम्, किम्बहुना आहारादावपि अन्यथाचरणं सर्वथा दृष्टम्, अतोस्य संकोचे महाननर्थः सम्भवति, अतः सन्ध्यावन्दनादिकं यथायोग्यं आहारादावपि संयमनं स्वीकर्तुमुचितम्।

(१०१) उ०-इतिहासतत्वज्ञाः समाजहितनिर्धारणसमर्था धर्मज्ञाः सर्वविधमपि धर्मपरिवर्तनं कर्तुमर्हन्ति। तच्च परिवर्तनं न परिवर्तनं, किं तु सनातनधर्ममूलतत्वानुसारेण वर्तमानावस्थायां तस्य समाजोपकारितासम्पादनमेव।

(१०७) उ०-धर्मस्य सनातनत्वेन संकोचनाख्यं प्रवर्तनाख्यं वा परिवर्तनं न सम्भवति।

(१०८) उ०-मन्वादय एव धर्मज्ञाः।

(१०६) उ०-चत्वारो वेदधर्मज्ञा इत्यादिवचनोक्ता परिषत् यत्किञ्चिदपि धर्मपरिपर्तनं कर्तुमर्हति, नान्यः।

(११०) उ०-मन्वादय एव धर्मज्ञाः, यत्कृतव्यवस्थानुसरणमेवास्माभिः कर्तव्यं, न परिवर्तनादि।

(१११)उ०-मन्वादय एव धर्मज्ञाः,अत एव "धर्मज्ञसमयः प्रमाण"मित्यापस्तम्बसूत्रे "धर्मज्ञा मन्वादय" इति व्याख्यातं हरदत्तेन।

(११२) उ०—स्मृतिकारा मनुपराशरयाज्ञवल्क्यप्रभृतयः श्रीशङ्करप्रमुखा अवतारपुरुषाः धर्मज्ञाः तेषामपि संकोचनाख्य एव धर्मपरिवर्तनेऽधिकारः।

(११३) उ०—शास्त्रानुसारिधर्मानुष्ठानशक्ताः धर्मज्ञाः, ते धर्मपरिवर्तनं कर्तुमर्हन्ति।

(११५) उ०—त्रैविद्यवृद्धा धर्मज्ञाः। वेदधर्मशास्त्रानुसारेण सङ्कोचनं प्रवर्तनं वा ते कर्तुमर्हन्ति।

(११७) उ०—परिस्थितिपर्यालोचनेन तत्तत्कालोचितान् धर्मान् ज्ञात्वा प्रवर्तयन्ति ये त एव धर्मज्ञाः। मनुमरीच्यादयो हि धर्मज्ञाः तत्कालीनपरिस्थित्यनुसारेण वर्णाश्रमान्धर्मान् मुख्यत्वेन परिवर्त्य व्यवस्थापितवन्तः। तदुक्तं मुण्डकोपनिषदि, आगमशास्त्रे च,

"मन्त्रेषु कर्माणि कवयो यान्यपश्यन्।
तानि त्रेतायां बहुधा सन्ततानि" इति।

अस्मिन् कलियुगे एतत्कालोपयोगितया ये ये धर्मान् परिवर्तयन्ति त एव धर्मज्ञाः। एते संकोचेन विकोचेन वा प्रवर्तनेन वा निवर्तनेन वा सर्वथा धर्मान् परिवर्तयितुमर्हन्ति।

(१२१) उ०—पूज्यानां धर्मज्ञानां अहिन्दुहिन्दुकरणाख्यधर्मपरिवर्तनेऽधिकारः।

(१२२) उ०—प्राचीनपक्षः।

(१२२) उ०—जगद्गुरुपीठाधिपतयो धर्माधिकारिणश्च धर्मपरिवर्तनं कर्तुमर्हन्ति।

(१२४,१२५,१२६,१२७,१२८) उ०—प्राचीनपक्षः।

(१२६) उ०—ऐतिहासिका एव धर्मज्ञाः। इतिहासदृष्ट्या च धर्मपरिवर्तनं सर्वविधमेव योग्यम्। तथा चोक्तं महाभारते राजधर्मानुशासनपर्वणि,

युधिष्ठिर उवाच—इमे वै मानवाः सर्वे धर्मं प्रति विशंकिताः।
कोऽयं धर्मः कुतो धर्मस्तन्मे ब्रूहि पितामह॥
धर्मस्त्वयमिहार्थः किममुत्रार्थोऽपि वा भवेत्।
उभयार्थोऽपि वा धर्मस्तन्मे ब्रूहि पितामह॥

भीष्म उवाच—लोकयात्रार्थमेवेह धर्मस्य नियमः कृतः।
उभयत्र सुखोदर्क इह चैव परत्र च॥

इत्यादिवचनैः स्पष्टमेव धर्मस्य दृष्टार्थत्वमवगम्यते।

(१३६,१३७,१४१) उ०—प्राचीनपक्षः।

(१४२) उ०—पञ्चायतनसभाधिष्ठातारो धर्मज्ञाः तेयं कमपि समाजच्युतं समाजप्रविष्टं च कर्तुमर्हन्ति।

(१४३,१४४) प्राचीनपक्षः।

(१४५) उ०—साक्षात्कृतधर्माणो योगर्द्धिसम्पन्ना धर्मपरिवर्तनं कर्तुमर्हन्ति। अलूक्षा धर्म्मकामाः शास्त्रार्थतत्वज्ञा वैदेशिकशिक्षया विकृतमतित्वमप्राप्ताः स्वयमाचारवन्तश्च ब्राह्मणाः साधवस्ते सङ्कोचनाख्यं धर्म्मपरिवर्तनं कर्तुमर्हन्ति। सङ्कोचनमपि द्विविधं, निवर्तनरूपं प्रवर्तनरूपञ्च। तत्राद्यं यथा कलिवर्ज्यप्रकरणोक्तं, अन्त्यं यथा शूद्रादिनां क्वचिदुक्तदशाहाशौचादिप्रवर्त्तनरूपं मासाशौचसङ्कोचनम्। प्रवर्तनरूपं सङ्कोचनन्तु नेदानीन्तना अर्वाग्दृशः कर्तुमर्हन्ति।

(११६) उ०—स्वार्थनिरपेक्षा धर्मकामा भगवदाम्नायादिपरतन्त्रा धर्मज्ञा मन्वादयो धर्मसंकोचने, परिषत्तु :पूर्वापरसंदर्भशक्त्यशक्त्यादिविवेचनेन व्यक्तिविशेषानुष्ठेयप्रायश्चित्तादिव्यवस्थायां चाधिकारिणः। सामान्येन कालविशेषादिपुरस्कारेण कलिवर्ज्यप्रकरणादिकमिव व्यवस्थापयितुं न पण्डितपरिषदपि मन्वादय इव प्रभवतीति तु निष्कर्षः।

——:*:——

प्रथमादिचतुर्थान्तप्रश्नोत्तर-

परिशिष्टम् ।

---:※:---

(१४८) उ०—अ० नारायणचार्य विदुषाम् ।

प्राचीनपक्षः । मनुः—

वृषलीफेनपीतस्य निःश्वासोपहतस्य च ।
तस्यां चैव प्रसूतस्य निष्कृतिर्न विधीयते ॥

(१४६) उ०—को० रङ्गाचार्याणाम् ।

प्राचीनपक्षः ।

(१५०) उ०—श्रीचन्द्रनारायणभट्टाचार्याणाम् ।

कन्याशब्दो विवाहितास्वपि प्रयुज्यते ।
कन्यामपि पतिर्भार्यां रक्षेद्यत्नेन मानवः ॥

इति जाबालिवचनात् । अतः कन्यादाने रजोदर्शनात्पूर्वं एव कालः ।

(१५१) उ०—बी० राम शास्त्रिणाम् ।

(१५२) उ०—रूपावतारं श्रीशेषशास्त्रिणाम् ।

(१५३) उ०—घंडिकोटसुब्रह्मण्यशास्त्रिणाम् ।

(१५४) उ०—कनुपर्ति मार्कण्डेयशर्मणाम् ।

(१५५) उ०—मल्लादि वेंकटविश्वनाथशर्मणाम् ।

(१५६) उ०—श्रीप्रमेशचन्द्रभट्टाचार्य काव्यतीर्थसांख्यविनोदस्मृतिवाचस्पतीनाम् ।

प्राचीनपक्षः ।

(१५७) उ०—श्रीलक्ष्मीकान्तदेवगोस्वामिविद्याविनोदानाम् ।

(१५८) उ०—श्रीरूपेश्वरस्मृतिरत्नानाम् ।

(१५९) उ०—श्रीउपेन्द्रचन्द्रतर्काचार्याणाम् ।

(१६०) उ०—प्रबन्धकाराणां नाम न लिखितम् ।

(१६१) उ०—श्रीमहेन्द्रनाथसांख्यस्मृतिरत्नानाम् ।

(१६२) उ०—श्रीयमुनाप्रसादशर्मणाम् ।

(१६३) उ०—श्रीलक्ष्मणप्रसादशर्मणाम् ।

(१६४) अखिलभारतवर्षीयमारवाडीब्राह्मणमहासभायाः ।

(१६५) उ०—पं० शिवानन्द ब्रह्मचारिणाम् ।

प्राचीनपक्षः ।

(१६६) उ०—पं० सदाशिवशास्त्रि मुसलगांवकर महोदयानाम् ।

ब्रह्मपुराणे गौतमीमाहात्म्ये,

भानुरुवाच—

चतुर्थाद्वत्सरादूर्ध्वं यावन्न दशमात्ययः ।
तावद्विवाहः कन्यायाः पित्रा कार्यः प्रयत्नतः ॥

इति वचनन्तु शूद्रादिपरम् ।

(१६७) उ०—शास्त्रतिलकश्रीयज्ञस्वामिशास्त्रिणाम् ।

अत्र विषये किमपि न लिखितम् ।

(१६८) उ०—श्री० खेन्धरत्रिपाठिनाम् ।

प्राचीनपक्षः ।

(१६९) उ०—श्रीश्यामसुन्दरझामहोदयानाम् ।

ब्रह्मपुराणे,

कृते-विवाहे वर्षन्तु वस्तव्यं ब्रह्मचारिणा ।
यद्यष्टवर्षा कन्या स्यात् तथा तत्त्रिगुणः पुमान् ॥
अथ वा द्वादशाहानि त्रिंशद्वर्षेण सर्वदा ।

यदि द्वादशवर्षा स्यात् कन्या रूपगुणान्विता ॥
त्रिंशद्वर्षेण पूर्णेन यदि षोडशवार्षिकी ।
लब्धा तदा तु षड्रात्रं वस्तव्यं संयमेन तु ।
विंशत्यब्दा यदा कन्या वस्तव्यं तत्र वै त्र्यहम् ॥
अत उर्ध्वमहोरात्रं वस्तव्यमिति सम्मतम् ॥ इति ।

(१७०) उ०—श्रीचन्द्रशेखरब्रह्मसांख्यवेदान्ततीर्थसाहित्योपाध्यायानाम् ।

(१७१) उ०—गोस्वामिकुलकौस्तुभश्री १०८ गोकुलनाथशर्ममहास प्रतिनिधीनां देवर्षि पं० रमानाथशर्मणाम् ।

प्राचीनपक्षः ।

(१७२) उ०—आर्यसोमयाजिनाम् ।

नवीनपक्ष एव ।

(१७३) उ०—कूड्लिगीनिवासिनां विंक्री रामण्णाशास्त्रिणाम् ।

(१७४) उ०—नन्यालग्रामवासिना बी० रामशास्त्रिणाम् ।

(१६५) उ०—वादिमत्तेभकण्ठीरवसिंहाद्रयप्पमाचार्याणाम् ।

प्राचीनपक्षः ।

(१७६) उ०—विजयनगरनिवासिनां सरिपल्लीसन्नय्याशास्त्रिणाम् ।

परिस्थित्यनुसारिविचारः ।

(१७७) उ०—वेमूरि नृसिंहशास्त्रिणां शतावधानिनाम् ।

प्राचीनपक्षः ।

एतदतिरिक्ता अपि स्वतन्त्रविषयानधिकृत्य प्रेषिताः प्रबन्धा बहवो वर्तन्ते । समयाभावात्स्वतन्त्रविषयत्वाच्च तेषां संग्रहोऽत्र न कृतः ।

पञ्चमप्रश्नोत्तरपरिशिष्टम् ।

(१५१,१५२,१५३) उ०—प्राचीनपक्षः ।

(१५४) उ०—अवान्तरश्रेणीषु आहारविहारभेदाभावे विवाहो न दोषाय।

(१५७) उ०—प्राचीनपक्षः ।

(१५६) उ०—अवान्तरश्रेणीषु परस्परं विवाहसम्बन्धो योग्यः ।

(१६०) उ—ब्राह्मणादिजातिषु स्वापेक्षया नीचश्रेणीजातकन्यायाः स्वेन सह विवाहः शास्त्रसिद्धः । यथाह मनुः "स्त्रीरत्नं दुष्कुलादपि" इति ।

(१६१,१६२) उ०—न कश्चिद्दोषः ।

(१६४) उ०—प्राचीनपक्षः ।

(१६५) उ०—न कश्चिद्दोषः ।

(१६६) उ०—"नमस्तक्षभ्यो रथकारेभ्यश्च वो नम" इत्यादिश्रुतौ बहूनां जातिभेदानां नाम वर्तते, तथा ब्राह्मणेष्वपि जातिभेदप्रतिपादिका याजुषी श्रुतिराधानविषयिणी लभ्यते । "भृगूणां त्वाङ्गिरसां व्रतपते व्रतेनादधामीति भृग्वंगिरसामाहध्यात् । आदित्यानां त्वा देवानां व्रतपते व्रतेनादधामीत्यन्यासां ब्राह्मणीनां प्रजानाम्" इत्यादिः । तथा विष्णुपुराणे तृतीयेंऽशे तृतीयाध्याये,

वेदवृक्षस्य मैत्रेय शाखाभेदः सहस्रशः ।
न शक्यो विस्तराद्वक्तुं संक्षेपेण शृणुष्व तम् ।

इति । किं च विवाहे आचारस्य प्राधान्यं श्रुतावुक्तं "विवाहश्मशानयोर्ग्रामं प्रविशतात्" इति । वृद्धस्त्रियः पूर्वं पुरुषैरनुष्ठीयमानं सदाचारं स्मरन्ति, तस्मात् विवाहश्मशानयोः सदाचारबोधकं तासमपि वचनं प्रमाणत्वेन स्वीकर्तव्यमिति श्रुत्यर्थः। आचाराश्च तेषां विभिन्नाः । यथा तैलङ्गेषु मातुलसुतापरिणयः,

इतरेषु मातुलसुतापरिणये प्रायश्चित्तम्। वाजसनेयिषु मातुलगोत्रमपि विचिन्त्यते विवाहे। पंचद्राविडान्तर्गता एव गुर्जराः, परं तेषु स्त्रीणां मुक्तकच्छत्वम्। ततश्च सदातनसदाचारस्थितिरक्षणाय पूर्वजक्षुण्णोऽयं पन्थाः बलवदापदं विना न हेयः।

(१६८, १६६, १७०, १७१) उ०—प्राचीनपक्षः।

षष्ठप्रश्नपरिशिष्टम्।

(१४८, १४६, १५२, १५३, १५४, १५५, १५८, १५६, १६०, १६१, १६२, १६३, १६४, १६५, १६६,) उ०—प्राचीनपक्षः।

(१६७)—प्राचीनपक्षानुकूलः प्रबन्धः।

(१६८, १६६, १७०, १७१,) उ०—प्राचीनपक्षः।



* श्रीविश्वनाथः शरणम् *

द्वितीयो भागः।

अखिलभारतवर्षीय—

ब्राह्मणमहासम्मेलने

समालोचनीयप्रश्नावलीनामुत्तराणि।

(७) सप्तमः प्रश्नः—विधवाविवाहो दम्पत्योर्विवाहमोक्षश्च शास्त्रदृष्ट्या-योग्यः. उताविरुद्ध आहो निन्द्यः?

(१, २, ३, ४, ५, ६, ७, ८, ९, १०, ११, १२, १३, १४, १५, १६, १७, १८, १९, २०, २१, २२, २३, २४, २५, २६, २७, २८, २९, ३०, ३१ ३२, ३३, ३४, ३५, ३६, ३७, ३८, ३९, ४०, ४१, ४२, ४३, ४४)

उत्तरम्—द्विजविधवानां विवाहो नियोगो वा न केवलं शास्त्रासिद्धः, किन्तु निन्द्य इति सर्वेषामेतेषामग्रेतनानां च सम्मतम्।

(अग्रेतननिबन्धेषु विशेषांशः परं लिख्यते।)

(४५) उ०—

न निष्क्रयविसर्गाभ्यां भर्तुर्भार्या विमुच्यते।

इति मनुवचनात् विधवाविवाहस्त्रीपुंविवाहमोक्षयोर्निन्द्यतावगम्यते।

(५१) उ०—

अज्ञातश्च द्विजो यस्तु विधवामुद्वहेद्यदि।
परित्यज्यैव वै तां च प्रायश्चित्तं समाचरेत्॥

इति लघ्वाश्वलायनस्मृतिः।

(५५) उ०—

हीनवर्णोपभुक्ता या त्याज्या वध्यापि वा भवेत्।

इति बृहस्पत्यादिवचनतर्यालोचनया दम्पत्योर्विवाहमोक्षः प्रतीयते।

कुक्कुरमुण्डासंस्थानाधिपति



हरिभक्तिपरायण श्रीसन्तोजी महाराज।

(५८) उ०—वायवीयसंहिता;

मृते जीवति वा पत्यौ न सुतो देवरादितः ।
क्रान्तसप्तपदा कन्यां नोद्वहेच्च कलौ युगे ॥

यत्तु बृहस्पत्यादिवचनानि । बृहस्पतिः,

विवाहेच्छा यदा स्त्रीणां भर्तृनाशे प्रजायते ।
पुनरक्षतयोनीनां विवाहकरणं मतम् ॥

गौतमः,

मरणानन्तरं भर्तुः यद्यनाहतयोनयः ।
स्त्रियो विवाहमिच्छन्ति नात्र कार्या विचारणा ॥

वसिष्ठः,

पाणिग्राहे मृते बाला केवलं मन्त्रसंस्कृता ।
सा चेदक्षतयोनिः स्यात्पुनःसंस्कारमर्हति ॥

नारदः,

नष्टे मृते प्रव्रजिते क्लीबे च पतिते पतौ ।
पञ्चस्वापत्सु नारीणां पतिरन्यो विधीयते ॥

इत्यादीनि, तानि कलीतरयुगपराणि, स्मृतिप्रमाणस्य युगान्तरविषयत्वेन निर्विषयत्वाभावात् निरवकाशेन पौराणिकवचनेन बाधस्यावश्यकत्वात्, 'आनर्थक्यप्रतिहतानां विपरीतं बलाबलम्' इति न्यायात्। प्रकृते तु स्मृतिवचनमप्युपन्यस्तमेव । 'नष्टे मृते' इत्यादि पराशरवचनं तु वाग्दत्तविषयम्। अन्ये तु पराशरवचने व्यभिचारोपदेशं वर्णयन्ति। तथाहि । यासां जातीनां जीवत्यपि भर्तरि व्यभिचारिण्याः स्त्रियाः पापापनोदार्थः प्रायश्चित्तपरित्यागव्यवहारो न कुलधर्मः, केवलं स्वजातिकुटुम्बादीनां भोजनेन परितोषणमेव दोषक्षालनं, तदुद्दृशेनैव 'पतिरन्यो विधीयते' इति। ब्राह्मणक्षत्रियवैश्यसच्छूद्राणां तु वैधव्यमाप्तानां स्त्रीणां वैधव्यपरिपालनमेव धर्मः ।

न द्वितीयश्च साध्वीनां क्वचिद्भर्तोपदिश्यते ।

इति वचनात् ।

(६०) उ०—विधवाविवाहे गोत्रोल्लेखः कथं भविष्यति ।

(६४) उ०—विधवाविवाहो युगमाहात्म्येन शास्त्रसम्मतः ।

(६८) उ०—

अपुत्रेण सुतः कार्यो यादृक् तादृक् प्रयत्नतः ।
पिण्डोदकक्रियाहेतोर्नामसंकीर्तनाय च ॥

इति मनुवचनात्,

एष्टव्या बहवः पुत्रा यद्येकोपि गयां व्रजेत् ।

इति वचनाच्च पुरुषैरिव स्त्रियाऽपि पुत्रार्थं बहुपुत्रार्थं वा प्रयत्नः कार्यः । एवं च यासां विधवानां पुत्रार्थं वहुपुत्रार्थं वा अनुरागो वर्तते तासामेव विवाहः शास्त्रसम्मत इति प्रतीयते । एवं च कलिवर्ज्यप्रकरणं तदितरविधवापरम् । यत्तु,

एतानि लोकगुप्त्यर्थं कलेरादौ महात्मभिः ।
निवर्तितानि कार्य्याणि व्यवस्थापूर्वकं बुधैः ॥

इत्यादित्यपुराणवचनेन कलौ तन्निषेधश्रवणं, तत् यत्र यत्र विधवाविवाहे परमायुःक्षयहेतुभूतत्वादिना लोकक्षयसम्भावना वर्तते तत्परम्, न तु प्रजोत्पादननिमित्तीभूतपुनर्विवाहमात्रपरम्, अन्यथा "एतानि लोकगुप्त्यर्थ" मितिहेतुकथनानुपपत्तेः । अत एवाशौचनिर्णये, "तत्र सजातीयपरपूर्वाभार्याप्रसवमरणयोः संग्रहीतुस्त्रिरात्राशौचम्,

परपूर्वासु भार्यासु पुत्रेषु कृतकेषु च ।
त्रिरात्रं स्यात् तथाऽऽचार्ये स्वभार्यास्वन्यगासु च ॥

इति कौर्मात् । अतएव महामहोपाध्यायरघुनन्दभट्टाचार्येण शुद्धितत्त्वे "वस्तुतस्तु प्रागुक्तादित्यपुराणात् कलौ क्षेत्र-

जपुत्रकरणनिषेधात्, स च पुत्रो बीजिनामेव, इदानीं व्यवहारोऽपि तथा" इत्युक्तम्। बृहस्पतिः,

अन्याश्रितेषु दारेषु परपत्नीसुतेषु च।
मृतेष्वाप्लुत्य शुद्ध्येत्तु त्रिरात्रेण द्विजोत्तमः॥

इति शुद्धिचिन्तामणिः। शूलपाणिमहामहोपाध्यायेनापि,

दद्युस्ते बीजिने पिण्डं माता चेच्छुल्कतो हृता।

इति, तदेतच्छुल्केन स्त्रीसंग्रहणे बोद्धव्यमिति लिखितम्।

एवं च,

नष्टे मृते प्रव्रजिते क्लीबे च पतिते पतौ।
पञ्चस्वापत्सु नारीणां पतिरन्यो विधीयते॥

इति पराशरवचनेनाप्यानुकूल्यं प्रदर्श्यते। किं तु स विधवाविवाहोऽप्रशस्तः, तस्यां धर्मपत्नीत्वाभावात्, तस्यां जातपुत्रस्यौरसत्वाभावाच्च। किं च,

परपूर्वा यस्य गेहे भार्या स्यात्तत्र नित्यशः।
आशौचं सर्वकार्येषु देहे भवति नित्यशः।
दानं प्रतिग्रहः स्नानं सर्वं तस्य वृथा भवेत्॥

इति ब्रह्मपुराणवचनेन निन्दा श्रूयते।

(६६) उ०—शूद्रादिजात्यधमश्रेणीषु विधवादिस्त्रीणां पुरुषासक्ततया भ्रूणहत्यादिपापैर्जगत्परिप्लुतं जायते, ब्राह्मणादिजातिष्वपि एतद्भयादेव वर्तमानसमयानुसारेण तासां पुरुषान्तरग्रहणनियमपद्धत्या भागवतधर्माचरणजन्यभिन्नजात्यन्तराश्रयणेनानुग्रहः कार्यः, न तु स्वधर्मनिरतानां विधवानां एतादृशी व्यवस्था।

(७३) उ०—

अपत्यलोभाद्या तु स्त्री भर्तारमतिवर्तते।
सेह निन्दामवाप्नोति पतिलोकाच्च हीयते॥

इति वचनात्, बृहन्नारदीये,

देवराच्च सुतोत्पत्तिर्दत्ता कन्या न दीयते,
इति वचनाच्च विधवाविवाहो न योग्यः।

(७४) उ०—पद्मपुराणे पृथिवीखण्डे दिव्यादेव्युपाख्यानेपि यथा,

विवाहो दृश्यते राजन् कन्यायास्तु विधानतः।
पतिर्मृत्युं प्रयात्यस्या नो चेत्सङ्गं करोति च॥
महाधिव्याधिना ग्रस्तस्त्यागं कृत्वा प्रयाति च।
प्रव्राजितो भवेद्राजन् धर्मशास्त्रेषु दृश्यते॥
अनुद्वाहितायाः कन्याया उद्वाहः क्रियते बुधैः।
न स्याद्रजस्वला यावदन्यः पतिर्विधीयते॥
विवाहं तु विधानेन पिता कुर्यान्न संशयः।
एवं राजन्समादिष्टं धर्मशास्त्रं बुधैर्जनैः॥

इति वचनैर्वाग्दत्ताया एव पत्यादिमरणे विवाहान्तरं गम्यते। "नष्टे मृते" इत्यादिवचनं नारदस्मृतौ राजनीतिप्रकरणे वर्तते, अतस्तस्य विधवायाः पुरुषान्तराश्रयणे राजदण्डाभावमात्रपरत्वम्। किं च पराशरसंहिताया द्वितीयाध्याय एव कलिधर्मा उच्यन्ते, न तु समग्रपुस्तकं कलिपरम्। अन्यथा,

अतः परं गृहस्थस्य धर्माचारं कलौ युगे।

इत्यादिद्वितीयाध्यायोक्तविशेषनिर्देशो व्यर्थः स्यात्। द्वितीयाध्यायात्परं क्षेत्रजपुत्राश्वमेधयज्ञादीनां युगान्तरधर्माणां विधानेन च तथा प्रतीयते। अतः "पतिरन्यो विधीयते" इत्यादिवचनं न कलिपरं, किन्तु युगान्तरपरम्। पुनर्विवाहिता विधवापुनर्भूपदवाच्या, तद्गर्भजातः पुत्रः पौनर्भवः, स च कलौ निषिद्धः, एतेनापि पराशरवचनं कलीतरपरमिति वक्तुमुचितम्। भार्गवीयकर्मविपाके च,

क्लीबं वा दूषितं वापि व्याधितं वृद्धमेव वा।
सुस्थितं दुःस्थितं वापि पतिमेकं न लङ्घयेत्॥

या भर्तारं परित्यज्य जारं चरति दुर्मतिः।
उलूकी जायतेऽरण्ये वृक्षकोटरशायनी॥
पुरा विप्रकुले जाता सर्वावयवसुन्दरी।
विरूपं स्वामिनं सा तु दृष्ट्वा यौवनगर्विता॥
दिवा निन्दति दुर्वाक्यैः शय्यां न लभते निशि।
तेन दोषेण वैदेहि वैधव्यत्वमुपागता॥

इत्यादिना स्पष्टमेव विधवाविवाहः पत्यादिमरणेऽपि निषिद्ध इत्यवगम्यते।

(६७) उ —एतावुभावेव शास्त्रदृष्ट्या विरुद्धौ। तथाहि। "मृते भर्तरि ब्रह्मचर्यं तदन्वारोहणं वा" इति विष्णुसूत्रेण विधवास्त्रीणां ब्रह्मचर्यरक्षणस्य उक्तत्वात्, तथा,

तैलाभ्यङ्गं न कुर्वीत न हि पश्यति दर्पणम्।
मुखं च परपुंसां च यात्रानृत्यं महोत्सवम्॥
नर्तकं गायनं चैव सुवेशं पुरुषं शुभम्।

इति ब्रह्मवैवर्ते-(श्रीकृष्णजन्मखण्डे ८३ अध्याये) वचनेन परपुरुषमुखदर्शनस्यापि निषिद्धत्वाच्च विधवाविवाहः कैमुतिकन्यायेन दूरमपसारितः। एवं,

असद्वंशप्रसूता या दुःशीला धर्मवर्जिता।
मुखदुष्टा योनिदुष्टा पतिं निन्दति कोपतः॥
या स्त्री द्वेष्टि सर्वपरं पतिं विष्णुसमं गुरुम्।
कुम्भीपाके पचति सा यावदिन्द्राश्चतुर्दश॥
व्रतं चानशनं दानं सत्यं पुण्यं तपश्चिरम्।
पतिभक्तिविहीनाया भस्मीभूतं निरर्थकम्॥

इति ब्रह्मवैवर्ते (श्रीकृष्णजन्मखण्डे ५७ अध्याये)। तथा,

यस्य भार्या श्रितान्यत्र परवेश्माभिकाङ्क्षिणी।
कुक्रिया त्यक्तलज्जा च सा जरा न जरा जरा॥

इति गारुडेनीतिसारे (१०८, १०६ अध्याये)। तथा,

कुत्सितं पतितं मूढं दरिद्रं रोगिणं जडम्।
कुलजा विष्णुतुल्यं च कान्तं पश्यति सन्ततम् ॥

इति ब्रह्मवैवर्ते (गणेशखण्डे ४० अध्याये)। इत्यादिभिर्वचनैः स्त्रीणामन्यसंसर्गेण योनिदूषणस्य पत्युर्निन्दनकोपनद्वेषणानां पत्यौ भक्तिहीनत्वस्य पत्युराश्रयत्यागेन अन्यगृहाभिलाषित्वस्य च निन्दार्थवादमूलकनिषेधविधिकल्पनया निषिद्धत्वेन, कुत्सित-पतितादेरपि पत्युर्विष्णुतुल्यत्वदर्शनाभिधानेन तत्परित्यागो निषिद्धः। पतिं प्रति कोपद्वेषादिकं विना विष्णुतुल्यदर्शने च तत्परित्यागोऽसम्भवीति ज्ञेयम्। एवं पुंसामपि।

अनपत्यां च युवतिं कुलजां च पतिव्रताम्।
त्यक्त्वा भवेद्यः संन्यासी ब्रह्मचारी यतीति वा ॥
वाणिजो वा प्रवासी वा चिरं दूरं प्रयाति यः।
तीर्थं वा तपसे वापि मोक्षार्थं जन्म खण्डितुम्।
न मोक्षस्तस्य भवति धर्मांश्च स्खलनं ध्रुवम् ॥
अभिशापेन भार्याया नरकं च परत्र च ॥

इति वैवर्ते-(श्रीकृष्णजन्मखण्डे ११२ अध्याये) वचनेन संन्या-साद्यर्थमपि भार्यापरित्यागस्य निषिद्धत्वेन, तथा,

बहुदारः पुमान्यस्तु रागादेकां त्यजेत्स्त्रियम्।
स पापभाक् स्त्रीजितश्च तस्याशौचं सनातनम् ॥

इति कालिकापुराणवचनेन (२० अध्याये) अन्यस्त्र्यनुरागा-द्भार्यात्यागस्य निषिद्धत्वेन, तथा,

क्रोधाद्यदि त्यजेद्भार्यां वयःस्थां च गुणाधिकाम्।
ऋषिचान्द्रायणं कृत्वा पुनः संग्रहमादिशेत् ॥

इति प्रायश्चित्ततत्त्वधृतमत्स्यतन्त्रवचनेन क्रोधादनापि भार्या-त्यागस्य निषिद्धत्वेन, तथा,

न त्यागोऽस्ति द्विषन्त्याश्च न च दारापवर्तनम् ।

इति मनुवचनेन (अध्याये ६) द्विषन्त्या अपि भार्यायास्त्यागस्य निषिद्धत्वेन, तथा

न निष्क्रयविसर्गाभ्यां भर्तुर्भार्या विमुच्यते । इति,

तथा नित्यं यतेयातां स्त्रीपुंसौ तु कृतक्रियौ ।
यथा नाभिचरेतां तौ वियुक्तावितरेतरम् ॥

इत्यनेन विक्रयत्यागाभ्यामपि भार्यात्वमोक्षाभावस्य इतरेतरत्यागेन स्थित्यभावस्य चाभिहितत्वेन, तथा,

पितृपुत्रसुहृद्भ्रातृदम्पत्याचार्यशिष्यकाः ।
एषामपतितानां तु त्यागी च शतदण्डभाक् ॥

इति प्रायश्चित्ततत्त्वधृतयाज्ञवल्क्यवचनेन पातित्यं विना दाम्पत्यसम्बन्धत्यागे दण्डविधानेन च दम्पत्योर्विवाहमोक्षः शास्त्रदृष्ट्या विरुद्ध एव ।

(६८) उ०—"उदीर्ष्व नारी"इति मन्त्रस्य "तामुत्थापयेद्देवरः पतिस्थानीयः अन्तेवासी जरद्दासो वा उदीर्ष्व नार्यभिजीवलोक" मित्याश्वलायनकृतविनियोगदर्शनात्, मृतपतिकायाः सहमरणेच्छोः सति शिशुपुत्रादौ तत्प्रतिपालनार्थं पुनः प्रत्यानयन एव तात्पर्यं ज्ञायते । दिधिषोः गर्भस्य निधातुस्तवास्य पत्युः सम्बन्धादागतं जनित्वं जायात्वमभिलक्ष्य सम्बभूथ सम्भूतासि, अनुसरणनिश्चयमकार्षीरित्यर्थः । "पाणिग्राहे मृते बाला" इत्यादिवसिष्ठवचनमपि न विधवाविवाहपरं, अपि तु यदि काचित्कन्या केनापि बलाच्छलाद्वा नीत्वा पाणिग्रहणमन्त्रादिभिरभिमन्त्रिता भवति, वैधदानं तु न जायते, एवंदशायां तस्य पाणिग्राहकस्य मरणे तस्याः कन्याया विवाहविधायकम्, तथा चास्य व्याख्या-बाला या कन्या केवलं मन्त्रसंस्कृता वैधदानादिकं विनैव कथंचित् पाणिग्रहणमन्त्रादिभिरभिमन्त्र्य गृहीता, तु-

किं तु, यदि अक्षतयोनिः अकृतमैथुना स्यात्, तदा तस्याः पाणिग्राहे उक्तरूपे पाणिग्राहके मृते सा चेत्पुनःसंस्कारं पुरुषान्तरेण परिणयमर्हतीति । अस्य वचनस्य एतादृश-समाधानं प्रति एतच्श्लोकीयं "केवल" मिति पदं विधवाविवाह-निषेधकानि च वसिष्ठादिवचनान्यपि वहूनि साधकानि । तानि यथा,

अद्भिर्वाचा च दत्तायां म्रियेतोर्ध्वं वरो यदि ।
न च मन्त्रोपनीता स्यात् कुमारी पितुरेव सा ॥
बलाच्चेदाहृता कन्या मन्त्रैर्यदि न संस्कृता ।
अन्यस्मै विधिवद्देया यथा कन्या तथैव सा ॥

या च क्लीवं पतितमुन्मत्तं वा भर्तारमुत्सृज्यान्यं पतिं विन्दते मृते वा सा पुनर्भूर्भवतीति ।

(१०१) उ०—विधवाविवाहः शास्त्रसम्मतः । ब्रह्मचर्यपरिपालनसमर्थानां तु विधवानां ब्रह्मचर्यपरिपालनं प्रशंसार्हमेव । ऋतुकालात्पूर्वं तु प्रमीतपतिकानां अक्षतयोनिविधवानां पुनर्विवाहसम्पादनमेव समाजस्य नैतिकदृष्ट्या उन्नतिसाधकं भवितुमर्हति, नान्यत् । ऋत्वनन्तरे प्रमीतभर्तृकाणामपि इच्छासत्वे पुनर्विवाहः कर्तव्य एव । सन्तानवतीनां पुनर्विवाहो निन्दनीयः । प्राचीनशास्त्रानुसारेण दाम्पत्यमोक्षोपि सङ्गत एव, । तथापि समाजदृष्ट्या तु स सर्वदा निन्दनीय एव ।

(१०४) उ०—"नष्टे मृते प्रव्रजित" इति वाक्ये अपतौ इति च्छेदः, अन्यथा पतौ इत्येव स्यात् ।

प्रथमं संस्थिता भार्या पतिं प्रेत्य प्रतीक्षते ।
पूर्वं मृतं च भर्तारं पश्चात्साध्व्यनुगच्छति ॥

इति भारतीयशाकुन्तलोपाख्यानश्लोकेन च भार्यायाः प्रथममरणे पतिप्रतीक्षणं, पत्युः प्रथममरणे च तदनुगमनमभिहितं, न तु

पत्यन्तरग्रहणम् । ननु विधवाविवाहस्य एकान्ततोऽशास्त्रीयत्वे महर्षीणां परपूर्वाभार्यामरणाशौचाद्यभिधानं कथं सङ्गच्छते । तथाहि हारीतः,

परपूर्वासु भार्यासु पुत्रेषु कृतकेषु च ।
मातामहे त्रिरात्रं स्यात् एकाहं त्वसपिण्डतः ॥

त्रिरात्रेण शुद्ध्येदित्यनुवृत्तौ विष्णुः,

परपूर्वासु भार्यासु प्रसूतासु मृतासु च ।

इति । ब्रह्मपुराणे,

आदावन्यस्य दत्तायां कुत्रचित्पूर्वयोर्द्वयोः ।
पितुर्यत्र त्रिरात्रं स्यादेकं तत्र सपिण्डिनाम् ॥
एका माता द्वयोर्यत्र पितरौ द्वौ च कुत्रचित् ।
तयोः स्यात्सूतकादैक्यं मृतकात्तु परस्परम् ॥

इति शुद्धिचिन्तामणिः । चतुर्थीतः प्रागन्येन पुनर्भूकरणे प्रसवात्प्राक् पितृगोत्रम्, तदनन्तरं पूर्वपतिगोत्रम् ।

पदे तु सप्तमे या तु बलात्काचिद्धृता भवेत् ।
स्वामिगोत्रं भवेत्तस्यास्तच्च भूयो विशिष्यते ॥
पैतृकं त्वप्रसूतायास्ततः पौर्विकभर्तृकम् ।

इति हारीतवचनात्, इति श्राद्धचिन्तामणिः । सत्यम् । उक्तवचननिचयस्थभार्यापदं न विवाहितस्त्रीपरं, किं तु पुनर्भूकरणादिना संगृहीतस्त्रीपरम् । अत एवात्र त्रिरात्राशौचमभिहितम् । विवाहितस्त्रीणां हि प्रसवे मरणे वा सम्पूर्णाशौचमेव । पुनर्भूकरणं तु न विवाहः, किन्तु अवैधस्त्रीग्रहणम् ।

सप्त पौनर्भवाः कन्या वर्जनीयाः कुलाधमाः ।
वाचा दत्ता मनोदत्ता कृतकौतुकमङ्गला ॥
उदकस्पर्शिता या च या च पाणिगृहीतिका ।
अग्निं परिगता या च पुनर्भूः प्रसवा च या ॥

इत्येताः कश्यपेनोक्ता दहन्ति कुलमग्निवत् ।

इति रघुनन्दनभट्टाचार्यधृतकाश्यपवचनेन,

अन्यदत्ता तु या कन्या पुनरन्यस्य दीयते ।
तस्याश्चान्नं न भोक्तव्यं पुनर्भूः सा प्रकीर्तिता ॥

इत्यङ्गिरोवचनेन च पुनर्भूकरणादीनां निन्दाश्रवणात् । ब्रह्मपुराणे,

अन्यपूर्वा गृहे यस्य भार्या स्यात्तस्य नित्यशः ।
अशौचं सर्वकार्येषु देहे भवति सर्वदा ॥
दानं प्रतिग्रहः स्नानं सर्वं तस्य वृथा भवेत् ।

अन्यपूर्वा आदावन्येन परिणीता उपभुक्ता वा सती या उपभुज्येत सा, इदं च यावज्जीवमशौचं परपूर्वाधारणजन्यं, तत्प्रसवमरणयोस्तु त्र्यहाशौचं सर्वसाधारणम् । न तु प्रतिग्रहपदवशाद्ब्राह्मणमात्रस्यैवेदम्, उपक्रमस्थ'यस्ये'तिपदस्वरसादित्यनेन अन्यपूर्वाग्रहणे यावज्जीवमशौचमभिहितम् । एवमुपसंहारे । अत्र च परपूर्वभार्याप्रवसरणयोर्द्विजोत्तमस्य यन्महाशौचमुक्तं, तत्तु प्रसवादिजन्याशौचव्यपगमपरं. तत्संग्रहजन्यं त्वाशौचं सर्वस्य यावज्जीवमेवेत्युक्तं शुद्धिचिन्तामणौ । शूलपाणिरपि स्त्रीणां संग्रहे भोजने चान्द्रायणं प्रायश्चित्तमाह । तथाहि, आपस्तम्बः,

याजकान्नं नवश्राद्धं संग्रहे चैव भोजनम् ।
नारीणां प्रथमे गर्भे भुक्त्वा चान्द्रायणं चरेत् ॥

संग्रहे स्त्रीणामेव इति प्रायश्चित्तविवेकः । संग्रहरीतिस्तु इदानीमपि कुत्रचिद्देशे अन्त्यजादीनामस्ति ।

(१०५) उ०—"नष्टे मृते प्रव्रजित" इत्यादेर्वाग्दानानन्तरपरत्वम् । न च स्वर्गकामा ब्रह्मचर्यं कुर्यात्, तदन्या पत्यन्तरं गृह्णीयात् इत्यधिकारविधिभेदान्न विरोध इति वाच्यम् । तथाविधिकल्पनासम्भवात् । तथाहि, वैदिकलिङ्त्वावच्छेदेनापूर्वे शक्तिकल्पनेति

मीमांसकसिद्धान्तात् तदन्या पत्यन्तरं गृह्णीयादित्यस्य स्वर्गकामेतरमृतपतिकायाः पत्यन्तरग्रहणजन्यमपूर्वमिति शाब्दबोधे तदपूर्वस्य च स्वर्गफलकत्वासम्भवेन परिशेषात् नरकफलकत्वापत्तिः स्यात्। अत्रापि इष्टापत्तौ न विवादः। न च शुष्यत्सस्यसञ्जीवनाय वृष्टिकामिना कारीर्यादियागः क्रियते, तज्जन्यमपूर्वं वृष्टिरूपदृष्टफलमेव जनयति, तथा अत्रापि पत्यन्तरग्रहणजन्यमपूर्वं ग्रासाच्छादनादिरूपदृष्टफलमेव जनयत्विति वाच्यम्। तस्य शास्त्रं विनाप्युपपन्नतया तत्र शास्त्रापेक्षाभावादिति।

(१०७) उ०—विधवाविवाहः कलौ वर्ज्यः। दम्पत्योर्विवाहमोक्षः शास्त्रनिषिद्धः।

अतिक्रामेत् प्रमत्तं या मत्तं रोगार्त्तमेव वा।
सा त्रीन् मासान् परित्याज्या विभूषणपरिच्छदा॥
उन्मत्तं पतितं क्लीवमबीजं पापरोगिणम्।
न त्यागोऽस्ति द्विषन्त्याश्च न च दायापवर्तनम्॥

इति मनुवचनात्।

दारिद्रं व्याधितं क्लीबं भर्तारं या न मन्यते।
सा मृता जायते व्याली वैधव्यं च पुनः पुनः॥
अदुष्टां पतितां भार्यां यौवने यः परित्यजेत्।
सप्त जन्म भवेत्स्त्रीत्वं वैधव्यं च पुनः पुनः॥

इति पराशरवचनाच्च।

(१०८, १०९, ११०, १११, ११२) उ०—विधवाविवाहो दम्पत्योर्विवाहमोक्षश्च शास्त्रविरुद्धः।

११३) उ०—विधवाविवाहः ज्यौतिषशास्त्रदृष्ट्या एतैः खण्डितः।

(११४,उ०—त्रैवर्णिकानां विधवाविवाहः शास्त्रनिषिद्धो विवाहमोक्षोपि तथैव।

(११७) उ०—

नष्टे मृते प्रव्रजिते क्लीबे च पतिते पतौ ।
पञ्चस्वापत्सु नारीणां पतिरन्यो विधीयते ॥

इति मनुवचनेन विधवाविवाहः शास्त्रीयतया योग्य एव । कलेरादौ अनुगमनविध्यनुष्ठानप्राचुर्येण तत्कालोचितमालोच्य कैश्चिन्निवर्तितेऽपि विधवाविवाहे इदानीमनुगमनविधिनिवर्तनेन एतत्कालोचिततया इदानीन्तनैर्विधवाविवाहप्रवर्तनं कर्तव्यमेवेत्यत्र न कोपि विशयलेशः । अपि च वसिष्ठनारदबौधायनादिभिरनुज्ञायते ।

अन्यच्च—ईर्ष्यादम्भादयो येऽन्ये चत्वारः समुदाहृताः ।
त्यक्तव्यास्ते पतितवत् क्षतयोन्योपि हि स्त्रियः ॥
आक्षिप्तमोघबीजाभ्यां कृतेऽपि पतिकर्मणि ।
पत्युरन्याश्रिता नारी वत्सरार्धं परीक्ष्य तु ॥
विवादशीली स्वयमर्थचोरिणी
परानुकूला परपुरुषभाषिणी ।
अग्राशिनी अन्यगृहप्रवेशिनी
भार्यास्त्यजेत्पुत्रदशप्रसूतिकाम् ॥

इत्यादिवचनैः सति प्रतिबन्धके दम्पत्योरन्योन्यविवाहमोक्षः शास्त्रीय एव ।

(११८) उ०—"कुमार्याः पाणिं गृहीयात्" इतिपारस्करसूत्रोपरि कर्कादयो वदन्ति, "कुमारीग्रहणं विंशतिप्रसूताव्युदासार्थ" मिति ।

बृहस्पतिः—विवाहे चैव निर्वृत्ते चतुर्थेऽहनि रात्रिषु ।
एकत्वं सा गता भर्तुः पिण्डे गोत्रे च सूतके ॥

च्यवनः—चतुर्थीहोममन्त्रेण त्वङ्मांसहृदयेन्द्रियैः ।
भर्त्रा संयुज्यते पत्नी तद्गोत्रा तेन सा भवेत् ॥

शातातपः—पूर्वं निषेकान्नारीणां मृते पत्यौ विधेर्वशात् ।
दशाहाभ्यन्तरे कुर्यात्पुनः परिणयं पिता ॥

मनुः—पाणिग्राहे मृते बाला केवलं मन्त्रसंस्कृता ।
सा चेदक्षतयोनिः स्यात्पुनः संस्कारमर्हति ॥

पराशरः—यत्पापं ब्रह्महत्यायां द्विगुणं गर्भपातने ।

इत्यादिवचनैः स्पष्टमेव चातुर्वर्ण्ये विधवाविवाहः कर्तव्यतया प्रतीयते । एतदनुसारेणैव 'अकोला ब्राह्मण परिषदि' अस्माभिरेव विधवाविवाहप्रस्तावः उपस्थाप्य स्वीकारितः । तत्र च विरोधकारणानि इयन्त्येव सम्भवन्ति ।

१ शूद्रादिष्विव प्राणघातिनी अव्यवस्था ।

२ स्वकीयपूज्यत्वहानिप्रसङ्गः ।

३ शूद्रैःसाम्यप्रसङ्गश्च । इत्यादीनि ।

तेषु प्रथमकारणस्य कथंचिद्योग्यत्वेऽपि द्वितीयतृतीयकारणे सर्वथा अयोग्ये एव इति स्पष्टमेव । पूज्यत्वहानिप्रसङ्गस्य विधवाविवाहामूलकत्वात् । प्रत्युत 'स्मर्यते' हि विंशतिप्रसूतिकायाः पुनर्विवाह इति स्पष्टमुल्लेखसत्वेऽपि तदकरणेन भ्रूणहत्यागर्भहत्याबालहत्यास्त्रीहत्यादिपातकप्रवर्तनमेव भवतामपूज्यत्वे कारणमिति मन्यामहे । "अष्टपुत्रा सौभाग्यवती भव" इत्याशीर्वादस्य सत्यताकरणार्थमपि विधवाविवाह आवश्यक एव । किं च गुर्जरदेशे धेनुजामोंढब्राह्मणेषु पल्लेवालब्राह्मणेषु विधवाविवाहो भवतीत्येतदपि आलोचनीयम् । पेशवाराज्ये न्यायाधीशैः प्रभुणेरामशास्त्रिभिरपि इतिहासे विधवाविवाहसमर्थनं कृतमासीदित्यपि विचारणीयम् ।

(११९, १२०) उ०—प्राचीनपक्षः ।

अर्यमणं नु देवं कन्या अग्निमयक्षत ।
स नो अर्यमा देवः प्रेतो मुञ्चतु मा पतेः स्वाहा ॥

इति मन्त्रः । अत्र जयराममाष्यम्—कन्या पूर्वं प्रथममर्यमणं सूर्यं देवं कान्तमग्निस्वरूपं वरलाभायायक्षत अयजत् लङ-

श्छान्दसं रूपम्। स चार्यमा देवस्ताभिरिष्टो यतो नोऽस्मानिदानीं परिणीताः कन्या इतः पितृकुलत्वात्प्रमुञ्चतु प्रमोचयतु। यद्वा वरो ब्रूते कन्येयमग्निरूपेणार्यमणमयजत्, सोऽयर्मा देवः पतेः पत्युः मत्तः सकाशादिमां नो प्रमुञ्चतु मा प्रमोचयतु। इतः अस्याः कन्यायाः सकाशात् मा मां न प्रमुञ्चतु इतीति। इयं कन्याऽर्यमणं सूर्यमयक्षत पूजयते किम्भूतमग्निमग्निरूपम्। किमर्थम्। अर्यमा देव इतः पतेः सकाशान्मा मां नो प्रमुञ्चतु न प्रमोचयतु इत्येतदर्थम्। इयं कन्या पत्या सहावियोगसिध्यर्थमर्यमणं यजत इति वाक्यार्थ इति हलायुधः।

गृभ्णामि ते सौभगत्वाय हस्तं मया पत्या जरदष्टिर्यथासः।
भगोऽर्यमा सविता पुरन्धिर्मह्यं त्वादुर्गार्हपत्याय देवाः॥

हे कन्ये! ते तव साङ्गुष्ठं हस्तं करं गृभ्णाभि, गृण्हामि। हृग्रहोर्भश्छन्दसीति भत्वम्। यथा येन गृहीतेन मया पत्या सह जरदष्टिर्जरच्छरीराऽऽयुष्मती, आसः भवसीत्यर्थे निपात इति जयरामभाष्यम्। ते तव हस्तं गृभ्णाभि किमर्थं सौभगत्वाय सौभाग्याय यथा मया पत्या जरदष्टिरासः वृद्धा भवसीत्यर्थ इति हलायुधभाष्यम्। अनयोर्हि यावज्जीवमवियोगः प्रार्थ्यते। पत्यन्तरेण संस्कारार्हत्वे पत्नीकर्तृका वियोगप्रार्थनाऽसङ्गता। पत्यवियोगो हि कामार्थसाधनम्। तत्त्वं च पत्यन्तरसम्बन्धेऽपि सम्भवति। किं च "अर्यमणं नु देवम्" इत्यादिमन्त्रस्य न पुनः संस्कारकरणता। तस्याः कन्यात्वाभावान्मन्त्रस्य च कन्याशब्दघटितत्वात्। अत एव मनुनाप्युक्तम्—

पाणिग्रहणिका मन्त्राः कन्यास्वेव प्रतिष्ठिताः।
नाकन्यासु क्वचिन्नृणां लुप्तधर्मक्रिया हि ताः॥ इति।

(१२१) उ०—परिस्थित्यनुरोधेन विधवाविवाहो योग्य एव। योग्यकारणसत्वे दम्पत्योर्विवाहमोक्षोऽपि पञ्चायतनसभाद्वारा कर्तव्य एव।

(१२२) उ०—परिस्थित्यनुसारेण विधवाविवाहो योग्यः, अथवा विधवानां विषयवासनैव यथा नोत्पद्येत तादृशमौषधं किमपि व्यवस्थापनीयम्।

(१२३, १२४, १२५, १२६, १२७, ११८) उ०—प्राचीनपक्षः।

(१२९) उ०—अक्षतयोनिविधवाविवाहः शास्त्रसम्मत एव। कलिवर्ज्यप्रकरणं तु कैश्चित्कल्पितत्वादप्रमाणमेव, प्राचीननिबन्धेष्वनुपलम्भात्।

(१३०) उ०—शास्त्रे नियोगनिषेधोपलम्भेऽपि पुनर्विवाहनिषेधो न दृश्यते कथञ्चित्पुनरुद्वाहनिषेधकवचनोपलम्भेऽपि तेषामौदुम्बरी सर्वा वेष्टनीयेति स्मृतिवच्छ्रुतिविरोधादुपेक्ष्यत्वमेव। श्रुतयश्च—

उदीर्ष्व नार्यभिजीवलोकं गतासुमेतमुप शेष एहि।
हस्तग्राभस्य दिधिषोस्तवेदं पत्युर्जनित्वमभिसंबभूव॥
....
कुहस्विद्दोषा..
को वां शयुत्रा विधवेव देवरं मर्यं न योषा कृणुते सधस्थ आ॥
या पूर्वं पतिं वित्वाऽथान्यं विदन्ते परम्।
समानलोको भवति पुनर्भुवा परः पतिः॥

इत्याद्याः। स्मृतयश्च प्रसिद्धा एव "नष्टे मृते" इत्याद्याः। पताविति रूपस्याशुद्धत्वात्पतिरिवाचरतीति पतिरिति व्युत्पत्तिमाश्रित्य वाग्दत्तापरत्वं "नष्टे मृत" इति वचनस्य केचिद्वर्णयन्ति। तन्न युक्तम्। बहुषु स्मृतिषु व्याकरणविरुद्धप्रयोगदर्शनात्।

(१३१, १३४) उ०—प्राचीनपक्षः।

(१३५) उ०—न योग्यः। तथाहि, तैत्तिरीयश्रुतिः—

यदेकस्मिन् यूपे द्वे रशने परिव्ययति तस्मादेको द्वे जाये विन्दते यन्नैकां रशनां द्वयोर्यूपयोः परिव्ययति तस्मान्नैका द्वौ पती विन्दते

(१३६, १३७, १४१, १४२, १४३, १४४) उ०—प्राचीनपक्षः।

(१३८) उ०—विधवाविवाहशब्दो विकल्पवृत्तिकः, "न विवाहविधावुक्तं विधवावेदनं पुनः" इति मनूक्त्या विवाहविषये विधवाया

अनधिकारात्। यत्तु पराशरस्य पत्यन्तरविधानं विधवायाः, तदपि वाग्दानमात्रमरणेन, पाणिग्रहणे श्रुत्या जायायाः पतिशरीराद्धर्धत्वप्रतिपादनात् "अस्थ्नाऽस्थीनि त्वचा त्वचम्" इति मन्त्रलिङ्गाच्च, मृतेऽपि पाणिग्राहे जायां प्रति तस्य पतित्वानिवृत्तेः। अत एव सपिण्डीकरणे "पतिनैकेन कर्त्तव्यं सपिण्डीकरणं स्त्रिया" इति। "तर्पणं प्रत्यहं कार्यं भर्त्तुः कुशतिलोदकैः" इति च मृतस्य पतित्वेन तत्र तत्र निर्देशः सङ्गच्छते। यदि च पतित्वानिवृत्तिः, तदा "नैकस्यै सह पतय" इति श्रुत्या प्रतिषिद्ध एव पत्यन्तरपरिग्रहः। मृतस्यापि पाणिग्राहस्य तत्र पतित्वसत्त्वात्, परस्य च पतित्वे सहानेकपतित्वस्यावश्यम्भावात् स्पष्टीकृतश्चैषोऽर्थो याजुषश्रुतौ "तस्मान्नैका द्वौ पती विन्दते" (तै० सं० प्र० ५ का० ६ अ० ४) अपि च मन्त्रः "सोमः प्रथमो विविदे गन्धर्वो विविद उत्तरः, तृतीयोऽग्निष्टे पतिस्तुरीयस्ते मनुष्यजा" इति। अत्र सोमादीनां पूर्वं पूर्वं पतित्वमुत्तरोत्तरस्मै दानेन निवर्त्तते, चतुर्थस्य पत्युर्मनुष्यस्य अन्यस्मै पत्नीदानाविधानात् न तस्य पतित्वनिवृत्तिः, नाऽपि वैवाहिकमन्त्रगणे पाठ्योऽयं विधवायामुपयुज्यते. नापि वक्ष्यमाणो मन्त्रः "सोमोऽददद् गन्धर्वाय गन्धर्वोऽददग्नये। रयिं च पुत्रांश्चादादग्निर्मह्यमथो इमाम्।" यदि मनुष्येषु द्वितीयः पतिरभिमतस्तदा कथमग्निकर्तृकं द्वितीयपात्राय दानमघटिष्यत, अग्नेस्तत पूर्वं प्रथमपात्रदानावसरे पतित्वनिवृत्तेरित्यादिश्रुत्यर्थोपनिबन्धमनुवचनानि—"न विवाहविधायुक्तं विधवावेदनं पुनरिति, "न द्वितीयश्च साध्वीनां क्वचिद् भर्त्तोपदिश्यत" इति. "कामात्तु क्षपयेद् देहं पुष्पमूलफलैश्शुभैः। न तु नामाऽपि गृह्णीयात् पत्यौ प्रेते परस्य तु" इत्यादीनि। तस्मात् पराशरवचने "पतिते पतौ" इति द्वितीयशब्दः अपताविति पतिसदृशबोधकः। प्रश्लिष्टा-

कारो वा "यस्या म्रियेत कन्याया वाचा सत्ये कृते पतिः" इति मनुवचने वाग्दानमात्रप्रतिपादकपतिशब्दवद्वा प्रयुक्त इत्यभ्युपगन्तव्यम्। अन्यथा मनुविरोधेन श्रुतिविरोधेन च तद्वचनस्याप्रामाण्यं प्रसज्येत। "ऊढायाः पुनरुद्वाह" मित्युपक्रम्य "कलौ पञ्च विवर्जयेदिति" क्रतुवचनं पराशरवचनस्याऽनूढापरत्वं व्यनक्ति। तथा च "सप्त पौनर्भवाः कन्या वर्जनीयाः कुलाधमाः। वाचा दत्ता मनोदत्ता कृतकौतुकमङ्गला" इत्यादि काश्यपवचने अनूढानां यासां पुनर्भूत्वकीर्त्तनं वर्जनीयत्वप्रतिपादनञ्च। कलौ पञ्चस्वापत्सु तदपवादकं पराशरवचनमिति नास्ति विवाहे कथमपि विधवाया अधिकारः। यत्तु मनुनोक्तं विधवायाः पुनर्भवेन पुत्रोत्पादनं, तत् कुण्डगोलकचाण्डालाद्युत्पत्तिवत् रागप्राप्तप्रतिषिद्धकर्माचरणप्रयुक्तफलस्य सामाजिकस्थानस्वरूपादिज्ञापनार्थं, न तु तद्विधानार्थम्। तथा सति चाण्डालादिजन्महेतुस्त्रीसंयोगोऽपि मनुना विदित इत्यभ्युपगम्यताम्। तत्रेष्टापत्तौ तत्र तत्र बाधकानि तानि तानि मनुवचनानि व्याकुप्येरन्। एवञ्च विवाहे विधवागोचरत्वं शास्त्रविरुद्धम्। प्रश्नोक्तभाषानुवादे तु विधवाविवाहः शास्त्रविरुद्ध इति पर्यवस्यति। "सकृदंशो निपतति सकृत् कन्या प्रदीयत" इत्युपक्रम्य विवाहप्रकरणं यावत् नारदेन विवाहमोक्षानभिधानात्, स्त्रीसंग्रहप्रकरणे वाग्दानदशायां च वरत्यागाद्यभिधानात्। पाणिग्रहणानन्तरं दम्पत्योर्विवाहमोक्षो "न निष्क्रियविसर्गाभ्यां भर्त्तुर्भार्य्या विमुच्यते" "पतिः स्त्रीभिर्न हातव्यो लोकेप्सुभिरपातकी" इति वचनाच्च मोक्षो न भवत्येव। यत्तु साम्प्रतं कालप्रभावतो द्विजात्यादावपि धर्मभ्रष्टानां स्त्रीणां पुरुषान्तरग्रहणं दृश्यते, तेन कालान्तरेण काचिद्वान्तरजातिरुत्पत्स्यत इत्यनुमीयते।

(१४६) उ०—विधवाविवाहस्य स्पष्टं मन्वादिषु पशुधर्मत्वकथनात् 'नष्टे मृते' इत्यादीनां वाग्दत्तापरत्वात्, पितृमेधप्रकरणगतानां मन्त्राणामुदीर्ष्व नार्यभिजीवलोकमित्यादीनां विवाह्यनिर्णयानुपयोगित्वात्, उपयोगेऽपि तेषां विधवाविवाहनिषेध एव तात्पर्यस्य सायणादिभाष्यतोऽवगतत्वात्, "उत यत् पतयो दश स्त्रियाः पूर्वे अब्राह्मणाः" इति ब्राह्मणविषये स्पष्टं विधवाविवाहनिषेधात्,

शूद्राणामेव धर्मोऽयं पत्यौ प्रेतेऽन्यसंश्रयः ।
लोभान्मूढैरविद्वद्भिः क्षत्रियैरपि चर्यते ॥

इत्यादिवृद्धमनुवचनैः शूद्रेतराणां वर्णानां विधवाविवाहनिन्दनात्, अन्यमिच्छस्व सुभगे पतिं मत्" इति यमयमीसम्वादस्य सोदरीविवाहे सोदरस्यानधिकार इत्यत्रैव तात्पर्येण विधवाविवाहेऽतात्पर्यात् 'विधवेव देवरं मर्यं न योषा कृणुते सधस्थ आ' इति ऋङ्मन्त्रस्य "विधवेव" "मर्त्यं न" इति दृष्टान्तद्वयस्यैव विवक्षणात् विधवादेवरवरणस्य वानरादितिर्यग्जातिविषयत्वावगमाच्च विधवाविवाहस्त्रैवर्णिकानां धर्मतया निन्द्य एवेति निष्कर्षः ।

सप्तमप्रश्नोत्तर—

परिशिष्टम् ।

—:※:—

(१४८, १४६, १५१, १५२, १५३, १५४, १५५, १५६, १५७, १५८, १५६, १६०, १६१, १६२, १६३, १६४, १६५, १६६, १६८, १६९, १७०, १७१)

उ०—प्राचीनपक्षः ।

---

* श्रीविश्वनाथः शरणम् *

तृतीयो भागः ।

अखिलभारतवर्षीय—

ब्राह्मणमहासम्मेलने-

समालोचनीयप्रश्नावलीनामुत्तराणि ।

—————*****—————

(८) प्रश्नः—अस्पृश्यानामस्पृश्यत्वं जातितो वा कर्मतो वा ?

(६) प्र०—म्लेच्छानामन्त्यजानां च स्पर्शविषये सभाप्रवेशविषये कूपोदकग्रहणविषये देवालयप्रवेशविषये चान्येभ्यस्तारतम्यरक्षणं योग्यं न वा? यदि योग्यं तदा कीदृशं तारतम्यं रक्षणीयम् ?

१, २, ३, ४, ५. ६, ७, ८, ६, १०, ११, १२, १३, १४, १५, १६, १७, १८, १६) उ०—जयपुरस्सूर्यनारायणशास्त्रिणोऽस्पृश्यानामस्पृश्यत्वं जातितः । तेषां कूपोदकग्रहणविषये सभाप्रवेशविषये देवालयप्रवेशविषये च तारताम्यं रक्षणीयम् । सभायां तेषां पृथक् स्थानव्यवस्थापनेन, पृथक्कूपव्यवस्थापनेन कुड्याद्यनन्तरिते देवालये दूराद्दर्शनव्यवस्थादानेन च ते उपकर्तव्याः । यवनानां कूपादिव्यवहारस्तु आपदेव, परं तु स हिन्दुसमाजस्य कलङ्क एवेति विवेचयन्ति ।

इदमेव मतं श्रीरामदेवत्रिपाठिनामपि । गणेशदत्तनैयायिका अपि पृथगन्त्यजानां व्यवस्थाकरणेन सहयोगमेव कर्तव्यं मन्यन्ते शास्त्राविरोधेन । ब्राह्मणैरन्त्यजानामालापोऽपि न कर्तव्य इति व्यवस्थामात्रमिदानीं परिवर्तनीयं परिस्थित्यनुसारेणेति वदन्ति। अस्पृश्यत्वं तु जातित एवान्त्यजादीनाम्, पतितानां तु कर्मत इति वदन्ति ।

चित्पुरीवेदशास्त्रपाठशालाध्यापकाः, भगवान्शास्त्रिणः, नल्लान् चक्रवर्तिमहाशयाः, मल्लय्याशास्त्रिणः, रामपुरराजपण्डिताश्च नोत्तरयन्तीमौ प्रश्नौ ।

पालघाटवैदिकसमाजादयः, तिरुवाडीविद्यालयपण्डिताश्च जातितोऽन्त्यजानामस्पृश्यत्वं कूपोदकादिव्यवहारायोग्यतां यथा-वैखानसागमं देवालयादौ ग्रामादौ च व्यवस्थिते स्था-नेऽवस्थाय दर्शनव्यवस्थानं च कर्तव्यं मन्यन्ते । म्लेच्छापेक्ष-याऽन्त्यजानां निकृष्टत्वमेवेति ते वदन्ति । इयमेव व्यवस्था मायू-रशिवरामकृष्णशास्त्रिणां विजयनगरपण्डितानां सुब्रह्मण्यार्या-दीनां तिरुपतिविद्यालयपण्डितानां वेङ्कटरामशास्त्रिणां मल्लादि-श्रीरामकृष्णशास्त्रिप्रभृतीनां च सम्मता ।

शेखावाटीश्रीसीतारामशास्त्रिणस्तु परम्परागतसदाचारवत् तारतम्यरक्षणं योग्यम् , अथ वाऽन्त्यजवन्म्लेच्छानामपि व्यवहारः कर्तव्य इति वदन्ति ।

वाणीशझामहोदयास्तु सामान्यप्रायश्चित्तेन गङ्गास्नानादिना, हरिनामस्मरणादिना वा शुद्धिव्यवस्थापनेनान्त्यजानां स्पर्शो न दोषायेति स्थापनं कर्तव्यम्, कूपोदकविषये तारतम्यरक्षणमसम्भ-वि । देवालयादौ देवदर्शनार्थं कश्चनोपायः कर्तव्य इति वदन्ति ।

(२०) उ०—म्लेच्छपतितान्त्यजानामुत्तरोत्तरमधिकमस्पृश्यत्वमिति निब-न्धकाराशयः । अस्पृश्यत्वं तु अन्त्यजानां जन्मकृतम् , द्विजादी-नामशौचादिकृतम् ।

(२१) उ०—किमपि न लिखितम् ।

(२२) उ०—कर्मणा जन्मना चाधिकारिभेदेनास्पृश्यत्वम् । उत्सवादिषु रथ्यादौ भगवद्दर्शन एवाधिकारोऽस्पृश्यानां न मण्डपादिप्रवेशा-दौ, उत्सवादावपि स्पर्शदोषो वर्तते एव, अत एव शान्तिप्रयोगा अपि रथोत्सवादौ क्रियन्ते ।

(२३) उ०—श्वपाकादीनां जातितोऽस्पृश्यत्वम्, न तु कर्मतः, तेषां कूपोदकग्रहणादौ दोषो वर्तते एव। देवालयप्रवेशविषये किमपि न लिखितम्।

(२४) उ०—जन्मत एवास्पृश्यत्वं श्वपचादीनाम्, कर्मतोऽपि सर्वेषामाशौचादि न भवति। स्पर्शविषये तारतम्यं रक्षणीयमेव। सभाप्रवेशविषये सहासनादिसंसर्गसम्भवादत्यन्तायोग्यता। कूपोदकग्रहणविषयेऽपि निषेधो वर्तते। देवालये बहिरवस्थाय दर्शनं कर्तुं शक्नुवन्ति। देशविशेषाचारादिकं कूपोदकग्रहणविषयादौ यदि म्लेच्छानां वर्तते, तर्हि तत्र तथैव भवतु, सर्वत्र प्रवर्तनं परमयोग्यम्।

(२५) उ०—स्पर्शविषये पराशराद्युक्तप्रकारेण चतुर्युगादिव्यवधानपरिपालनं कर्तव्यम्। कूपोदकादग्रहणादौ देवालयप्रवेशादौ चानादिसिद्धसम्प्रदाय एव परिपालनीयः। वैखानसाद्यागमानुरोधित्वमनुवर्तमानस्याचारस्य।

(२६, २७) उ०—देवालयप्रवेशादिकं तु निषिद्धमेव. पृथग्देवालयादिस्थापनेन प्रबन्धः कर्त्तव्यः।

(२८) उ०—स्पर्शे कूपोदकग्रहणे देवालयप्रवेशे च दोषो वर्तत एव। अन्त्यजानां म्लेच्छानां च पृथक् कूपादिव्यवस्था कर्तव्या।

(२९) उ०—अस्पृश्यान्नभक्षणादिकं निषिद्धमेव, देवालये दर्शनमात्रव्यवस्था कर्तव्या। उदकग्रहणे नद्यादौ कालपर्यायेण व्यवस्थायां न दोषः। जातित एवास्पृश्यत्वम्।

(३०) उ०—साक्षात् स्पर्शे स्नानादिप्रायश्चित्तम्, देवालयप्रवेशे संप्रोक्षणादिना शुद्धिः, बहुजनसमाजे साक्षात्स्पृष्टस्यैव स्नानम्। सर्वथा तु जातित एव तेऽस्पृश्याः।

(३१) उ०—जातिपतितानामस्पृश्यानां नास्पृश्यतानिवृत्तिः। अन्त्यजादीनां म्लेच्छानां चास्पृश्यत्वं समानमेव। सभाप्रवेशः कूपोदकग्रहणं

देवालयप्रवेशनं च निषिद्धमेव ।

(३२) उ०—अन्त्यजानां दर्शनभाषणादिकमपि व्यासादिभिर्यदि निषिद्धं तर्हि क्वैव कथा सभाप्रवेशादिविषये ।

(३३) उ०—जातितोऽस्पृश्यानामप्येतेषां पृथक् कूपादिव्यवस्थायां देवदर्शने यथोचितव्यवस्थाकरणेन च साहाय्यं कर्तव्यम् ।

(३४) उ०—कूपोदकग्रहणादौ श्वपचम्लेच्छानां दोषो वर्तत एव, यात्रोत्सवादौ संकटविषये गोबालव्यजनपर्यन्तमन्ततो गत्वा व्यवधानेन तारतम्यरक्षणं कर्तव्यम् ।

(३५) उ०—अस्पृश्यानां जातितोऽस्पृश्यत्वम् । तारतम्यं तु रक्षणीयमेव, शास्त्रीयत्वात् ।

(३६) उ०—न किमपि लिखितम् ।

(३७) उ०—त्रयस्त्रिंशप्रबन्धवदेव ।

(३८) उ०—म्लेच्छानां जातितोऽस्पृश्यानां धर्मसभादौ न प्रवेशाधिकारः । जानपदसभादिषु न विरुद्धस्तत्प्रवेशः । देवालयप्रवेशस्त्वागमविरोधादयुक्त एव ।

(३९, ४०) न किमपि लिखितम् ।

(४१) उ०—चाण्डालतुरुष्कयोरस्पृश्यतायां न विशेषः, जातित एवोभयोरस्पृश्यत्वम् ।

चण्डालश्च तुरुष्कश्च द्वावेतौ तुल्यपापिनौ ।

इति हेमाद्रिधृतवचनात् । अत उभयोरपि स्पर्शादिकं परिहरणीयमेव ।

(४२) उ०—स्पर्शकूपोदकग्रहणदेवालयप्रवेशादौ म्लेच्छान्त्यजानां सर्वेषामपि दोषापादकत्वमेव, बहुतरस्मृतियुक्त्यागमादिविरोधात् ।

(४३) उ०—जातितोऽस्पृश्यानां तारतम्यं देशविशेषे स्थानविशेषे तीर्थविशेषे च चिरतरप्रथानुसारेण रक्षणीयम् ।

यस्मिन् देशे च यच्छौचं धर्माचारश्च यादृशः ।

इत्यादिशास्त्रात् ।

(४४) उ०—

ब्राह्मणः क्षत्रियो वैश्यः शूद्रो वाऽप्यनुलोमजः ।

पूजयेत् सततं लिङ्गं तत्तन्मन्त्रेण सादरम् ॥

इति वचनात् अनुलोमपर्यन्तं स्वयंभूलिङ्गपूजायामधिकारः । प्रतिष्ठिते तु न सर्वसाधारणोऽधिकारः । अन्त्यजानां जात्याऽस्पृश्यानां देवालयप्रवेशादौ नाधिकारः । बहुतरजलपूर्णकूपोदकग्रहणे नोदकग्रहणनिषेध इति वदन्ति ।

(४५) उ०—अस्पृश्यानां चण्डालादीनामस्पृश्यत्वं जातितः कर्मतोपि । म्लेच्छादीनां साधारणकूपोदकादिग्रहणं दूषणीयमेव । भक्त्यतिशये दूरतो दर्शनादौ न निषेधः ।

(४६) उ०—म्लेच्छादीनां स्पर्शादिविषये यथादेशाचारं व्यवस्था ।

(४७, ४८) उ०—म्लेच्छानामन्त्यजानां च स्पर्शविषये प्रतिष्ठितदेवालयप्रवेशप्रतिषेधविषये तारतम्यं कर्तव्यम् । अबद्धे पक्वेष्टकाबद्धे कूपे च अन्त्यजातीनां अन्येभ्यो नास्ति तारतम्यम् ।

(४९) उ०—म्लेच्छान्त्यजादीनां देवालयप्रवेशादिषु कदापि न योग्यता ।

(५०) उ०—म्लेच्छानामन्त्यजानां च स्पर्शविषये सभाप्रवेशविषये कूपोदकविषये देवालयप्रवेशविषये च अन्येभ्यस्तारतम्यं कर्तव्यम् । चतुर्हस्तकूपे तु न दोषः ।

(५१) उ०—चण्डालवत् म्लेच्छा अपि पतितत्वादस्पृश्याः । पतितशब्देन म्लेच्छानामपि ग्रहणे प्रायश्चित्ततत्त्वं प्रमाणम् । चण्डालस्पर्शे गङ्गाजलं व्यवहार्यम् । म्लेच्छस्पर्शे त्वव्यवहार्यम् ।

सर्वत्र पावनी गङ्गा त्रिषु स्थानेषु दूषिता ।

म्लेच्छस्पर्शे सुराभाण्डे कूपोदकविमिश्रणे ॥

इति वचनात् ।

भाषाख्या लौकिका मन्त्राः प्रपत्यर्थं विभावनाः ।

सर्वेभ्यः प्रतिलोमेभ्यो देयाः कामं द्विजातिभिः ॥

इति नारदपञ्चरात्रीयवचनात् अन्त्यजादीनां भाषारूपमन्त्रग्रहणाधिकारित्वदर्शनाच्च म्लेच्छापेक्षया उत्कर्षः। अस्पृश्यानामपि कुत्रचित् कार्ये देशे च स्पर्शदोषो नास्ति। तथा च अत्रिः,

देवयात्राविवाहेषु यज्ञप्रकरणेषु च।
उत्सवेषु च सर्वेषु स्पृष्टास्पृष्टिर्न विद्यते॥

विष्ण्वालयसमीपस्थान् यिष्णुसेवार्थमागतान्।
चाण्डालान्पतितान्वापि न स्पृष्ट्वा स्नानमाचरेत्॥

इति संवत्सरप्रदीपे। बृहस्पतिः,

उत्सवे वासुदेवस्य स्नायाद्योऽशुचिशङ्कया।
तादृशं कल्मषं दृष्ट्वा सवासा जलमाविशेत्॥
तीर्थे विवाहे यात्रायां संग्रामे देशविप्लवे।
नगरग्रामदाहे च स्पृष्टास्पृष्टिर्न दुष्यति॥

आचारपल्लवे,

कुण्डे मञ्चे शिलापृष्ठे नौकायां गजवृषयोः।
संग्रामे संकटे चैव स्पर्शदोषो न विद्यते॥

सभाप्रवेशविषयेऽपि तारतम्यं रक्षणीयम्। सभ्यानां सभाप्रवेशाधिकारात्। सभ्यः सभायां साधुः। तथाविधानाह याज्ञवल्क्यः,

श्रुताध्ययनसम्पन्नाः कुलीनाः सत्यवादिनः।
राज्ञा सभासदः कार्याः शत्रौ मित्रे च ये समाः॥ इति।

शुक्रनीतिपरिशिष्टे—

यद्वर्णजो भवेद्राजा योज्यस्तद्वर्णजः सदा।
तद्वर्णा एव गुणिनः प्रायशः सम्भवन्ति हि॥
व्यवहारविदः प्राज्ञा वृत्तशीलगुणान्विताः।
रिपौ मित्रे समा ये च धर्मज्ञाः सत्यवादिनः॥
निरालस्या जितक्रोधकामलोभाः प्रियंवदाः।

राज्ञा ते च नियोज्याः स्युः सभ्याः सर्वासु जातिषु ॥

प्रायश्चित्तार्थी तु सर्व एव सभायां प्रविशति । अर्थिप्रत्यर्थिनौ साक्षिणश्च । कूपोदकग्रहणविषयेऽपि तारतम्यमस्त्येव । चतु-र्दिक्षु चतुर्हस्तपरिमितकूपोदकग्रहणे दोषो नास्ति ।

समन्ततश्चतुर्हस्तो जलाधारो भवेद्यदि ।
अन्त्यजैरपि संस्पृष्टः पूतो वाप्यादिवद्भवेत् ॥

इति मत्स्यसूक्ते श्रूयते । देवालयप्रवेशेऽपि तारतम्यं विधान-पारिजाते कौर्मे,

ब्राह्मण्यपि हरं विष्णुं न स्पृशेच्छ्रेय इच्छती ।
सनाथा मृतनाथा वा तस्या नास्त्येव निष्कृतिः ॥

नारदीये,

पाषण्डपूजितं लिङ्गं विष्णुं वापि नमेत्तु यः ।
स कोटिकुलसंयुक्तो रौरवे नरके वसेत् ॥

तदेतत्सर्वमिदं प्रतिष्ठितलिङ्गादिविषयं, न तु पुराणप्रसिद्धमहिम-लिङ्गादिविषयमिति विधानपारिजाते,

यदा प्रतिष्ठितं लिङ्गं मन्त्रविद्भिर्यथाविधि ।

इत्यादिशिवपुराणोक्तेः । अत एव स्कान्दे काशीलिङ्गानि प्रकृ-त्योक्तम् ।

अदृश्यान्यपि दृश्यानि दुरवस्थान्यपि प्रिये ।
भग्नान्यपि च कालेन तानि पूज्यानि सुन्दरि ॥

दुरवस्थानि स्त्रीशूद्रादिपूजितानीति विधानपारिजातकृत् । अस्पृ-श्यस्पृष्टानीति कश्चित् ।

नारदीये,

यदा प्रतिष्ठितं लिङ्गं मन्त्रविद्भिर्यथाविधि ।
ततः प्रभृति शूद्रश्च योषिच्चापि न संस्पृशेत् ॥

प्रागुक्ते एकादशीतत्त्वधृत "विष्णवालयसमीपस्था" नित्यादिवच-

नात् भङ्गया प्रवेशाधिकारोऽन्त्यजादीनां नास्तीति प्रतीयते।

(५२, ५३; ५४; ५५) उ०—तारतम्यरक्षणं युक्तम्। इत्थमेव तत्। तथाहि; येषां यद्याजकत्वं येषु च यद्याजकत्वं शास्त्रसिद्धं तेषामेव परस्परं स्पर्शविषये कूपोदकग्रहणविषये च दोषो नास्ति; इतो वैपरीत्ये तु दोषोऽस्तीति। म्लेच्छानामन्त्यजानां सभाप्रवेशविषये प्रमाणाभावेन दोषाभावात्तारतम्यं नास्ति। अन्यत्सर्वं पूर्ववदेव।

(५६) उ०—अस्पृश्यजातिर्जन्मकृता। तारतम्यरक्षणं योग्यम्।

(५७) उ०—देवलस्मृतिः।

सर्वाचारविहीनश्च म्लेच्छ इत्यभिधीयते।

अन्त्यजास्तु;

रजकश्चर्मकारश्च नटो बुरुड एव च।
कैवर्तमेदभिल्लाश्च सप्तैते चान्त्यजाः स्मृताः॥
वापीकूपतडागानां दूषितानां च शोधनम्।
कुम्भानां शतमुद्धृत्य पञ्चगव्यं ततः क्षिपेत्॥
कूपो मूत्रपुरीषेण यवनेन च दूषितः।
श्वश्रृगालखरोष्ट्रैश्च क्रव्याद्भिश्च जुगुप्सितः॥
उद्धृत्यैव तु तत्तोयं सप्त पिण्डान् समुद्धरेत्।
पञ्चगव्यं मृदा पूतं कूपे तच्छोधनं मतम्॥
अन्त्यजैः स्वीकृते तीर्थे तडागेषु नदीषु च।
शुद्ध्यते पञ्चगव्येन पीत्वा तोयमकामतः॥

इत्यादिना अन्त्यजादिस्पर्शे दोषः श्रूयते। देवतादिस्पर्शेऽप्येवमेव। कूपोदकस्पर्शे कूपस्य संस्कारः। देवतास्पर्शे तस्याः पुनः प्रतिष्ठैव; परं तु दूरतो जलग्रहणं देवतादर्शनं च न वारणीयम्। स्पर्शस्तु अत्यन्तं निषिद्ध एव। साधारणसभाप्रवेशश्चैषां कथमवरुद्ध्येत। परं तु ब्राह्मणपण्डितानां सभाप्रवेशः सर्वथा निरस्यः।

(५८) उ०—सभाप्रवेशविषये प्रतिष्ठितकूपादिविषये अनादिदेवालय-

प्रवेशविषये च तारतम्यरक्षणमयुक्तम् ।

(५६) उ०—म्लेच्छादीनां सभाप्रवेशविषये च स्पर्शविषये च अन्येभ्यस्तारतम्यमावश्यकम् । देवालयप्रवेशविशये च उत्सवादिभ्योऽन्यत्र स्पर्शनादि कृत्वा स्नानादिकं कुर्यादेव । सभाप्रवेशविषये च धर्मसभादौ प्रवेशनं न युक्तम् । राजकीयसभादौ तु आसनादेर्यथासम्भवं पृथङ्निर्देशः कर्तव्यः । सर्वसाधारणजलाशये पुष्करिण्यादौ न दोषः । कूपे दोषोऽस्त्येव । तीर्थादेरन्यत्र साधारणदेवालयेऽपि म्लेच्छानामन्त्यजानां च प्रवेशो नैव विधेयः । तीर्थादावपि देवालये म्लेच्छानां न प्रवेशः, सर्वधर्मपरित्यागश्रवणात् तेषां दर्शनादौ प्रायश्चित्तस्मरणाच्च । तद्यथा, "कृतलक्षणैः दर्शनस्पर्शनसम्भाषणानि वर्जयेत् ।" कृतलक्षणैः पतितैः । देवलः,

चण्डालेन शुना वापि दृष्टे हविरयज्ञियम् ।
बिडालादिभिरुच्छिष्टं दुष्टमन्नं विवर्जयेत् ॥

शातातपः,

क्लीबाभिशस्तपतितैः सूतिकोदक्यनास्तिकैः ।
दृष्टं वा स्याद्यदन्नं तु तस्य निष्कृतिरुच्यते ॥

देवलः,

चण्डालैरुषितं यत्र यत्र विन्यस्यते शवः ।
विण्मूत्रोपहतं यच्च कुणपो यत्र दृश्यते ।
एवं कश्मलभूयिष्ठा भूरमेध्येति कथ्यते ॥ इति ।

(६०) उ०—चण्डालस्पर्शादिनिषेधस्तु पूर्ववदेव "चण्डालदर्शने ज्योतिषां दर्शनम्, ब्राह्मणभाषणे भाषणादिकं, उच्छिष्टस्य चाण्डालस्य दर्शने एकरात्रमुपवासः; सम्भाषणे द्विरात्रं; स्पर्शने सहगमने च सचैलस्नानम्" इति बौधायनेनोक्ततया दर्शनादेरपि निषिद्धत्वात् । सभाप्रवेशप्रतिष्ठितदेवालयप्रवेशावपि निषिद्धौ; "पतितस्पर्शदूषिते"त्यादिवचनात् ।

(६१) उ०—सर्वं पूर्ववदेव । पतितश्च मार्कण्डेयपुराणे—

स्वधर्मं यः समुच्छिद्य परधर्मं समाश्रयेत् ।
अनापदि स विद्वद्भिः पतितः परिकीर्तितः ॥ इति ॥

यत्तु कैश्चिदुच्यते—बृहस्पतिः;

तीर्थे विवाहे यात्रायां संग्रामे देशविप्लवे ।
नगरग्रामदाहे च स्पृष्टास्पृष्टिर्न दुष्यति ॥

अत्रिः—

देवयात्राविवाहेषु यज्ञप्रकरणेषु च ।
उत्सवेषु च सर्वेषु स्पृष्टास्पृष्टिर्न दुष्यति ॥
प्राकाररोधे विषमप्रदेशे
सेनानिवेशे भवनस्य दाहे ।
आरब्धयज्ञेषु महोत्सवेषु
तथैव दोषा न विकल्पनीयाः ॥ इति ।

अत्रेदं विचार्यते; यदुक्तेषु बृहस्पत्यादिवाक्येषु उत्सवादिषु स्पृष्टास्पृष्टिदोषाभाव उक्तः, स च;

चण्डालैरन्त्यजैश्चैव तथान्यप्रतिलोमजैः ।
म्लेच्छैश्च नीचचाण्डालैर्गुरुनिन्दादिदूषतैः ॥
एवमादिभिः संस्पृष्टे देवागारे विशेषतः ।
स्पृष्टे प्रवेशने बाधा पूजाकाले च दर्शने ॥

इति भृगुसंहितोक्तेः सामान्यतो देवालये स्पृष्टे दोषापवादः; न त्वस्पृश्यानां देवतास्पर्शविधायकः । तथा चोक्तं तन्त्रे;

ब्राह्मणस्यैव पूज्योऽहं शुचेरप्यशुचेरपि ।
स्त्रीशूद्रकरसंस्पर्शो वज्रपाताधिको मम ॥

इत्यादिवाक्यैस्तावत् स्त्रीशूद्राणामपि स्पर्शने नास्त्यधिकारः; किमुत चण्डालादीनां म्लेच्छानामिति । अत्र केचित् ; सर्व-स्पर्शदोषापवादकत्वेन बृहस्पत्यादिवाक्यं प्रमाणयन्ति; निद-

शंयन्ति च महापीठे कालीघट्टादौ वर्णनिर्विशेषेण सर्वेषामेव प्रवेशाधिकारं, अन्त्यजानां तत्र देवालयप्रवेशः सर्वैरेव ग्रामीणैरङ्गीक्रियते। तत्र केचन तान्त्रिकाः,

अनादिभूतभूतेशमहिमा वागगोचरः।
महापीठे तवार्चायामस्पृश्यस्पर्शदूषणम्॥
विद्यते सुव्रते नैतल्लिङ्गरूपधरे हरे।
यथा चक्रार्चने देवि कोपि दोषो न विद्यते॥
शिवक्षेत्रे महातीर्थे तथा च न हि कालिके।

इति महानिर्वाणतन्त्रवाक्यं प्रमाणयन्तो महापीठे कालीघट्टादौ अन्त्यजानामपि देवतास्पर्शनेऽधिकारं वर्णयन्ति। यदपि च "पञ्च-महापातकैश्चाण्डालाद्यैश्चालये प्रविष्टे तत्स्पृष्टनिवेदने च सप्ताहं महाशान्तिं हुत्वा देवं कलशैः संस्नाप्य पुनः प्रतिष्ठां कारयेत्" इत्यादिश्रीवैखानसादिप्रमाणं, तत् पुनःप्रतिष्ठावचनात् प्रतिष्ठितविग्रहस्पर्शदोषपरमित्यपि कथयन्ति। वस्तुतस्तु चक्रानदर्शन-प्रदर्शनेन महानिर्वाणतन्त्रवाक्यं कौलपरमेवेति शिष्टसम्मतम्। तथा च सर्वथापि देवतास्पर्शने अन्त्यजानां नाधिकारः। म्लेच्छान्त्यजस्पर्शभयात् सभाप्रवेशादावपि अधिकारसामर्थ्य-भेदात् यथोपयुक्ततारतम्यरक्षणं कर्तव्यमेवेति।

(६४) उ०—कर्मणैवास्पृश्यानामस्पृश्यता, न जातितः, अत एव गुहकश्चाण्डालः स्वसखरामेणानुगृहीत इति रामायणे लिखितम्। श्रीगौराङ्गप्रभृतीनामपि एतदनुकूल एवाचारः श्रूयते। यवनभिन्नानामन्त्यजानां स्पर्शविषये सभाप्रवेशे कूपोदकग्रहणे देवालयप्रवेशविषये च अन्येभ्यो ब्राह्मणादिभ्यः तारतम्यरक्षा नोचिता। केवलं देवालयं प्रविश्य यथासम्भवं पूजोपकरणनैवेद्यादिस्पर्शो न कर्तव्यस्तैः। विश्वेश्वरादिमन्दिरादौ जातिनिर्विशेषेण सर्वेषां प्रवेशाधिकारः सर्वदा दृष्टचरः। परिषदि हट्टादौ

धूमशकटे च परस्परस्पर्शनमनिवार्यम् । पुष्करिण्यादेर्जलग्रहणं च शास्त्रविरुद्धं चेत्, कूपादौ कश्चापराधो धर्मभीरुभिर्दिव्यदृष्ट्याऽवलोकितः । जगन्नाथक्षेत्रे यवनमन्तरेण पानभोजनादौ सर्वेषां तुल्योऽधिकारः, नास्ति तत्र धर्मशास्त्रप्रचारकाणां निबन्धॄणां च विचारावसरः । तीर्थमाहात्म्यमुररीकृतं चेत्, मद्विधानां पतितधुर्याणां वाचालता सामाजिकानां कथं विरक्तिमावहतीति क्षन्तव्यमिति ।

(६८) उ०—तारतम्यरक्षणं युक्तम् । ब्राह्मणादिभिः म्लेच्छानामन्त्यजानां च कूपोदकग्रहणं न कर्तव्यम् । अन्यत्सर्वमपि पूर्ववदेव ।

(६९) उ०—म्लेच्छानामन्त्यजानां च सम्भाषणस्पर्शनेतरसम्बन्धः परिवर्जनीयः । सभायां च गुणवतां पृथगासनं दातव्यम् ।

(७१) उ०—सभाप्रवेशविषये म्लेच्छानामन्त्यजानां च परिषत्त्वं निषिद्धम् । यदाह वसिष्ठः,

अव्रतानाममन्त्राणां जातिमात्रोपजीविनाम् ।
सहस्रशः समेतानां परिषत्त्वं न विद्यते ॥

अर्थिप्रत्यर्थित्वं न निषिद्धं, तत्र सर्वेषामधिकारात् । किं तु मन्त्रणासमये म्लेच्छादीनपसारयेत्, यथा मनुः—

जडमूकान्धबधिरान् तैर्यग्योनान् वयोतिगान् ।
स्त्रीम्लेच्छव्याधितान् व्यङ्गान् मन्त्रकालेऽपसारयेत् ॥

कूपोदकग्रहणविषये कल्पतरौ देवलः,

चाण्डालपतितादीनां पुष्करिण्यां ह्रदेऽपि वा ।
जानुदघ्नाच्छुचि ज्ञेयमधस्तादशुचि स्मृतम् ॥

जानुदघ्नात् जानुपरिमितात् । वृद्धयाज्ञवल्क्यः,

समन्ताच्चतुर्हस्तस्तु जलाशयो भवेद्यदि ।
अन्त्यजैरपि स स्पृष्टः पूतो भवति सर्वतः ॥

इत्यादिवचनादन्येभ्यस्तारतम्यरक्षणं योग्यमेव । देवालयप्रवे-

शविषये तु पुराणप्रसिद्धमहिमलिङ्गादौ अस्पृश्यस्पर्शादौ न दोषः। अत एवोक्तं स्कान्दे काशीलिङ्गानि प्रकृत्य,

अदृश्यानि च दृश्यानि दुरवस्थान्यपि प्रिये।
भग्नान्यपि च कालेन तानि पूज्यानि सुन्दरि॥

दुरवस्थानि अपृश्यस्पृष्टानीति।

(७४) उ०—शातातपः,

रजकश्चर्मकृच्चैव व्याधजालोपजीविनौ।
निर्णेजकः सौनिकश्च ठकः शैलूषकस्तथा॥
मुखेभगस्तथा श्वा च वनिता सर्ववर्णगा।
चक्री ध्वजी वध्यघाती ग्राम्यशूकरकुक्कुटौ॥
एभिर्यदङ्गं संस्पृष्टं शिरोवर्ज्यं द्विजातिषु।
तोयेन क्षालनं कृत्वा आचान्तः शुचितामियात्॥
अन्त्यजेभ्यो म्लेच्छानां जघन्यताया युक्तत्वेऽपि
दासीकृतो बलान्म्लेच्छैश्चण्डालाद्यैश्च दस्युभिः॥

इत्यादिदेवलवचनात् प्रायश्चित्ततत्त्वादौ चण्डालैः सह म्लेच्छानां प्रायश्चित्तविषये तुल्यत्वमुक्तम्। अतः स्पर्शादिविषयेऽपि उभयोस्तुल्यता युक्ता, तथापि शिष्टा अन्त्यजेभ्यः स्पर्शादिविषये म्लेच्छानां जघन्यत्वं मन्यन्ते। व्यवहारोऽपि तथा, तेभ्यो ह्येतयोर्जघन्याचारत्वात्। स्मृतितत्त्वे बौधायनः।

"अनेकोद्धार्ये दारुशिले भूमिसम इष्टकाश्च संकीर्णीभूता"

इति। संकीर्णीभूताः परस्परसम्बद्धाः। शुद्धिचन्द्रालोके,

ग्रामाद्दण्डशतं त्यक्त्वा नगराच्च चतुर्गुणम्।
भूमिः सर्वत्र शुद्धा स्यात् यत्र लेपो न दृश्यते॥
आसनं शयनं यानं नावः पथि तृणानि च।
चाण्डालपतितस्पृष्टं मारुते नव शुद्ध्यति॥
गोकुले कन्दुशालायां तैलयन्त्रेक्षुयन्त्रयोः।

अमीमांस्यानि शौचानि स्त्रीषु बालातुरेषु च ॥

गङ्गाजलस्पर्शेऽपि म्लेच्छं विनाऽन्त्यैः सह अन्त्यजानां समत्वम्। तथा च स्मृतिः,

सर्वत्र पावनी गङ्गा त्रिषु स्थानेषु वर्जिता ।
म्लेच्छस्पृष्टे सुराभाण्डे कूपोदकविमिश्रणे ॥

बृहद्धर्मपुराणवचनेनापि तथा प्रतीयते ।

चण्डालेनापि यस्यास्ये न्यस्येत् गङ्गाजलं परम् ।
सोपि मुक्तिं लभेन्मर्त्यः किं वा पुत्रादिना द्विज ॥
नीचोत्तमविचारं तु कालाकालविचारणाम् ।
देशादेशविचारं तु न गङ्गासलिले चरेत् ॥
प्राप्तमात्रं तु गंगाम्बु प्रणमेत् संग्रहेत् पिबेत् ।

एवं रीत्याऽन्त्यजानां म्लेच्छेभ्यस्तारतम्यं वर्तते,स्पर्शविषये सभाप्रवेशविषये तु अन्त्यजानां म्लेच्छानां च ऐकरूप्यमेव । कूपोदकग्रहणविषये जानुपरिमाणादूर्ध्वं चेज्जलं आपदि स्नानपानादौ ग्रहणीयम् । अन्यैरस्पृश्यानामन्त्यजानां स्पृष्टत्वेपि यथा, शुद्धिचन्द्रालोके कल्पतरौ देवलः,

चाण्डालपतितादीनां पुष्करिण्यां ह्रदेऽपि वा ।
जानुदघ्नाच्छुचि ज्ञेयं अधस्तादशुचि स्मृतम् ॥

एतच्चापदि स्नानयात्रादौ बौधायनः

खलक्षेत्रेषु यद्धान्यं कूपवापीषु यज्जलम् ।
अभोज्यादपि तद्भोज्यं यच्च गोष्ठगतं पयः ॥

शुद्धिचन्द्रालोके उशनाः,

नद्यः कूपतडागानि सरांसि सरितस्तथा ।
असंवृतान्यदोषाणि मनुः स्वायंभुवोऽब्रवीत् ।

सरितः सरणशीलाः निर्झररूपाः । असंवृतानीत्यनेन अस्पृश्यस्पर्शसम्भावना दर्शिता । अत एव असंवृतानि अस्पृश्यस्पृष्टन्या-

पीति लक्ष्मीधरः। एतदपि देवलवचनानुसाराज्जानुदघ्नादूर्ध्व-मिति ज्ञेयम्। एतदन्यत्र अन्त्यजादिस्पृष्टकूपोदकं न ग्राह्यमन्यैः,

श्वपाकचाण्डालपरिग्रहे तु—

पीत्वा जलं पञ्चगव्येन शुद्धिः, इत्यादिवचनात्।

(७८) उ०—

महापातकिसंस्पर्शे स्नानमेव विधीयते।

संस्पृष्टस्तु यदा भुङ्क्ते तप्तकृच्छ्रं समाचरेत्॥

"अमेध्यचाण्डालपतितपुक्कसरजस्वलाऽवधूतकुणिकुष्ठिस्पृष्टानि भुक्त्वा कृच्छ्रं चरेत्" इति शङ्खवचने साहचर्यदर्शनात् चाण्डालादिस्पर्शेऽप्येतद्वेदितव्यम्।

सर्वेषामन्त्यजातीनां स्पर्शे त्वाचमनं विदुः।

येषां तु ब्राह्मणो नास्ति तेषां स्नानं विधीयते॥

इति आपस्तम्बवचनेन अन्त्यजस्पर्शात् चाण्डालादिस्पर्शे विशेषो व्यवस्थापितः। चण्डालादिस्पृष्टकूपजलपाने स्पृष्टवदेव प्रायश्चित्तमिति रिपुञ्जयेण लिखितम्।

(८०) उ०—

म्लेच्छानामन्त्यजानां च स्पर्शादिविषये तारतम्यरक्षणं यथा-सम्भवं स्वस्वदेशरीत्या करणीयम्। कूपोदकग्रहणविषये तारतम्यरक्षणं न योग्यम्।

आकराः शुचयः सर्वे वर्जयित्वा सुराकरम्।

इति मनुवचनात्।

(८३) उ०—यवनस्य म्लेच्छत्वमप्युक्तं विष्णुपुराणे तथा कृतान्यवनादीनुपक्रम्य "ते चात्र धर्मपरित्यागान्म्लेच्छत्वं ययु" रिति।

दासीकृतो बलान्म्लेच्छैश्चाण्डालाद्यैश्च दस्युभिः।

इति देवलवचनात् चाण्डालानां यवनैः साम्यमिति। बौधायनः "चाण्डालदर्शने ज्योतिषां दर्शनं" इति। इत्यादि बहुवचन-

पर्यालोचनया सम्भावयति तावत्। इतरजात्यपेक्षया म्लेच्छाना-मन्त्यजानां च स्पर्शनविषये प्रायश्चित्ताधिक्यदर्शनात्। बौधा-यनसूत्रे चाण्डालदर्शनादिषु प्रायश्चित्तविशेषश्रवणाच्च। प्रायश्चि-त्ततारतम्यात् अन्यत्रापि तारतम्यं स्फुटमेव, यत्र दर्शन एव प्रायश्चित्तश्रुतिस्तत्र स्पर्शने किमु वक्तव्यम्। कूपोदकग्रहण-विषये यथा,

आकराः शुचयः सर्वे वर्जयित्वा सुरालयम्।

इतिदेवलवचनात्,

प्रदद्यात्सर्वभूतेभ्यो जलपूर्णं जलाशयम्।

इति मत्स्यपुराणवचनाच्च, जलाशयोत्सर्गस्य सर्वभूतसम्प्रदा-यकत्वेन अपकृष्टचेतनोद्देश्यकत्वात्। एवं,

सामान्यं सर्वभूतेभ्यो मया दत्तमिदं जलम्।
रमन्तु सर्वभूतानि स्नानपानावगाहनैः॥

इति मन्त्रलिङ्गाच्च धर्मार्थदेयजलाशयजलादानविषये सर्वेषामे-वाधिकारः। देवालयप्रवेशविषये तु ब्राह्मणादयः स्वस्वदेवालयं गत्वा सुखासनमुपविश्य हरिस्मरणाचमनन्यासादिभिः पाञ्च-भौतिकं संशोध्याहरहः क्रियमाणनित्यनैमित्तिकक्रियाकलापैः पूतदेहो ध्येयं सदा चिन्तयन्ति, यदि म्लेच्छान्त्यजास्तं प्रविशेयुः तदा तद्दर्शने तद्देहाशुद्धौ तदाचरितकार्यकलापफलं नाप्नुयुरत-स्तत्र तद्गमनमनुचितम्।

बहिर्ग्रामान्त्यजान् सूतो पतितं च रजस्वलाम्।
न स्पृशेन्नाभिभाषेत नेक्षेत व्रतवासरे॥

यत्र दर्शनं विरुद्धं तत्र प्रवेशने किं वक्तव्यम्। अपि च देवालये बहूनि आसादितहवनीयद्रव्याणि स्युः, यदि दैवात्तत्र चाण्डा-लादयः प्रविशेयुस्तदा तत्सर्वमयज्ञियं स्यात्।

तथा च देवलः,

चण्डालेन शुना वापि दृष्टे हविरयज्ञियम् ।
विडालादिरुच्छिष्टं विवर्जयेत् ॥

अतस्तद्गमनं न विधेयम् ।

(८६) उ०—म्लेच्छानामन्त्यजातीनां च स्पर्शादिविषये यथासम्भवं तारतम्यं रक्षणीयं, तदितरत्र सर्वथेति मतमस्माकम् ।

(६१) उ—म्लेच्छानामन्त्यजानां च स्पर्शविषये समानदोषः, स तु सहनीयः, सभाप्रवेशविषये च पुष्करिण्यादिवत्कूपोदकग्रहणेऽपि देवालयप्रवेशो म्लेच्छानां नाधिकारः। तदितरेषां अन्त्यजादीनां तु देवालयप्रवेशो न तु गुरुतरदोषावहः, परं तु देवतास्पर्शाधिकारो नास्ति ।

(६४) उ०—कूपोदकग्रहणविषये साधारणकूपादसाधारणकूपाद्वा म्लेच्छादिभिर्न भाण्डेनाहरणीयमन्यैस्तु स्वभाण्डेनापि आहर्तुं शक्यते, एवं तारतम्यम् ।

चण्डालभाण्डसंस्पृष्टं पीत्वा कूपगतं जलम् ।
गोमूत्रयावकाहारस्त्रिरात्राच्छुद्धिमाप्नुयात् ॥

इति धावकवचनात् । प्रायश्चित्ततत्वे,

दासीकृतो बलान्म्लेच्छैश्चाण्डालाद्यैश्च दस्युभिः ।

इत्यादिवचनैर्म्लेच्छचाण्डालयोः साम्याभिधानात् पराशरवचने चाण्डालपदेन म्लेच्छस्यापि धर्तुं शक्यत्वात् । म्लेच्छानां तु सर्वधर्मराहित्येन कुत्रापि प्रवेशाधिकारो नास्ति, अन्त्यजानां तु यस्मिन्देशे यस्मिन्देवालये प्रवेशाधिकारो वर्तते तत्रैव न चान्यत्र ।

(६५) उ०—स्वभाण्डभिन्नेन कूपजलं ग्रहीतुं चण्डालतया म्लेच्छादिभिः शक्यते ।

(६७) उ०—कूपोदकग्रहणविषये तु म्लेच्छान्त्यजयोरपि तारतम्यमस्ति, तथा च म्लेच्छचाण्डालादिभिः खानिते कूपे अन्यखानिततत्परिगृहीतोदके च जलस्य दूषकता, अन्त्यजादिभिस्तु

खानिते कूप एव नत्वन्यखानिततत्परिगृहीतोदकोऽपि। चाण्डालादिभिरित्यादिपदं अन्त्यजस्याप्युपलक्षकम्। एतानि च,

चण्डालकूपभाण्डेषु यस्त्वज्ञानाज्जलं पिबेत्।
स तु त्र्यहेण शुद्ध्येत शूद्रस्त्वेकेन शुद्ध्यति॥

तथा,

चाण्डालपरिगृहीते यो ह्यज्ञानादुदकं पिबेत्।
तस्य शुद्धिं विजानीयात्प्राजापत्येन नित्यशः॥

तथा,

श्वपाकचाण्डालपरिग्रहेषु
पीत्वा जलं शुध्यति पञ्चगव्यैः॥

तथा,

म्लेच्छभाण्डस्थिता दुष्टाः।

तथा,

अन्त्यजैः खानिता कूपास्तडागानि तथैव च।
एषु स्नात्वा च पीत्वा च पञ्चगव्येन शुध्यति॥

इत्यादिप्रायश्चित्तविवेकधृतदेवलाङ्गिरआपस्तम्वयमवचनेभ्य उन्नेयानि। देवालयप्रवेशविषये तु देवपूजादीनां यागत्वात् तदुपकरणानां च हविष्ट्वात् म्लेच्छचाण्डालयोः साम्याभिधानम्।

चाण्डालेन शुना वापि दृष्टं हविरयज्ञियम्।

इति देवलवचनेन चाण्डालादिदृष्टे च तस्यायज्ञियत्वाभिधानात् म्लेच्छचाण्डालादीनां देवालयप्रवेशे च पूजोपकरणदर्शनस्यावश्यंभावित्वात् देवालयप्रवेशे तेषामनधिकारः। न चैवं पूजोपकरणरहिते देवालयेऽथवा मुद्रितनेत्रे अन्धे वा चण्डालादौ प्रविष्टे दोषो मा भूदिति वाच्यम्। "चाण्डालसङ्करेषु भवनदहनं वपनं सर्व्वभाण्डभेदनं दारवाणां तक्षणं शङ्खशुक्ति-

सुवर्णरजतचैलानामद्भिः प्रक्षालनं कांस्यताम्राणामाकरे शुद्धिः सौवीरपयोदधितक्राणां परित्याग" इत्यादिविवेककारधृतच्यवनवचनेन चाण्डालादिसंसर्गे गृहादीनामपि दुष्टत्वाभिधानात् चातुर्वर्ण्यस्य तु देवालयप्रवेशे न गृहादीनां दुष्टत्वमिति तारतम्यं ज्ञेयम् ।

(६८) उ०—चर्मकारवेनचाण्डालादिप्रसङ्गे मनुः,

न तैः समयमन्विच्छेत् पुरुषो धर्ममाचरन् ।

अत्र भाष्यकारो मेधातिथिः, "एकत्र स्थानासनविहारास्तैर्न कर्तव्या इति । तेन अन्त्यजादीनां सभाप्रवेशो निषिद्ध इति ज्ञायते । कूपोदकग्रहणविषये,

चण्डालपात्रसंस्पृष्टं पीत्वा कूपगतं जलम् ।
गोमूत्रयावकाहारस्त्रिरात्रेण विशुद्ध्यति ॥

संवर्तः (अध्याय१श्लो० १०२) ।

चण्डालभाण्डस्पृष्टस्य निषेधेन चण्डालस्पृष्टस्यापि निषेधस्तात्पर्यतो लभ्यत एव । चण्डालपदेन यथा म्लेच्छानामन्त्यजानां च सर्वेषां परिग्रहस्तथाऽग्रे वक्ष्यते ।

अन्त्यजैः स्वीकृते तीर्थे तडागेषु नदीषु च ।
शुध्यते पञ्चगव्येन पीत्वा तोयमकामतः ॥

संवर्तः (प्र०१श्लो०,१८३०) ।

चण्डालखातवापीषु पीत्वा सलिलमग्रजः ।
अज्ञानाच्चैव नक्तेन त्वहोरात्रेण शुध्यति ॥

पराशरः (अ० ६श्लो०३३ ।

इति वचनयोरन्त्यजाधिकृतचण्डालखातवाप्यादिपर्यन्तस्यापि दुष्टत्वप्रतिपादनात् तत्स्पृष्टकृतजले सुतरामेव दुष्टत्वमवगन्तव्यम् ।

देवालयप्रवेशविषये—

अन्त्यजातिरविज्ञातो निविशेद्यस्य वेश्मनि ।
स वै ज्ञात्वा तु कालेन कुर्यात्तत्र विशोधनम् ॥

आपस्तम्बः,

अविज्ञातश्च चाण्डालः सन्तिष्ठेत्तस्य वेश्मनि ।
विज्ञाते तूपसन्नस्य द्विजाः कुर्वन्त्यनुग्रहम् ॥

पराशरः,

इत्यादिवचनैः उच्चजातीयानां गृहे चाण्डालादिप्रवेशे दोषप्रतिपादनात् । द्रव्यशुद्धिप्रस्तावे मनुः—

"मार्जनोपाञ्जनैर्वेश्म" (५अ०१२२) इति । अत्र मेधातिथिभाष्यम्, "एतच्च शवचाण्डालादिभिर्भित्तिसंस्पर्शे व्यापिनि द्रष्टव्यम्, अव्याप्तौ तु तावन्मात्रस्यैवे"ति । एतादृशग्रन्थेनापि साधारणगृहादीनामपि शुद्धिविधानात् तदपेक्षया पवित्रे देवगृहादौ म्लेच्छादिप्रवेशे देवस्य तथा तद्गृहाभ्यन्तरस्थजलादीनामपवित्रत्वं सुतरामायाति । चाण्डालान्त्यस्त्रियो गत्वा" इत्यादिवचने म्लेच्छानां चण्डालतुल्यव्यवस्थतया अन्त्यशब्दपाठात् विशेषानुक्तौ चण्डालसमानप्रायश्चित्तमेव स्यादिति स्मार्तभट्टाचार्यसमाधानम् । तथा च पूर्वोक्तेषु प्रमाणीभूतेषु वचनेषु प्रायशः चण्डालपदसत्वेपि अन्त्यजानामपि ग्रहणं बोध्यम् । अन्ते भवा अन्त्या इति व्युत्पत्या अन्त्यशब्दस्य म्लेच्छादिबोधकत्वं याज्ञवल्क्यदीपकलिकायां समर्थितमतः चाण्डालान्त्यजातिसाम्येन म्लेच्छानामपि व्यवस्था ज्ञेया ।

(९६) उ०—म्लेच्छानामन्त्यजानां च "इन्दार" इति ख्यातवृहत्कूपविषये सार्वजनीनसभाप्रवेशविषये च तारतम्यं न रक्षणीयम् ।

स्मृतिः—

तृणे काष्ठे रणे यज्ञे नौकायां गजपृष्ठके ।

लौकयात्राविवाहेषु स्पर्शदोषो न विद्यते ॥

(१००) उ०—म्लेच्छानामन्त्यजानां च स्पर्शविषये सभाप्रवेशविषये च साधारणं पापम् । किन्तु कूपोदकग्रहणविषये देवालयप्रवेशनविषये च दोषो भवत्येव, "अन्त्यजैः खनिता कूपा" इत्यादिवचने अन्त्यजादिकर्तृकखानितकूपस्थितजलस्य अव्यवहार्यत्वे कूपोदकस्पर्शे कैमुतिकन्यायाद्दोषः स्वतः सिद्ध एव ।

(१०१) उ०—वर्तमानकाले येऽस्पृश्याः वर्तन्ते तेषु बहवः जात्यैवास्पृश्याः बहवश्च कर्मणा समाजशास्त्या अस्पृश्यतां गताः । सत्कर्मानुष्ठानेन नीचवर्णस्यापि उत्कृष्टवर्णप्राप्तिः शास्त्रसम्मता । शास्त्रे तत्र प्रमाणानि उदाहरणरूपेण बहूनि सन्ति । म्लेच्छान्त्यजयोस्तारतम्यमवश्यं रक्षणीयमेव, हिन्दुधर्मविश्वासाविश्वासयोस्तारतम्यप्रयोजकयोरनिवार्यत्वात् । स्पर्शविषये सभाप्रवेशविषये कूपोदकग्रहणविषये च सर्वेषां समानाधिकारप्रदानमेवोचितम् । अनादिकालप्रसिद्धसिद्धमहापुरुषप्रतिष्ठितदेवालयेषु सर्वेषामेव प्रवेशाधिकारः । पारिवारिकदेवमन्दिरेष्वपि मन्दिराधिकारिणामनुमत्या प्रवेशः सम्भवति ।

(१०२) उ०—म्लेच्छानामन्त्यजानां अन्येभ्यस्तारतम्यरक्षणं सर्वत्र योग्यमेव । तत्तारतम्यरक्षणप्रकारस्तु, म्लेच्छानामन्त्यजानां साक्षात्स्पर्शो निषिद्ध एव । परम्परास्पर्शस्तु चतुर्थपर्यन्तं निषिद्धः । बहुजनाकीर्णसभाप्रवेशे यात्रोत्सवादौ च स्पृश्यास्पृश्यविचाराभावात्तेषां स्पर्शो न दोषाय कल्पते । देवालयस्य बहिर्द्वारात् बहिःस्पर्शे न दोषः । बहिर्द्वाराद्भ्यन्तरप्रवेशस्तु निषिद्ध एव । श्रीश्रीपुरुषोत्तमधामविराजमानश्रीश्रीपुरुषोत्तमतोरणाद्वारबहिर्भागे म्लेच्छादीनामवस्थानं तोरणद्वारावधितदभ्यन्तरगमनं तु निरवधि निषिद्धमिति । कूपोदकग्रहणे तु एकव्यक्तिप्रयतनसाध्यैकाहोरात्रजलोत्तोलनवशान्निर्जलकूपे म्लेच्छान्त्यजाना-

साक्षाज्जलग्रहणं निषिद्धम् । अशोष्यकूपे तु विशुद्धरज्जुद्वारा विशुद्धपात्रद्वारा जलाहरणं न दोषाय भवति, पुष्करिण्यादौ मृतजीवादिपतनमरणापवित्रीकृतजलादौ तथा दर्शनात् ।

(१०३) उ०—

दीर्घकाष्ठे शिलापृष्ठे नौकायां जान्हवीतटे ।
महातीर्थे तु सम्प्राप्ते स्पर्शदोशो न विद्यते ॥

इति स्मृतिः ।

(१०५) उ०—कूपोदकग्रहणविषये तु,

चण्डालभाण्डसंस्पृष्टं पीत्वा कूपगतं जलम् ।
गोमूत्रयावकाहारस्त्रिरात्राच्छुद्धिमाप्नुयात् ॥

इति पराशरवचनात् चण्डालभाण्डस्पृष्टकूपोदकपाने प्रायश्चित्तीयता, अन्येषां न तथेति वैशिष्ट्यम् ।

(१०७) उ०—चाण्डालादीनां जातितोऽस्पृश्यत्वम् । पतितादीनां ब्राह्मणादीनां तु कर्मतः. म्लेच्छानामन्त्यजानां च तीर्थादौ स्पर्शविषये तारतम्यं नास्ति । सभाप्रवेशविषये सहासनपरित्यागरूपं तारतम्यं अन्येभ्यो रक्षणीयम् । कूपोदकग्रहणविषये साधारणकूपादसाधारणकूपाद्वा म्लेच्छादिभिः स्वभाण्डेन न तोयमाहरणीयम् । अन्यैस्तु स्वभाण्डेनापि सलिलमाहर्तुं शक्यमित्येव तारतम्यम्,

चण्डालभाण्डसंस्पृष्टं पीत्वा कूपगतं जलम् ।

इत्यादिपराशरवचनात् । "दासीकृतो बलान्म्लेच्छै"रित्यादिदेवलवचने म्लेच्छचाण्डालयोः साम्याभिधानात् पूर्ववचने चण्डालनिषेधे म्लेच्छस्यापि निषेधः। म्लेच्छानां सर्वधर्मराहित्येन कुत्रापि देवालये प्रवेशाधिकारो नास्ति अन्त्यजानां तु देवालयप्रवेशविषये तत्तद्देशानुसारेण व्यवस्था कर्तव्या ।

(१०८) उ०—जातितः कर्मतश्चास्पृश्यत्वम् । स्पर्शविषये म्लेच्छाना-मन्त्यजानां च अन्येभ्यस्तारतम्यरक्षणं योग्यम् । सभाप्रवेशविषये चतुर्हस्तपरिमितकूपोदग्रहणविषये च तारतम्यं नास्ति । पीठस्थानादन्यत्र देवालयप्रवेशविषये तारतम्यमस्त्येव ।

(१०९) उ०—जातिविशिष्टकर्मकृतमस्पृश्यत्वम् । म्लेच्छानामन्त्यजानां च स्पर्शविषये दोषोऽस्त्येव । तथाहि—

चण्डालेन यदा स्पृष्टं द्विजवर्णः कथञ्चन ।
अनभ्युक्ष्य पिबेत्तोयं प्रायश्चित्तं कथं भवेत् ॥
ब्राह्मणस्य त्रिरात्रं तु पञ्चगव्येन शुद्ध्यति ।
अहोरात्रं तु वैश्यस्य पञ्चगव्येन शुद्ध्यति ॥
क्षत्रियस्य द्विरात्रं तु पञ्चगव्येन शुद्ध्यति ।
चतुर्थस्य तु वर्णस्य प्रायश्चित्तं कथं भवेत् ॥
व्रतं नास्ति तपो नास्ति होमो नैव च विद्यते ।
पञ्चगव्यं न दातव्यं तस्य मन्त्रविवर्जनात् ॥
ख्यापयित्वा द्विजानां तु शूद्रो दानेन शुद्ध्यति ।

इत्यापस्तम्बवचनात्,

चर्मको रजको वैण्यो धीवरो नटकस्तथा ॥
एतान् स्पृष्ट्वा द्विजो मोहात् आचामेत्प्रयतोऽपि सन् ।
एतैः स्पृष्टो द्विजो नित्यमेकरात्रं पयः पिबेत् ॥
एकशाखां समारूढश्चाण्डालो वा रजस्वला ।
ब्राह्मणश्च समं तत्र सवासाः स्नानमाचरेत् ॥

इत्यादिवचनेभ्यः,

रजकं चर्मकारं च नटं धीवरमेव च ।
बुरुडं च तथा स्पृष्ट्वा शुद्ध्येदाचमनाद् द्विजः ॥

इत्यङ्गिरोवचनाच्च दोषश्रवणात् ।

तथा चाण्डालसंकरे स्वभवनदहनं पवनं दारवाणां तक्षणं शङ्ख-

शुक्तिसुवर्णरजतचैलानामद्भिः प्रक्षालेन कांस्यताम्राणामाकरे शुद्धिः सौवीरपयोदधितक्राणां परित्यागः, शेषरसद्यवसद्रव्यरक्षणं गोमूत्रयावकाहारो मासं क्षपयेत् । बालस्त्रीवृद्धानामर्धप्रायश्चित्तं चीर्णे प्रायश्चित्ते ब्राह्मणभोजनं गोशतं च प्रदद्यात् अभावे सर्वस्वम्" ।

अन्त्यजातिरविज्ञातो निवसेद्यस्य वेश्मनि ।
तस्य ज्ञात्वा तु कालेन कुर्यात्तस्य विशोधनम् ॥
प्राजापत्यं तु शूद्रस्य शेषं तदनुसारतः ।
तेषामपि च यैर्भुक्तं कृच्छ्रार्धं तु विधीयते ॥
तेषामपि च यैर्भुक्तं कृच्छ्रपादो विधीयते ।
एकशाखां समारूढश्चाण्डालादिर्यदा भवेत् ॥
ब्राह्मणस्तत्र निवसन् स्नानेन शुचितामियात् ।
एकवृक्षसमारूढौ चाण्डालब्राह्मणौ यदि ।
फलं भक्षयतस्तत्र प्रायश्चित्तं कथं भवेत् ।
ब्राह्मणानामनुज्ञाप्य सवासा स्नानमाचरेत् ॥
अहोरात्रोषितो भूत्वा पञ्चगव्येन शुद्ध्यति ।
एकशाखां समारूढः फलान्यश्नात्यसौ यदि ॥
प्रायश्चित्तं त्रिरात्रं स्यात् पञ्चगव्यविशोधनम् ।

इत्यादिभ्यो वचनेभ्यः । सभाप्रवेशोऽपि न योग्यः,

सभायां स्पर्शने चैव म्लेच्छेन सह संविशेत् ।
कुर्यात्स्नानं सचैलं तु दिनमेकमभोजनम् ॥

इति देवलवचनात् । कूपोदकविषये तु,

कूपैकपानदुष्टानां तथा संसर्गदूषणे ।
उपवासेन शुद्धिः स्यात् पञ्चगव्येन शुद्ध्यति ।

देवालयप्रवेशोऽपि,

शालग्रामं न स्पृशेत्तु हीनवर्णो वसुन्धरे ।

इत्यादिवचनानि प्रमाणानि।

(११०) उ०—अस्पृश्यत्वं क्वचिज्जातितः कर्मतश्च, चाण्डालान्त्यजयोः स्पर्शदोषो वर्तत एव कूपोदकग्रहणविषये आपस्तम्बः;

कूपो मूत्रपरीषेण यवनेनापि दूषितः।

इत्यादि। संवर्तः—

पञ्चगव्यं मृदश्च पूतं कूपे तच्छोधनं मतम्।
अन्त्यजैः स्वीकृते तीर्थे तडागेषु नदीषु च॥
शुद्ध्यते पञ्चगव्येन पीत्वा तोयमकामतः।
जलाशयेष्वथाल्पेषु स्थावरेषु महीतले॥
कूपवत्कथिता शुद्धिर्महत्सु तु न दूषणम्।

इत्यादिवचनैवर्णबाह्यमतबाह्यम्लेच्छान्त्यजादीनां स्पर्शः कूपे निषिद्ध एवावगम्यते।

(११३) उ०—संन्यासिव्यतिरिक्तानां दृष्ट्या अस्पृश्यता जातिकृता वर्तत एव—

युद्धे भूपतिदर्शने भयवने घाते च पाते हठे
जलौघप्रतरणे शत्रौघ उच्चाटने।
सिंहद्रव्यशरे गजे च महिषे चाश्वे मृगे धार्यते।
एतदतिरिक्तस्थले अस्पृश्यदोषो ज्ञातव्यः।

देवताया अभक्तानां देवालये प्रवेशो न योग्यः, कूपोदकग्रहणादिविषये तु तारतम्यरक्षणं योग्यमेव।

(११५) उ०—अस्पृश्यानामस्पृश्यत्वं जातित एव, म्लेच्छानामन्त्यजानां च तत्तद्देशीयशिष्टाचारानुरोधेन तारतम्यरक्षणं योग्यम्।

(११७) उ०—मनुष्याणामन्योन्यास्पृश्यत्वमौपाधिकमेव न तु आगमसिद्धम्। यथा वा अस्पृश्यत्वमशुद्ध्यादिना सम्भाव्यते। अशुद्धिश्च मालिन्यदौर्गन्ध्यादिना जायते, मालिन्यादिकं धातुक्षोभव-

शाद् देहे संक्रामति, क्षोभश्च जनिमृतिश्रवणदूराध्वगमक्षौररोन-गपतनादिक्रियाविशेषेणोद्भवति। स्नानशौचादना सद्विचारेण सदसद्विवेकेन च बाह्याभ्यन्तरशुद्धिर्जायते इति गारुडवचनम्। तस्माद् देहाऽपवित्रत्वं कादाचित्कमेव इति द्योत्यते। धर्मशास्त्रकारैर्म्लेच्छचाण्डालपुकसा इति जातिकल्पनेन व्यवहृतेऽपि तज्जातिकल्पनं मनुवचनेन खण्डितं भवति।

ब्राह्मणाः क्षत्रियाः वैश्यास्त्रयो वर्णा द्विजातयः।
चतुर्थ एकजातिस्तु शूद्रो नास्ति तु पञ्चमः॥

इति। अतश्चाण्डालत्वादिकं वृत्त्यैव जायते, न तु जात्या। तादृशो ब्राह्मणोपि चण्डालतामियात्।

तदुक्तं मनुसंहितायाम्,

न जातिः पूज्यते राजन् गुणाः कल्याणदायकाः।
चाण्डालमपि सद्वृत्तं तं देवा ब्राह्मणं विदुः॥

शूद्राणां तु,

भविष्यच्छूद्रयोन्यां तु तपश्चर्या कलौ युगे।

इति रामायणोक्त्या इदानीं ब्राह्मणसमानकर्माधिकारसिद्धिः।

(११९) उ०—अन्त्यजानां जातितोऽस्पृश्यत्वं पतितानां कर्मतः। तेषां च सभाप्रवेशे "इन्दारा"ख्यकूपे पीठस्थानदेवालयेषु प्रवेशे महोत्सवादिषु स्पर्शे चाधिकारः, नान्यत्र।

(१२०) उ०—अस्पृश्यानां मन्दिरप्रवेशोऽनधिकार एव। अत एव तेषां मन्दिरप्रवेशे वृद्धहारीतेन मन्दिरसंस्कारो विहितः। तथाहि,

प्रासाददेवहर्म्याणां चाण्डालपतितादिषु।
अन्तः प्रविष्टेषु तथा शुद्धिः स्यात्केन कर्मणा॥
गोभिः सङ्क्रमणं कृत्वा गोमूत्रेणैव लेपयेत्॥ ६। ४०६॥
पुण्याहं वाचयित्वा तु तत्तोयैर्दर्भसंयुतैः॥
सम्प्रोक्ष्य सर्वतः पश्चाद्देवं समभिषेचयेत्॥ ६। ४१०॥

पञ्चामृतैः पञ्चगव्यैः स्नापयित्वाथ वैष्णवः ।
प्रत्यृचं पावमान्यैश्च वैष्णवैश्चाभिषेचयेत् ॥ ६।४११ ।
अष्टोत्तरसहस्रं वा शतमष्टोत्तरं तु वा ।
चतुर्भिर्वैष्णवैर्मन्त्रैः स्नाप्य पुष्पाञ्जलिं तथा ॥ ६।४१२ ।
श्रीसूक्तेन तदा दिव्यैर्दद्यान्नीराजनां द्विजः । इति ।

यत्तु केचित्, धूमयानादिषु चाण्डालादिस्पर्शस्य सर्वैः क्रियमाणत्वादन्यत्रापि तत्स्पर्शो न दोषावह इति, ते त्वित्थं वाच्याः, पुरीषमुत्सृज्य शौचं कुर्वद्भिर्भवद्भिः पुरीषस्पर्शोऽवश्यं क्रियत इति भोजनकालेपि क्रियतामिति । वस्तुतस्तु अवर्जनीयस्थलेषु स्पर्शे दोष एव नास्ति, "देवयात्राविवाहेष्वि" त्याद्यत्रिसंहितावचनात् । अत एव "पथि शूद्रवदाचरे" दिति सामान्येनोपादानम् ।

(१२१) उ०—जातितः कर्मतश्चास्पृश्यत्वमुत्पद्यते। सुशिक्षयाऽन्तःशुद्धौ सत्यामपि वहिर्व्यवहारेऽस्पृश्यतावर्जनं तु समाजघातकमेव । यवनानां देवालयाः कूपाश्च पृथक्कर्तव्याः म्लेच्छानां यावानधिकारो हिन्दुभिः प्रदीयते तावांस्तु अन्त्यजेभ्यः अवश्यं देयः । अन्त्यजानां परधर्मप्रवेशे कारणं तु मोहम्मदादिगृहेषु जीविकालाभ एव । नान्यत्किमपि ।

(१२३, १२४) उ०—प्राचीनपक्षः ।

(१२५, १२६, १२७) उ०—चाण्डालादिस्पृष्टकूपोदकग्रहणविषये हारीतः,

अमेध्यशवचाण्डालमद्यमांसादिदूषितात् ।
कूपादुद्धृत्य कलशैः सहस्रं रेचयेज्जलम् ॥
निक्षिप्य पञ्च गव्यानि वारुणैरपि मन्त्रयेत् ।

एवमन्यस्मिन्नपि चाण्डालादिदूषिते हारीतः,

तडागस्यापि शुद्ध्यर्थं गोभिः संक्रामयेज्जलम् ।
धान्ये तु क्षालनाच्छुद्धिर्बाहुल्यं मोक्षणादपि ॥
रसानां तु परित्यागश्चाण्डालादिप्रदूषणात् ।

एवं देवालयादिप्रवेशविषयेऽपि देवलः,

प्रासाददेवहर्म्याणां चाण्डालपतितादिषु ।
अन्तः प्रविष्टेषु तथा शुद्धिः स्यात् केन कर्मणा ॥
गोभिः संक्रमणं कृत्वा गोमूत्रेण च लेपयेत् ।
पुण्याहं वाचयित्वा तु तत्तोयैर्दर्भसंयुतैः ॥
सम्प्रोक्ष्य सर्वतः पश्चाद्देवं समभिषेचयेत् ॥

इत्यादि । तथा चास्त्येव तारतम्यम् ।

(१२८) उ०—म्लेच्छजातीयानां वेश्यानां तत्सहायानां च देवालये राजसभादिषु च नृत्यगीतादिप्रसंगेन चिरकालाद्रूढिरिति तेषां तत्तत्कार्येषु स्पृश्यत्वमेव । अन्त्यजानां तु न तथा । जलाशयास्तु उभयोरपि पृथक् करणीयाः ।

(१२९) उ०—म्लेच्छापेक्षायाऽन्त्यजानामुत्कर्ष एव योग्यः ।

(१३४) उ०—प्राचीनपक्षः ।

(१३५) उ०—चाण्डालादिजातिर्जन्मसिद्धैव । तदस्पृश्यत्वमपि शास्त्रानुमतमेव । वेदव्यासः—

चराटो मेदचण्डालौ दासश्वपचकोलिकाः ।
एतेऽन्त्यजाः समाख्याता ये चान्ये च गवाशनाः ॥
एषां सम्भाषणे स्नानं दर्शनादर्कवीक्षणम् । इति ।

(१३६, १३७) उ०—अस्पृश्यस्पर्शादि दोषायैव ।

(१४२) उ०—म्लेच्छान्त्यजयोः सभाप्रवेशश्चैवास्तत्प्रान्ते नास्ति ।

(१४३) उ०—अस्पृश्यानामस्पृश्यत्वे प्रमाणं पञ्चतन्त्रमेव,

श्वानकुक्कुटचाण्डालाः समस्पर्शाः प्रकीर्तिताः ।
खरोष्ट्रौ तु विशेषेण तस्मादेतान् विवर्जयेत् ॥ इति ।

(१४४) उ०—प्राचीनपक्षः ।

(१४५) उ०—महास्नानादिकं स्थानशुद्धिश्च वैखानसादिशास्त्रसम्मत्या कर्त्तव्ये । कार्यार्थिनां राजसभाप्रवेशादावप्यस्ति तारतम्यं तेषां

स्थानविशेषनिर्देशात् । व्यसनादौ स्पृष्टास्पृष्टिदोषापवाद उक्तः । स च दोषः क्रियाव्यतिहारप्रयुक्तः, तेन सम्मर्दः सूचितः, न त्वसम्मर्देऽस्यैच्छिकस्पर्शापवादोऽस्ति । कूपोदकविषये पराशर आह—"चाण्डालभाण्डसंस्पृष्टं पीत्वा कूपगतं जलम् । गोमूत्रयावकाहारास्त्रिरात्राच्छुद्धिमाप्नुयात्" । म्लेच्छान्त्यजानां स्पर्शादावन्येभ्यस्तारतम्यरक्षणं न वेत्यत्र प्रमाणानि प्रदर्श्यन्ते,— "कृतपञ्चमहापातकैः चण्डालाद्यैश्चालये प्रविष्टे तत्स्पृष्टनिवेदने च सप्ताहं महाशान्तिं हुत्वा देवं कलशैः संस्नाप्य प्रतिष्ठां कारये" दिति मरीचिः । चण्डालादिप्रवेशे गृहाशुद्धिमाह पराशरः— "गृहस्याभ्यन्तरं गच्छेच्चाण्डालो यदि कस्यचित् । तमागाराद् विनिर्वास्य मृद्भाण्डं तु विसर्जयेत् । गोमयेन तु संमिश्रैर्जलैः प्रोक्षेद् गृहं तथे"ति । अशुद्धगृहे प्रतिष्ठितदेवतासत्त्वे तत्र देवासान्निध्यमुक्तम् आदित्यपुराणे—"खण्डिते स्फुटिते दग्धे भ्रष्टे स्थानविवर्जिते । यागहीने पशुस्पृष्टे पतिते दुष्टभूमिषु । अन्यमन्त्रार्चिते चैव अस्पृश्यस्पर्शदूषिते । दशस्वेतेषु नो चक्रुः सन्निधानं दिवौकसः ।" इत्यादि । अत्र दुष्टभूमिस्थितेरेव देवतास्वरूपप्रच्युतिरूपपातित्यम्, अर्थान्तराभ्युपगमे "भ्रष्टे स्थानविवर्जिते" इत्येताभ्यां पौनरुक्त्यं स्यात् । रजकाद्यन्त्यजानां चण्डालाद्यपेक्षयोत्कर्षेण चाण्डालजनिताशुद्धिमपेक्ष्य अद्धोना शुद्धिः कल्प्यते । तादृशशुद्धिविशेषाभिधानात् । तथाह पराशरः—"रजकी चर्मकारी च लुब्धकी वेणुजीविनो । चातुर्वर्ण्यस्य च गृहे त्वज्ञाता यदि तिष्ठति । ज्ञात्वा तु निष्कृतिं कुर्यात् पूर्वोक्तस्यार्धमेव च ।

(१४६) उ०—अस्पृश्यत्वं पतितानामाशौचिनां च कर्मतः सम्बन्धविशेषादिना च । अन्त्यजानामन्यद्‌रूपया तु जातित एव । तत्रान्त्यजानां चण्डालानां "बहिर्ग्रामात् प्रतिश्रयः" "चण्डाल कुटीराणि पूर्वस्यां क्रोशमात्रे स्युः"

अभोज्यान्नः स्वयं शूद्रैरस्पृश्योऽपि भवेत् पुनः ।
ग्रामादिष्वपराह्णे तु प्रविशेद्दण्डमर्हति ॥
ग्रामाच्चैव तथा दण्डपञ्चविंशतिमात्रके ।
दूरे चैव स्थितं प्रोक्तं ब्राह्मणाच्च विशेषतः ॥

"शूद्रात् ब्राह्मण्यां चण्डालस्सीसकालायसाभरणो बध्रीवद्धकण्ठः कक्षे झल्लरीयुक्तो यतस्ततः संचरन् सर्वकर्मबहिष्कृतः पूर्वाह्णे ग्रामादौ वीथ्यामन्यत्रापि मलान्यपकृष्य बहिरपोहति। ग्रामाद्बहिर्दूरे स्वजातीयैर्निवसेत् मध्याह्नात् परं ग्रामे न विशति, प्रविशेच्चेत् राज्ञा वध्यः, अन्यथा भ्रूणहत्यामवाप्नोति" इति मनुयमकामिकागमवैखानसगृह्यसूत्रवचनैर्ग्रामबाह्यत्वं यथावगम्यते, न तथा मोहम्मदादीनां तक्षायस्कारादीनां वा ग्रामबाह्यत्वमवगम्यते इति जातितोऽस्पृश्यानामपि म्लेच्छानां ग्रामप्रवेशविषये भाषणादिविषये वा चण्डालादिभ्यस्तारतम्यमवश्यं रक्षणीयं गम्यते। अत एव "शूद्राणामनिरवसितानाम्" इति सूत्रे "शकयवनम्" "तक्षायस्कारम्" इत्युदाहरणं "मृतपचण्डाला" इति च प्रत्युदाहरणं सङ्गच्छते।

देवालयप्रवेशे अस्पृश्यानां सर्वेषां द्वितीयावरणपर्यन्तं प्रवेशस्य निषिद्धत्वेऽपि म्लेच्छानां चतुर्थप्राकारेऽन्त्यजानां पञ्चमप्राकारे आलयाद् बहिरवस्थाय दर्शन एवाधिकारस्य कामिकागमादिषु वर्णनात् तारतम्यरक्षणं योग्यमेव।

तदिदं कामिकागमगतवचनम्—

"म्लेच्छः पाषण्डकश्चैव वेदबाह्यश्च नास्तिकः ।
एतान्यपि च सर्वाणि मर्यादौ च प्रदर्शयेत् ।
अन्येषां चण्डालकादीनां महामर्यां प्रदर्शयेत् ॥

इति। मर्या नाम बहिर्देशादनन्तर्ध्वजबाह्यस्थानम्। महामर्या नामालयादायन्तं बहिः स्थानमित्यागमनिर्णयः। उत्सवादौ तु सर्वे-

षां देवालयात् बहिरवस्थाय दर्शनेऽधिकारस्तु वर्तत एव । सर्वथा तु वास्तुपरावधिबाह्यदेशस्यैव महामर्यात्वात् तत्रावस्थाय दर्शनं योग्यमेव । वास्तुनिर्णयस्तूत्सवारम्भे वास्तुशान्तिसंस्कारो याव-त्पर्यन्तं भवति तावत्पर्यन्तमेवेति सर्व एवेदं विजानन्ति । कूपो-दकग्रहणविषये तु—

चाण्डालभाण्डसंस्पृष्टं पीत्वा कूपोदकं नरः ।

इत्यादिवचनात् स्पष्टमेव कूपव्यवहारो निषिद्ध इति गम्यते ।

अन्त्यजैरपि कृते कूपे सेतौ वाप्यादिके तथा ।
तत्र स्नात्वा च पीत्वा च प्रायश्चित्तं न विद्यते ॥

इति वचनं तु अन्त्यजानां खनितृत्वमात्रेण कूपशौचानन्तरं स्वप्रोक्षणाद्यनन्तरमपि नाशुचित्वमित्येवं परमेव, न तु सर्वथा एककूपोदकव्यवहारस्यापि साधुतापरम् ।

पुष्करिण्यादौ तु घट्टविशेषस्थापनेन तत्रापि जानूर्ध्वजलस्यैव तद्व्यवहार्यत्वव्यवस्थापनेन व्यवहारो न दोषाय ।

तदुक्तम्—म्लेच्छादीनां जलं पीत्वा पुष्करिण्यां ह्रदेऽपि वा ।
जानूर्ध्वं तु शुचि ज्ञेयमधस्तादशुचि स्मृतम् ॥ इति ।

जानुपर्यन्तजलस्य स्पृष्टांशमात्रस्यैवाशुचित्वं, न तु सर्वांशेनेति—

तत्राक्षोभ्यतटाकानि नदीवाप्यः सरांसि च ।
कश्मलाशुचियुक्तानि तीर्थतः परिवर्जयेत् ॥

इति देवलवचनानुसारेण वीरमित्रोदये—"तीर्थतः" इत्यस्य "तीर्थत इति सप्तम्यां तसिः । तेन घट्ट इत्यर्थ" इति विवरण-पूर्वकं विवेचितम् । तथा च कूपोदकेनैकव्यवहारो न कथमपि सम्भवति म्लेच्छादिभिः साकमपि ।

इदम् "चण्डालभाण्डसंस्पृष्टं पीत्वा कूपोदकम्" इत्यत्र चण्डाल-पदं बहुषु स्थलेषु म्लेच्छानां साहचर्यात् म्लेच्छानामप्युपलक्षण-मिति मत्वोपवर्णितम् । तदुपलक्षणत्वं तु योग्यं वा न वेति विचारसभानिर्णयाधीनमेवास्माभिरपि योग्यं मन्यते ।

अत्र पुष्करिणीह्रदसरआदिपदं कूपाधिकपरिमाणह्रदादिपरम्, तदनधिकपरिमाणह्रदादौ तु--

जलाशयेष्वथाल्पेषु स्थावरेषु महीतले ।
कूपवत्कथिता शुद्धिर्महत्सु च न दूषणम् ।

इति विष्णुस्मरणात् कूपह्रदव्यवहार्यतैव युक्तेति गम्यते । अरण्यादिनिर्जनप्रदेशगतोऽज्ञातचाण्डालादिस्पर्शः कूपस्त्वसंवृतः पुष्करिण्यादिवददोषायैवान्त्यजस्पर्शेऽपीति वीरमित्रोदये,

नद्यः कूपतटाकानि सरांसि सरितस्तथा ।
असंवृतान्यदोषाणि मनुः स्वायंभुवोऽब्रवीत् ॥

इति वचनेन बोध्यते ।

स्पर्शविषये तु "स्पृष्टास्पृष्टिर्न विद्यते" इति कर्मव्यतीहारे बहुव्रीहिरिति विचक्षणेनान्त्यजानां तदीययाजकानां च दानप्रतिग्रहादिपुरुषद्वयसाध्यकर्मण्यदोषताबोधनमेव, न तु सर्वथाऽदोषत्वप्रतिपादनपरमिति नन्दपण्डितादिभिस्मार्तभट्टाचार्यादिभिश्च विवेचितम् । तथा च स्पर्शदोषाभावपराणां वचनानां विशिष्टदोषत्वनिरास एव तात्पर्यम्, न तु सर्वथाऽदोषत्वप्रतिपादने ।

संकटे विषमे चैव दुर्गे चैव विशेषतः ।
हट्टपत्तनमार्गे च यथासम्भवमिष्यते ॥
तृणकाष्ठादिघातेन कुड्येनान्तरिते तथा ।
गोबालव्यजने चैव स्नानं तत्र न विद्यते ॥

इति संवर्तवचनमुपपद्यते । तथा च--

रजकश्चर्मकारश्च नटो बुरुड एव च ।

इति वचनेन "नाभेरूर्ध्वं तु तत्स्पर्शे प्रक्षाल्य शुध्यति" इतिप्रक्षालनमात्रेण शुध्यभिधानमपि संकरादिपरमित्यवगम्यते । वस्तुतस्तु--"नाभेरधस्तात् प्रबाहुषु कायिकैर्मलैः श्वादिभिश्चापहतस्तदङ्गं प्रक्षाल्य शुद्ध्यति, अन्यत्रोपहतस्तदङ्गं प्रक्षाल्य

स्नानेने" ति विष्णुस्मृत्येकवाक्यतया स्नानसमुच्चयपक्ष एवात्र योग्यः। सर्वथा तु आपद्यपि अन्त्यजस्पर्शस्य सर्वदाऽदोषत्वं न कस्यापि सम्मतम्। परमार्थतस्तु माधवाचार्यैर्नन्दपण्डितैश्चाशौचादनैमित्तिकाशुचित्वाभावबोधन एव स्पर्शादोषाभावपराणां वचनानां तात्पर्यम्, न तु नित्याशुचिस्पर्शादोषताबोधन इति न किञ्चिदवर्ण्यम्।

सभाप्रवेशविषये तु—सभागृहभेदादिकल्पनेनैव, न त्वेकच्छायासम्बन्धेनापि, तत्रापि स्पृश्यानां सभायामस्पृश्यानामेवाधिकारो नास्पृश्यानां सभायां स्पृश्यानामित्यपरार्के स्पष्टं विवेचितम्। तदुक्तमपरार्के प्रचेताः—

चण्डालगृहप्रवेशने चण्डालेनैकगृहे वृक्षच्छायायां वा सहावस्थाने चण्डाल एव स्यात् ब्राह्मणानुशिष्टं षाण्मासिकं प्रायश्चित्तं कृच्छ्रं चेति।

पराशरेणाप्युक्तम—

चण्डालेन समं सुप्त्वा त्रिरात्रेणा विशुद्ध्यति।
चण्डालैकमथीं गत्वा सावित्रीस्मरणाच्छुचिः॥ इति॥

अत्रापि चण्डालपदमेव दृश्यते, न म्लेच्छपदमिति सभादौ पृथक्स्थानकल्पनेन ग्रामाबाह्यानां सभाप्रवेशो न दोषायेति सामान्यतोऽवगम्यते। परं तु—

सभायां स्पर्शने चैव म्लेच्छेन सह संविशेत्।

इति देवलवचनात् सभायां म्लेच्छानामपि प्रवेशे स्नानं कर्तव्यमित्येवावगम्यते। तथा च सभाप्रवेशविषये न तारतम्यरक्षणं योग्यमिति निष्कर्षः। शुद्धयवनविषय एवेयं व्यवस्था न प्रविष्टयवनादिविषये। अयं शुद्धोऽयं प्रविष्ट इति निर्णये तु तत्तत्समाज एवाधिकारी, यदा प्रविष्ट इति निर्णयस्तदा तत्पूर्वतनजातिधर्म एव परिपालनीयः। समानधर्मिसंघटनदृष्ट्या

तु धार्मिकेषु व्यवहारेषु म्लेच्छानां कर्मतोऽतिनीचत्वभावनया सनातनधर्मसंस्थासु गृहभेदादिकल्पनेनापि प्रवेशनिषेधस्तु नितरामावश्यक इति मन्यते।

(१४८) उ०—म्लेच्छास्तु जात्या चाण्डाला एव, तथा चामरसिंहः,

चण्डालप्लवमातङ्गदिवाकीर्तिजनङ्गमाः।
निषादश्वपचावन्तेवासिचाण्डालपुक्कसाः॥
भेदाः किरातशबरपुलिन्दा म्लेच्छजातयः॥ इति।

तद्व्याख्याने,

गोमांसभक्षको यस्तु लोकबाह्यं च भाषते।
सर्वाचारविहीनोऽसौ म्लेच्छ इत्यभिधीयते॥

(१४९) उ०—प्राचीनपक्षः। म्लेच्छानां तु कूपोदकग्रहणं तत्सभाप्रवेशनं चानादिसिद्धं वर्तते।

(१५१) उ०—षोडशविधा ग्रामचाण्डालाः।

रजकश्चर्मकारश्च नटो वुरुड एव च।
कैवर्तम्लेच्छभिल्लाश्च स्वर्णकारश्च सौचिकः॥
तक्षकस्तिलयन्त्री च सूनुश्चक्री तथा ध्वजी।
नापितः कारुकश्चैव षोडशैते जघन्यजाः॥

एते प्रतिलोमजाश्च सर्वेऽपि चण्डालपदवाच्या अस्पृश्याश्च। एतेषां सप्तमादियुगे जात्युत्कर्षप्राप्तिर्भवति। एवं च कूपोदकादिग्रहणविषये रजकनापितादिवद्ग्रामचाण्डाला अपि म्लेच्छा अनाद्याचारानुसारेण ग्राह्या एवेति।

(१५२) उ०—प्राचीनपक्षः।

(१५३) उ०—"तस्मादश्लीलनामंश्चित्रे। नावस्येन्न यजेत" इति तैत्तिरीयब्राह्मणभाष्ये सायणाचार्यैर्म्लेच्छभूयिष्ठस्थलेषु वासयागादि निषिद्धमिति प्रतिपादितम्। देवालयप्रवेशविषये नीलकण्ठाचार्यविरचितकारिकावृत्तौ,

वैश्यानामपि शूद्राणां भद्रमण्डपसेवनम् ।
इतरेषां तु वर्णानां गोपुरं तु विधीयते ॥
चण्डालपतितादीनां गोपुराद्बहिरेव हि ॥

इति । कारणागमे प्रायश्चित्तकाण्डे,

रुद्रस्य वाथ विष्णोर्वा प्राकाराभ्यन्तरे यदि ।
रजस्वला वधूश्चैव चण्डालश्च समागतः ॥
ततो ग्रामोत्सवे हस्तशताभ्यन्तरतो यदि ।
तद्देवस्य कलाहानिः राज्ञो मरणमेव च ॥
तद्ग्रामस्य क्षयः प्रोक्तः सस्यानां नाशनं ध्रुवम् ॥ इति ॥

(१५३) उ०—देवलः,

चण्डालश्च तुरुष्कश्च द्वावेतौ तुल्यपापिनौ ।

"चण्डालतुरुष्कयोरीषद्भेदो नास्ति" इति हेमाद्रिः प्रायश्चित्त-प्रकरणे ।

(१५४, १५५, १५७, १५८, १५६) उ०—प्राचीनपक्षः ।

(१६०) उ०—याज्ञवल्क्यः,

चाण्डालं पुल्कसं म्लेच्छं भिल्लं पारसिकादिकान् ।
महापातकिनश्चैव स्पृष्ट्वा स्नायात्सचैलकः ॥

पारसिका यवनादय इति । आपस्तम्बः,

सर्वेषामन्त्यजातीनां स्पर्शे त्वाचमनं विदुः ।
येषां तु ब्राह्मणो नास्ति तेषां स्नानं विधीयते ॥

(१६१, १६२, १६३, १६४, १६५) उ०—प्राचीनपक्षः ।

(१६६) उ०—"तस्मान्न जनमियान्नान्तमिया" दिति श्रुतितद्भाष्यवार्तिकानि म्लेच्छान्त्यजयोरस्पृश्यत्वे प्रमाणम् ।

(१६८, १६६, १७०, १७१) उ०—प्राचीनपक्षः ।

चतुर्थभागस्य—

भूमिका ।

भागवतधर्मदीक्षया जातिपरिवर्तनं न सम्भवति, किन्तु भावपरिवर्तनं भवतीति,

अतो जातेर्निकृष्टायाः सर्वस्या वा विनाशनात् ।
साजात्यं विष्णुभक्तानामिति मन्दमिदं वचः ॥
वैष्णवत्वेन मान्यत्वं समानं मुनिसम्मतम् ।
जात्यादिध्वंसतः साम्यं मुक्तिकाले भविष्यति ॥

इति कवितार्किकसिंहश्रीवेङ्कटनाथवेदान्तदेशिकवचनेन स्पष्टमेवावगम्यते । नात्र प्रायेण बहूनां विप्रतिपत्तिः, यत् भगवद्भजने भागवतमन्त्रग्रहणे वा सर्वेषामधिकार इति । चैतन्यसिद्धान्तेऽपि श्रीरूपगोस्वामिचरणैः,

दुर्जातिरेव सवनायोग्यत्वे कारणं मतम् ।
दुर्जात्यारम्भकं पापं यत् स्यात् प्रारब्धमेव तत् ॥

इति "श्वादोऽपि सद्यः सवनाय कल्पते" इत्येतच्छ्लोकव्याख्यानप्रसङ्गेनायमेव पक्षो व्यवस्थापित इति (१५१, १५२) प्रबन्धकारैर्व्यवस्थापितम् ।

(४३) नोवाखालीसंरक्षतविद्यालयपरिडताः, (५१) श्रीदुर्गासुन्दर भट्टाचार्याः (५२) श्रीसीतानाथ विद्याभूषणाः, (५८) पूर्वस्थलीब्राह्मणमहासम्मेलनोपसमितिपण्डिताः (८८) श्रीरामलालतर्कतीर्थाश्च परं मन्यन्ते, न म्लेच्छानामपि भागवतदीक्षायामधिकार इति ।

(१२१) प्रबन्धकाराः (११६) प्रबन्धकाराश्च जातिपरिवर्तनमपि भागवतधर्मदीक्षया भवतीति मन्यन्ते ।

(८०) चट्टग्रामधर्ममण्डलीपण्डितसभा तु चैतन्योक्तवैष्णवधर्मेण जातिपङ्क्तिनियमादिकं न सम्भवतीति मन्यते ।

(६५) श्रीदेवुलवाडचतुष्पाठी पण्डितास्तु यदि भागवतदीक्षा चैतन्योक्तधर्म उच्यते, तदा न जात्युत्कर्षः, किन्तु जातिनाश एवेति वदन्ति ।

सर्वथा तु बहवो मतभेदाश्चैतन्यसम्प्रदायानुसारेणापि प्रकृते विषये वर्तन्त इति ज्ञायते ।

(१५३) घण्डिकोट सुब्रह्मण्यशास्त्रिणस्तु –

कलौ ब्राह्मणता बीर्यात् तपश्चर्यादिना न हि ।
शुद्धं त्वशुद्धतामेत्य शोधनाच्छुध्यते पुनः ॥
यथा भस्मादिसंसर्गादशुद्धं तैजसं शुचि ।
गुदं न शुद्धिमाप्नोति गङ्गाम्भःप्लावनादपि ।

इति कौशिकसंहितावचनानुसारेण जातिपरिवृत्तिरस्मिन्नेव जन्मनि कथमपि न भवतीति प्रतिपादयन्ति ।

भागवतधर्मदीक्षायां सर्वासां जातीनां समानोऽधिकार इत्येकं मतम् । अपरं तु द्विजानां वैदिकदीक्षायां. शूद्राणां तान्त्रिकदीक्षायां, प्रतिलोमान्त्यजादीनां लौकिकभाषाबद्धतत्तद्देवताबोधकनाममात्रोच्चारणेऽधिकार इति ।

तत्र प्रथममतावलम्बिनो मान्यपण्डितश्रीमदनमोहनमालवीयादयः । द्वितीयमतावलम्बिनस्तु घण्डिकोटसुब्रह्मण्यशास्त्रिणः, महामहोपाध्याय रायडुतातसुब्रायशास्त्रिणोऽन्ये च बहवो विजयनगरपण्डिताश्च । एतैर्हि—

शुचिव्रततमाः शूद्रा धार्मिका द्विजसेवकाः ।
स्त्रियः पतिव्रताश्चान्ये प्रतिलोमानुलोमजाः ॥
लोकाश्चण्डालपर्यन्तं सर्वेप्यत्राधिकारिणः ।
मन्त्रोऽयमुपदेष्टव्यो ब्राह्मणाद्यनुरूपतः ॥

श्रुतिर्ब्रह्माह षड्वर्णं स्मृतिर्वर्णद्वयात्मकम् ।
षड्वर्णं ब्राह्मणादीनां त्रयाणां, यद्द्विवर्णकम् ॥
तदन्येषां देशिकेन वक्तव्यं तारकं परम् ॥

इत्यगस्त्यसंहितावचनानि स्वमतोपष्टम्भनार्थमुपक्षिप्तानि ।

(७४) श्रीकालीचन्द्रस्मृतितीर्थास्तु—

ब्राह्मणाः क्षत्रिया वैश्याः शूद्रा वा शुचयोऽमलाः ।
तेषां मन्त्राः प्रदेया वै न तु सङ्कीर्णधर्मिणाम् ॥
भाषाख्या लौकिका मन्त्राः प्रपस्यर्थविभावनाः ।
सर्वेभ्यः प्रतिलोमेभ्यो देयाः कामं द्विजातिभिः ॥

इति वचनेन लौकिकभाषाबद्धमन्त्रेष्वेव प्रतिलोमानामधिकार इति वदन्ति ।

सोमसुन्दरशास्त्रिणस्तु ओङ्कारसहितपञ्चाक्षरादौ शूद्राणां नाधिकारः, ओङ्कारराहित्येनैव पञ्चाक्षरत्वसिद्धिः, अयं चार्थः,

महापातकदावाग्निः सोऽयं मन्त्रः षडक्षरः ।
प्रणवेन विना मन्त्रः सोऽयं पञ्चाक्षरो मतः ॥

इति शुद्धिसर्वस्वसमुद्धृतब्रह्मोत्तरखण्डवाक्येनावगम्यत इति वदन्ति ।

अस्मिन् प्रसङ्गे श्रीकालीचन्द्रस्मृतितीर्थसमुद्धृतं नारदपाञ्चरात्रगतं—

मन्त्रं नियतमन्त्राणां यो हीनाय प्रयच्छति ।
स वै हीनगुरुर्निन्द्यस्तेन सार्धं पतत्यधः ॥

इति वचनं, (७८) श्रीरामगोपालस्मृतिरत्नमहोदयसमुद्धृतं वर्ज्यशिष्यवर्गनिरूपणपरं—

कलिदोषसमूहाङ्गं वेदक्रियाविवर्जितम् ।
आश्रमाचारहीनं चाशुद्धान्तःकरणोद्यतम् ॥

इति आश्रमाचारहीनचतुर्वर्णेतरस्य वर्ज्यमध्ये परिगणकं वचनमपि विचारकैः श्रीमद्भिः सदयं समालोच्येतेति विश्वसिमः ।

इतः परन्तु विदितवेदितव्याः श्रीमन्तः पण्डितप्रवरा एव प्रमाणमिति ।

कार्तिक कृष्ण ३ बुधवासरे
सं० १९८५.



विधेयतमः
अनन्तकृष्णशास्त्री
सम्पादकः ।



* श्रीविश्वनाथः शरणम् *

अखिलभारतवर्षीय—

ब्राह्मणमहासम्मेलने-

समालोचनीयप्रश्नावलीनामुत्तराणि !

———***———

(१०) दशमः प्रश्नः—भागवतधर्मदीक्षा जात्युत्कर्षप्रापिका न वा ?

(११) प्र०—यवनादिजातिः कर्मकृता, उत जन्मसिद्धा ?

(१२) प्र०—भागवतधर्मदीक्षायां जातिविशेषः प्रतिबन्धको वा न वा ?

(१, २, ३, ४, ५, ६, ७, ८, ९, १०, ११, १२, १३, १४, १५, १६, १७, १८, १९) उ०—भागवतधर्मदीक्षया ब्राह्मणत्वादिजात्यन्तरप्राप्तिर्न भवति, यवनादिजातिर्जन्मसिद्धैव, सर्वेषां जातिसामान्यानां भक्तावधिकार इति जयपुरस्सूर्यनारायणशास्त्रिणो मन्यन्ते। इदमेव मतं श्रीगणेशवत्सनैयायिकानां पालघाटवैदिकसमाजादितिरुवादिविद्यालयपण्डितानाम्, मायूरशिवरामकृष्णशास्त्रिणाम्, विजयनगरपण्डितानां च। इयान् विशेषः—यत् जात्यन्तरधर्मेषु जात्यन्तरस्य नाधिकारः। मो० सु० सुब्रह्मण्यावयोऽपीदमेव मन्यन्ते। तिरुपतिपण्डितास्तु सर्वत्र समाना अपि भागवतधर्मदीक्षया जात्युत्कर्षप्राप्तिरपि भवतीति केषांचन मतमित्यधिकं मन्यन्ते। मल्लादिरामकृष्णशास्त्रिप्रभृतयोपि समाना एव। अत्रैादकदीक्षायामेव सर्वसाधारणोऽधिकारः, न तु वैदिकोंकारादिदीक्षायामित्यपि ते वदन्ति। इदमेव शोलापादीयश्रीसीतारामशास्त्रिणां वेङ्कटरामशास्त्रिणामपि मतम्। घाणीशङ्का महोदयास्तु भागवतधर्मदीक्षया न सर्वोत्कर्षः, किन्तु जात्युत्कर्ष इति वदन्ति, अयमेतेषांमाशय इति प्रतिभाति, यत् स्वजातौ तस्योत्कर्षो भव-

ति, न तूत्कृष्टजात्यन्तरप्राप्तिरपि तेन विवक्षितेति अन्यत्समानम् । केषांचन कर्मतोऽपि हिन्दूनां यवनत्वं, केषांचन तु जातित इति तु विशेषः । अन्यैस्तूत्तरमत्र न दत्तम् । नोवाखलीसंस्कृतविद्यालयपण्डितास्तु यवनानां भागवतदीक्षास्वपि नाधिकार इति वदन्ति ।

(५१, ५२) उ०—भागवतधर्मदीक्षायां जातिविशेषः प्रतिबन्धकः प्रतिलोमजानां नाधिकारः । तथा च नारदपाञ्चरात्रे,

वैदिकास्तान्त्रिकाश्चैव द्वये मुख्या द्विजन्मनाम् ।
शूद्रानुलोमजातीनां मन्त्राः स्युस्तान्त्रिकाः परम् ॥
भाषाख्या लौकिका मन्त्राः प्रपत्यर्थविभावनाः ।
सर्वेभ्यः प्रतिलोमेभ्यो देयाः कामं द्विजातिभिः ॥
मन्त्रं नियतमन्त्राणां यो हीनाय प्रयच्छति ।
स वै हीनगुरुर्निन्द्यस्तेन सार्धं पतत्यधः ॥

हीनाय अत्रैवर्णिकाय वैदिकं, प्रतिलोमजाय तान्त्रिकं प्रयच्छन् पततीत्यर्थः । भाषामन्त्रप्रदाने न दीक्षानियमः ।

किरातहूणान्ध्रपुलिन्दपुल्कसा
आभीरकङ्का यवनाः खशादयः ।
येऽन्ये च पापा यदुपाश्रयाश्रयाः
शुद्ध्यन्ति तस्मै प्रभविष्णवे नमः ॥

इत्यनेन यवनादीनां भागवतधर्मेष्वधिकारित्वमिति केचित् । तन्न, अर्थापरिज्ञानात् । तथाहि अस्यार्थः, भक्तिगन्धेनापि केवलं युक्तश्चेत्, पापात्मानो विगीता अपि कृतार्था भवन्तीत्याह "किरात" इत्यादि । किरातादयो ये जातित एव पापा अन्ये च ये कर्मत एव पापाः ते शुद्ध्यन्ति, यदुपाश्रयाश्रया गुरुत्वेन आश्रया येषां ते तथाभूताः सन्तः सद्गुरुचरणाश्रयमात्रेणैव जातिकर्मभ्यां सकाशात्पापिनः शुद्ध्यन्ति ते प्रारब्धाप्रारब्धपापनाश-

कत्वं भक्तेर्व्याश्रुतम्। तथाहि, किरातादीनांमशुद्धौ दुर्जातिरेव कारणं, तच्च प्रारब्धाधीनमेव, शुद्ध्यन्यथानुपपत्त्या दुर्जातित्वस्य नाशानुपपत्त्या च प्रारब्धनाशोऽवगम्यते, तथापि ते तज्जातित्वेन यदाख्यायन्ते, तद्व्यवहारत एव, न तु परमार्थत इति ज्ञेयम्।

अर्च्ये विष्णौ शिलाधीर्गुरुषु नरमतिर्वैष्णवे जातिबुद्धिः।

इति तेषु जातिबुद्धेर्निषेधात्। एतेन भक्तिमतः सर्वोत्कृष्टत्वं ज्ञापितम्। जात्यन्तरप्राप्तौ तु योनिरपि कारणम्। अत एव भगवद्गीतायां,

मां हि पार्थ व्यपाश्रित्य येऽपि स्युः पापयोनयः।
स्त्रियो वैश्यास्तथा शूद्रास्तेऽपि यान्ति परां गतिम्॥

इत्यनेन सर्वेषां भक्तावधिकार उक्तः।

यन्नामधेयश्रवणानुकीर्तनात्
यत्प्रह्वणाद्यत्स्मरणादपि क्वचित्।
श्वादोऽपि सद्यः सवनाय कल्पते
कुतः पुनस्ते भगवन्न वीक्षणात्॥

इत्यनेन चण्डालादीनां यज्ञाधिकारोऽप्यस्तीति केचित्। तन्न, अर्थापरिज्ञानात्। तथाहि, "अनेन विष्णुभक्तानां श्वपचादीनां श्रेष्ठत्वं कीर्तितम्" इति श्रीधरस्वामी। "प्रोक्तश्वपचादयः परस्मिन् जन्मनि उत्कृष्टयोनिं प्राप्नुवन्ति ततस्ते सोमयागाधिकारिणो भविष्यन्ति ततो मोक्षमाप्स्यन्ति" इति क्रमसन्दर्भटीकाकारमतम् "तत्क्षण एव सोमयागाय कल्पते योग्यो भवति सोमयागकर्ता ब्राह्मण इव पूज्यो भवति, एतेन दुर्जात्यारम्भकप्रारब्धनाशो व्यञ्जितः। यदुक्तं श्रीरूपगोस्वामिचरणैः,

दुर्जातिरेव सवनायोग्यत्वे कारणं मतम्।
दुर्जात्यारम्भकं पापं यत्स्यात्प्रारब्धमेव तत्॥

इति विश्वनाथटीकाकारमतम्।

अहो बत श्वपचोऽतो गरीयान्
यज्जिह्वाग्रे वर्तते नाम तुभ्यम् ।
तेपुस्तपस्ते जुहुवुः सस्नुरार्या
ब्रह्मानूचुर्नाम गृणन्ति ये ते ॥

अत्र श्रीधरस्वामिकृतटीकायामुक्तम्, ये श्वपचादयो हारनाम कीर्तयन्ति ते जन्मान्तरे होमांश्चक्रुः, किं तु ब्राह्मणत्वलाभाभावात् सर्वैरपूज्याः । विश्वनाथटीकाकारमतम्—अत्र नाममन्त्रमात्रमुपदेष्टुं योग्यतां धत्ते । ननु तर्हि स श्वपचो यज्ञादिकं करोतीत्यत्राह । 'तेपुः' इति भूतनिर्देशात् 'गृणन्ति' इति वर्तमाननिर्देशात् गृह्यमाणा एव तपोयज्ञादयः सर्वे कृता एव भवन्ति न तु क्रियमाणाः, नापि करिष्यमाणा इत्यर्थः । तांस्ते कथं कुर्युरित्यत एव भक्तानां कर्मस्वनधिकारोऽपि ज्ञेयः । पद्मपुराणान्तर्गतसृष्टिखण्डीयपञ्चचत्वारिंशाध्याये सम्यग् विवृतमेतत् ।

(५५) उ०—

त्रिभुवनविभवहेतवेऽप्यकुण्ठः
स्मृतिरजितात्मसुरादिभिर्विमृग्यात् ।
न चलति भगवत्पदारविन्दात्
लवनिमिषार्धमपि स वैष्णवाग्र्यः ॥

इति भागवतवचनात् सदाचारसम्पन्ना विष्णुभक्ताश्चाण्डालादयोऽपि स्वजातिमध्ये उत्कर्षं लभेरन्: न तु द्विजत्वलाभे ब्राह्मणत्वलाभे वा समर्थाः स्युः । एतद्विरोधि हरिभक्तिविलासे स्मृतिवचनम्,

यथा काञ्चनतां धत्ते कांस्यं रसविधानतः ।
तथा दीक्षाविधानेन द्विजत्वं जायते नृणाम् ॥ इति ॥

अत्रोच्यते ।

पिब निम्बं प्रदास्यामि खलु ते खण्डलड्डुकान् ।

पित्रैवमुक्तः पिबति न फलं तावदेव हि ॥

इतिवदत्रापि स्तुत्यर्थवाद एव । तथाहि, वत्स यदि ब्राह्मणत्वमिच्छसि तदा भागवतधर्मदीक्षया दीक्षितो भव, इति गुरुणा तावदुक्तः शिष्यो ब्राह्मणत्वलालसया दीक्षितः स्यात्, न तु ब्राह्मणत्वलाभज्ञापकं तद्वचनं, तथा सति अग्रिमवचनविरोधापत्तेः। यथा हरिभक्तिविलासे,

गुरोर्लब्धस्य मन्त्रस्य प्रसादेन यथाविधि ।
पञ्चांगोपासनं सिद्ध्यै पुरश्चैतद्विधीयते ॥
होमकर्मण्यशक्तानां विप्राणां द्विगुणो जपः ।
इतरेषां तु वर्णानां त्रिगुणादि विधीयते ॥

अत्र पुरश्चरणकर्मण्यपि ब्राह्मणादिवर्णभेदेन जपभेद इति स्पष्टं प्रतीयते । दीक्षया सर्वेषां वर्णानां यद् विप्रत्वं, तत्र यज्ञोपवीतधारणादिवर्णोचितकार्योपयोगि, अतोऽस्मदुक्तं साधीयः । यवनादिजातिस्तु कर्मकृतैव । तत्र भागवतदीक्षायाः प्रयोजनं नास्ति ।

(५६) उ०—"चण्डालोपि द्विजश्रेष्ठः" इत्यादिवचनाद्भागवतधर्मदीक्षा जात्युत्कर्षप्रापिका । यवनादिजातिः कर्मकृता । भागवतधर्मदीक्षायां जातिविशेषादरो नास्ति ।

(५८) उ०—भागवतधर्मदीक्षायां जातिविशेषः प्रतिबन्धक एव ।

(६०) उ०—यवनादिजातिर्जन्मसिद्धा, तथा च मात्स्ये,

यदोस्तु जाता यदवस्तुर्वसोर्यवनाः सुताः ।
द्रुह्योस्तु तनया भोजा अनोस्तु म्लेच्छजातयः ॥

यवनादिजातीनां सर्वधर्मानधिकारित्वमेव,

सगरस्तां प्रतिज्ञां च गुरोर्वाक्यं निशम्य च ।
धर्मं जघान तेषां वै वेषान्यत्वं चकार ह ॥
अर्धं शकानां शिरसो मुण्डयित्वा व्यसर्जयत् ।
यवनानां शिरः सर्वं काम्बोजानां तथैव च ॥

पारदा मुक्तकेशाश्च पल्हवाः श्मश्रुधारिणः ।
निःस्वाध्यायवषट्कारा: कृतास्तेन महात्मना ॥

इति वचनम् ।

(६१) उ०—दीक्षितेष्वपि जातिभेदस्य शास्त्रसिद्धत्वात् दीक्षा न जात्युत्कर्षप्रापिका ।

(६२) उ०—इदानीन्तनयवना जन्मसिद्धा एव ।

(६३) उ०—

दीक्षा भागवती या सा व्यक्त्युत्कर्षप्रदायिनी ।
जातिस्तु जन्मतः सिद्धा मन्यते शास्त्रविन्मतम् ॥

(६४) उ०—भागवतधर्मदीक्षायां यवनमन्तरेण सर्वेषां तुल्याधिकारः ।

(६६) उ०—भागवतधर्मदीक्षा शक्त्युत्कर्षप्रापिका, न त्वैहिकजात्युत्कर्षप्रापिका । भागवतदीक्षायां जातिविशेषः प्रतिबन्धको नास्ति, किं तु दीक्षादातुः प्रतिबन्धकोस्ति । दीक्षादातुस्तादृशशक्त्यभावात् ।

(७०) उ०—भागवतधर्मदीक्षैव सर्वजात्युत्कर्षप्रापिका ।

यन्नामधेयश्रवणानुकीर्तनात्
यत्प्रह्वणात् यत्स्मरणादपि क्वचित् ।
श्वादोपि सद्यः सवनाय कल्पते
कुतः पुनस्ते भगवन्निदर्शनात् ॥
अहो बत श्वपचोऽतो गरीयान्
यज्जिह्वाग्रे वर्तते नाम तुभ्यम् ।
तेपुस्तपस्ते जुहुवुः सस्नुरार्याः
ब्रह्मानूचुर्नाम गृणन्ति ये ते ॥

(७३) उ०—भागवतधर्मदीक्षा न जात्युत्कर्षप्रापिका, 'किरातहूणान्ध्रपुलिन्दपुल्कसा" इत्यादि "यन्नामधेयस्मरण" इत्यादिवचनं न जात्युत्कर्षबोधकं, तत्र प्रथमवचनेन दुर्जातित्वप्रापकपा

पनाशस्यैव बोधितत्वात् । द्वितीयवचनेनापि न जात्युत्कर्षो बोध्यते, भागवत एव

यदा स्वनियमेनोक्तं द्विजत्वं प्राप्य पूरुषः ।
यथा यजेत मां भक्त्या श्रद्धयैतन्निबोध मे ॥

इत्यादिना स्वनिगमेन वेदेनोक्तं द्विजत्वं उपनयने प्राप्य श्रद्धया भक्त्या च यजनमिति श्रीधरस्वामिव्याख्यानेन च द्विजत्वं विना स्व यजनादावन्येषामनधिकस्य स्पष्टरूपेणोक्तत्वात् । एवं च "सवनाय कल्पते" इत्यादि स्तुतिपरमित्येव ज्यायः । यवनादिजातयस्तु जन्मसिद्धाः, न तु कर्मकृताः ।

मेदश्च राजवनिता तथा वेनेन संगता ।
यं सूते यवनं पुत्रं तुरुष्कः स प्रकीर्तितः ॥

इत्यादिवचनात् । भाषामन्त्रदीक्षायां चण्डालपर्यन्ताधिकारः

लोकाश्चाण्डालपर्यन्ताः सर्वेऽप्यत्राधिकारिणः

इति अगस्त्यसंहितावचनात् ।

(७४) उ०—परमभगवद्भक्तानां प्रह्लादादीनामपि पुराणादौ जात्युत्कर्षो न श्रूयते, किं पुनरिदानीन्तनानां मनुष्याणाम् । "श्वादोपि सद्य" इत्यादिभागवतवचनं तु ब्राह्मणद्वारा वृषोत्सर्गादिशूद्रसाधारणयज्ञपरम् । जन्मसिद्धा अपि म्लेच्छदस्युजातयः सन्ति । यथा ब्रह्मवैवर्ते,

क्षत्रवीर्येण वैश्यायां ऋतोः प्रथमवासरे ।
जातः पुत्रो महादस्युः बलवांश्च धनुर्धरः ॥
क्षत्रवीर्येण शूद्रायां ऋतुदोषेण पापतः ।
बलवन्तो दुरन्ताश्च बभूवुर्म्लेच्छजातयः ॥
अविद्धकर्णाः क्रूराश्च निर्भया रणदुर्जयाः ॥
शौचाचारविहीनाश्च दुर्धर्षा धर्मवर्जिताः ॥

सूतसंहितायामपि,

ब्राह्मण्यां वैश्यतो जातः क्षत्ता भवति नामतः ।
अस्यामनेन चौर्येण म्लेच्छो विप्रः प्रजायते ॥
मातङ्गाज्जायते सूतः सूताद्दस्युः प्रजायते ।
मेदश्च राजवनिता तथा वेनेन संगता ॥
सा सूते यवनं पुत्रं तुरुष्कः स प्रकीर्तितः ।
तस्माद्वरिष्ठश्चाण्डालो दयावान् सोऽतिनिष्ठुरः ॥

भागवतधर्मदीक्षायां म्लेच्छादिजातयः प्रतिवन्धिका एव । तथा च मेरुतन्त्रे,

ब्राह्मणाः क्षत्रिया वैश्याः शूद्रा वा शुचयोऽमलाः ।
तेषां मन्त्राः प्रदेया वै न तु सङ्कीर्णधर्मिणाम् ॥

नारदपाञ्चरात्रे—

भाषाख्या लौकिका मन्त्राः प्रपत्यर्थविभावनाः ।
सर्वेभ्यः प्रतिलोमेभ्यो देयाः कामं द्विजातिभिः ।

अत्र तट्टीका, "भाषाख्या इति लौकिकशब्दार्थाः. भाषारूपा इत्यर्थः । प्रतिलोमजानां वैदिकादिमन्त्रसमानार्थाः लौकिका इति व्यवस्था द्रष्टव्येति । प्रपत्त्यर्थविभावनाः, प्रपत्तिरूपमर्थं विभावयन्तीति प्रपत्त्यर्थविभावनाः प्रपत्तिप्रकाशका इत्यर्थः । द्विजातिभिरिति । भाषारूपमन्त्रदानमपि द्विजातिभिरेव कर्तव्यमिति भावः । प्रतिलोमजादीनां मातृभाषया वैदिकादिमन्त्राणां व्याख्या तु न मन्त्रः, सा च धर्मोपदेशरूपा, तत्र न दीक्षानियमः सम्भवति । मन्त्रदानमपि प्रतिलोमजानां निषिद्धम् । यथा तत्रैव,

मन्त्रं नियतमन्त्राणां यो हीनाय प्रयच्छति ।
स वै हीनगुरुर्निन्द्यस्तेन सार्धं पतत्यधः ॥

द्विजातीनामेव मन्त्रदानाधिकारः । तत्र प्रमाणं नारदपाञ्चरात्रे—

स्वयं वा भक्तिसम्पन्नो ज्ञानवैराग्यभूषितः ।
स्वकर्मनियतो नित्यमर्हत्याचार्यतां द्विजः ॥

तन्त्रसारधृतवृहद्गौतमीये—

हरिभक्तियुतोऽक्रूरः सदाचारी जितेन्द्रियः ।
विप्र एव मुनिश्रेष्ठ वर्णानां गुरुरुच्यते ॥

इत्यादि । दीक्षायां स्पर्शस्यावश्यकतामाह नारदपाञ्चरात्रे—

करेण स्पर्शयन्गात्रं मन्त्रविद्भावयेद् दृशा ।
एषा वै सर्ववर्णानां दीक्षेत्याह मुनिः स्वयम् ॥

तन्त्रसारेऽपि,

ततस्तच्छिरसि स्वस्य हस्तं दत्वा शतं जपेत् ।
अष्टोत्तरं ततो मन्त्रं दद्यादुदकपूर्वकम् ॥

(७८) उ०—भागवतधर्मदीक्षा स्वजात्युत्कर्षप्रापिका । तथाहि—

ब्रह्ममन्त्रोपासका ये गृहस्था ब्राह्मणादयः ।
स्वस्ववर्णोत्तमास्ते तु पूज्यमाना विशेषतः ॥

इति महानिर्वाणतन्त्रे तृतीयोल्लासे लिखितम् । भागवतधर्मदीक्षायामस्त्येव जातिविशेषः प्रतिबन्धकः, तत्र प्रमाणं रुद्रयामले पूर्वखण्डे पञ्चदशपटले वर्ज्यशिष्यप्रस्तावे,

कामुकं कुटिलं लोकनिन्दितं सत्यवर्जितम् ।
अविनीतमसमर्थं प्रजाहीनं रिपुप्रियम् ॥
सदा पापक्रियायुक्तं विद्याशून्यं जडात्मकम् ।
कलिदोषसमूहाङ्गं वेदक्रियाविवर्जितम् ॥
आश्रमाचारहीनं चाशुद्धान्तःकरणोद्यतम् ॥

इति । आश्रमाचारहीनपदेन ब्राह्मणादिचतुर्वर्णेतरो ग्राह्यः । एतादृक् शिष्यकरणनिषेधेनान्त्यजनास्तिकादीनां भागवतधर्मदीक्षायामनधिकारः स्पष्टः ।

(८०) उ०—भागवतधर्मपदेन चैतन्योक्तवैष्णवधर्म उच्यते चेत्, तस्य दीक्षा न जात्युत्कर्षप्रापिका, अपि तु जात्युत्कर्षनाशिकैव, तत्र वर्णाश्रमोचितव्यवस्थाया निर्वासनात् । ब्राह्मणादीनां सर्वेषामेक-

ऽत्र पानभोजनादिदर्शनाच्च। भागवतधर्मपदेन यदि भगवद्गीतोक्तपातञ्जलयोगधर्म उच्यते, तस्य दीक्षा जात्युत्कर्षप्रापिका भवति, "जात्यन्तरपरिणामः प्रकृत्यापूरात्" इति पातञ्जलसूत्रात्।

तपस्विभ्योऽधिको योगी ज्ञानिभ्योऽपि मतोऽधिकः।

इति भगवद्वचनात्। योगधर्मे च ब्राह्मणक्षत्रिययोः प्रधानोऽधिकारः। कदाचिच्छूद्रादीनामपि यच्छ्रूयते, स तु गौणः तथा चोक्त भगवद्गीतायाम्.

मां हि पार्थ व्यपाश्रित्य येऽपि स्युः पापयोनयः।
स्त्रियो वैश्यास्तथा शूद्रास्तेऽपि यान्ति परां गतिम्॥
किं पुनर्ब्राह्मणाः पुण्या भक्ता राजर्षयस्तथा।

इत्यादि।

(८३) उ०—भागवतधर्मदीक्षायां यवनादिजातिविशेषः प्रतिबन्धकः, तस्य गोमांसखादकत्वेन शास्त्रोक्तसर्वाचारहीनत्वात्, तत्र निहिता दीक्षा न फलवती भवेत्। तथाहि,

नाद्रव्ये निहिता काचित्क्रिया फलवती भवेत्।
न व्यापारशतेनापि शुकवत्पाठ्यते बकः॥

(८८) उ०—भागवतधर्मदीक्षायां ब्राह्मणादिचतुर्वर्णानां दीक्षाप्रदाने यवनादिम्लेच्छजातिः प्रतिबन्धिका। भक्त्यानुरागादिप्राबल्यात् स्वयं यवनादिः भागवतधर्मपरिग्रहं कुर्यात्, तत्र न प्रतिबन्धिका इति सम्भाव्यते, यतो यवनादिजातीयस्यापि कस्यचित्,

स तरति निजपुण्यैस्तत्र किं ते महत्त्वं।
यदि न गतिविहीनं तारयेः पापिनं माम॥

इत्यादिगङ्गास्तवः श्रूयते, तेन च तस्य मुक्तिरासीदिति प्रसिद्धिरस्ति।

(८६) उ०—भागवतधर्मदीक्षायां जातिविशेषः प्रतिबन्धको नास्ति, श्रीकबीरहरिदासादीनां तत्र प्रवेशदर्शनात्।

(६३) उ०—भागवतधर्मदीक्षायां मन्त्रविशेषे जातिविशेषः प्रतिबन्धको भवति।

स्वाहाप्रणवसंयुक्तं शूद्रे मन्त्रं ददद्द्विजः।
शूद्रो निरयमाप्नोति ब्राह्मणो यात्यधोगतिम्॥

(६४) उ०—न केवलं भागवतधर्मदीक्षया, कयाचिदपि दीक्षया जात्युत्कर्षो न सम्भवति। न हि कस्यां चिदपि जातौ सहस्रक्रिययापि जात्यन्तरोत्पत्तिः कैरपि कदाचिद्दृश्यते। जातिर्हि द्रव्यस्य उत्पत्तेः प्रभृति आविनाशाद्द्रव्यं न जहाति, न सहस्रमपि निपुणतमा घटं पटं, पटं घटं वा कर्तुमर्हन्तीति। हीनकर्मणा हि तत्तुल्यतामेवापद्यते, न तु तत्त्वम्।

तृणादपि सुनीचेन तरोरपि सहिष्णुना।
अमानिना मानदेन कीर्तनीयः सदा हरिः॥

इत्यादिवचनोक्तगुणसद्भावे सर्वेषामेव भागवतधर्मदीक्षायामधिकारः, न तु तत्र जातिविशेषः प्रतिबन्धकः।

(६५) उ०—यदि भागवतदीक्षा चैतन्योक्तधर्म उच्यते, तदा स न जात्युत्कर्षप्रापिका, किं तु जातिनाशिकैव, तन्मते वर्णाश्रमोचितव्यवस्थाया निर्वासनात्, तथा च चैतन्यभागवते,

ज्ञानकाण्ड कर्मकाण्ड सकलि विषये भाण्ड।
अमृत वलिया जे वा खाय।
नाना योनि भ्रमण करे।
कदर्य भक्षण करे।
तार जन्म अधःपाते याय। इत्यादि।

भागवतधर्मदीक्षायां यवनादिजातिविशेषः प्रतिबन्धकः, तस्य गोमांसखादकत्वेन सर्वाचारविहीनत्वात्। अत्रानुशासनं यथा, "पञ्चैतानि महापातकानि कृत्वा ब्राह्मणः साद्धन तु सम्भाष्यो नानुग्राह्योऽभिशस्तः सर्वकर्मविवर्जितः पतिततमो भवति"। अत्र

यवनस्य का कथा इति ।

(६८) उ०—म्लेच्छजातिः जन्मसिद्धा । तथा चोक्तम्,

ब्राह्मण्यां वैश्यतो जातः क्षत्ता भवति नामतः ।
अस्यामनेन चौर्येण म्लेच्छो विप्रः प्रजायते ॥

इति सूतसंहितायाः शिवमाहात्म्यखण्डे द्वादशाध्याये वचनम् ।

दुराचारोऽपि सर्वाशी कृतघ्नो नास्तिकः पुरा ।
समाश्रयेदादिदेवं श्रद्धया शरणं हि यः ॥

इति स्कन्दपुराणीयवचनेन सर्वेषामेवाधिकारो बोध्यते ।

(१०१) उ०—प्रामाणिकनीतिशास्त्रानुसारेण भागवतधर्मदीक्षया जात्युत्कर्षो भवत्येव । तथापि सामाजिकव्यवहारेषु तत्तत्समाजानुमतिलाभपर्यन्तं पूर्वप्रचलितस्वस्वसदाचारपरित्यागोऽनुचितः । यवना व्रात्यक्षत्रिया एव, अतस्तेषां पूर्वतनजातिप्रवेशो भवितुमर्हति । भागवतधर्मदीक्षायां सर्वेषामेवाधिकारः ।

(१०७) उ०—भागवतधर्मदीक्षया जातिपरिवृत्तिर्न सम्भवति । सर्वा अपि जातयो जन्मसिद्धा एव । "तृणादपि सुनीचेन" इत्यादिवचनोक्तभक्तिसद्भावे सर्वेषामेव भागवतदर्मदीक्षायामधिकारः ।

(१०८) उ०—भागवतधर्मदीक्षा जात्युत्कर्षप्रापिका न भवति । यवनादिजातिर्जन्मसिद्धा कर्मकृता च । यवनादिजातिविशेषो भागवतधर्मदीक्षायां प्रतिबन्धक एव ।

(१०६) उ०—भागवतधर्मदीक्षा स्वजात्युत्कर्षप्रापिका, यवनादिजातिर्जन्मकृता, कर्मणा तु तत्सादृश्यप्राप्तिर्भवति । भागवतधर्मदीक्षायां चण्डालादिजातिः प्रतिबन्धिकैव ।

(११०) उ०—भागवतदीक्षा न जात्युत्कर्षप्रापिका । यवनादिजातिर्जन्मसिद्धैव । जातिसामान्यं जन्मकृतम् ।

(११३) उ०—भागवतधर्मदीक्षया न जात्युत्कर्षप्राप्तिः । यवनादिजातिः कर्मकृतैव ।

(११५) उ०—भागवतधर्मदीक्षा जात्युत्कर्षप्रापिका न भवति। यवनादिजातिः कर्मणा उत्पन्ना जन्मनाऽनुवर्तते। भागवतधर्मदीक्षायां जातिविशेषो न प्रतिबन्धकः।

(११७) उ०—उत्कृष्टाः खलु ब्राह्मणाः। "विप्राणां ज्ञानतो ज्यैष्ठ्य"मिति वचनेन तेषामुत्कर्षो ज्ञानादेव जायते। "ईश्वरात् ज्ञानमन्विच्छेत्" इति वचनेन तद् ज्ञानं ईश्वरानुग्रहेणैव भवति। अतो भागवतधर्मदीक्षादिना जात्युत्कृष्टत्वप्रापणे हेतुत्वं न कस्याप्यन्यस्येति निश्चितम्। पुरा किल भारतीया बहवो दुष्टभूपतयश्चक्रवर्तिना सगरेण पराजिता जीवग्राहं गृहीताश्च, वसिष्ठवचनेन तान् मुण्डितशीर्षान् अर्द्धमुण्डितशिरस्कान् श्मश्रुलाञ्छितमुखांश्चेति वैरूप्येण विकल्पयित्वा प्रत्यन्तदेशं प्रापिता इति सगरोपाख्यानेन ज्ञायते। तस्माद्यवनादिजातिः कर्मकृतैव, न जन्मकृता इति भागवतधर्मदीक्षायां सर्वेषामप्यधिकारः।

(११९, १२०) उ०—प्राचीनपक्ष एव।

(१२१) उ०—उन्नतपक्षेर्यथा जातिपरिवृत्तिः सम्भवति। यवनादिजातिर्जन्मकृता कर्मकृता च। मिस् मिलरशुद्धिकरणेन यवनादीनामपि भागवतधर्मदीक्षायामधिकारो वर्तत इति सम्भाव्यते।

(१२२, १२३, १२४, १२५, १२६, १२७) उ०—प्राचीनपक्षः।

(१२८) यवनजातीयेन कालयवनेन शाल्वस्य पाद्यार्घ्यादिभिः पूजनं कृतमिति इतिहासतः श्रूयते हरिवंशे। तथैव तेन सह हस्तान्दोलनरूपोऽनार्योचितव्यवहारस्तेन कृत इत्यपि तत्रैवोक्तम्। किं च भारते लाक्षागृहप्रबन्धकारकः पुरोचनो यवन एवासीदिति श्रूयते। अभिज्ञानशाकुन्तलेऽपि "चापहस्ता यवनी" इत्यादिना राज्ञो धनुर्धारित्वं यवन्या वर्णितम्। त्रिगर्ताधिपतेः सुशर्मणः सैनिका म्लेच्छा आसन्नित्यपि भारते व्यक्तम्। एतैः प्रमाणैः यवनजातयः पूर्वं स्पृश्या एवासन्निति ज्ञायते। इदानीं तु मतान्तरपरि-

ग्रहेण आर्यपरिपन्थित्वेन च तेषामस्पृश्यत्वं योग्यमेव सत्पत्त्व, तथापि तदीयकलाकौशलादिकृत्येषु तेषां स्पृश्यत्वमपि योग्यमेव। गोमांसभक्षणं तु भारतकालात्प्रभृत्येवासीदिति ज्ञायते।

(१२६) उ०—भगवद्भक्तियोगस्य स्मार्तधर्माचरणं विनाऽसम्भवात् तदनुष्ठाने तत्कर्तृत्वरूपं हिन्दुत्वमपि अहिन्दूनामयत्नसिद्धमेव। एवंविधमहिन्दूनां हिन्दूकरणं च भविष्यपुराणे स्पष्टमेव स्मर्यते। तथाहि—

आर्यधर्मकरा म्लेच्छा बभूवुः सर्वतोमुखाः।

तथा,

मत्पुत्राश्च स्मृता म्लेच्छा आर्यधर्मत्वमागताः॥
..............................मिश्रदेशे मुनिर्गतः।

तथा,

सर्वान् म्लेच्छान्मोहयित्वा कृत्वाथ तान् द्विजन्मनः॥
संख्यादशसहस्रं च नरवृन्दद्विजन्मनाम्।
द्विसहस्रं स्मृता वैश्याः शेषाः शूद्रसुताः स्मृताः॥
तैः सार्धमार्यदेशे स सरस्वत्याः प्रसादतः।
अवसद्वै मुनिश्रेष्ठो मुनिकार्यरतः सदा॥

अत एव,

एतद्देशप्रसूतस्य सकाशादग्रजन्मनः।
स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः॥

इत्यादि मानवीयमपि सङ्गच्छते।

(१३६) उ०—जातिविशेषः प्रतिबन्धक एव।

(१३७) उ०—सर्वेषामधिकारः।

(१४०) उ०—ये पुनरित्थमभिप्रयन्ति, तद्यथा—

न शूद्रा भगवद्भक्ता विप्रा भागवताः स्मृताः।
सर्ववर्णेषु ते शूद्रा ये ह्यभक्ता जनार्दने॥

इत्यादीनि प्रशंसामात्रपराणि वचनान्यापाततो दृष्ट्वा भगवद्भक्त्या ब्राह्मणत्वं लभ्यत इति तन्न युक्तम्। ब्राह्मणवच्छूद्रवच्च पूज्यत्वापूज्यत्वयोरेवोक्तवचनतात्पर्यात्। अयमेव चार्थः सर्वतन्त्रस्वतन्त्रैः श्रीमद्वेङ्कटनाथगुरुभिः,

अतो जातेर्निकृष्टायाः सर्वस्या वा विनाशनात्।
साजात्यं विष्णुभक्तानामिति मन्दमिदं वचः॥
वैष्णवत्वेन मान्यत्वं समानं मुनिसम्मतम्।
जात्याविध्वंसतः साम्यं मुक्तिकाले भविष्यति॥ इति।

तथा चोक्तवाक्ये शूद्रशब्दस्य शोचितार इत्यर्थो विप्रपदस्य च विशेषेण भगवत्प्रज्ञातार इत्यर्थो विवक्षित इति न कोपि दोषः।

(१४२, १४३, १४४) उ०—प्राचीनपक्षः।

(१४५) उ०—भागवतधर्म्मदीक्षा न जात्युत्कर्षप्रापिका, शरीरनिष्ठाया जातेर्यावच्छरीरस्थित्यनुवृत्तेः, एकस्मिन् शरीरे जातिद्वयाभ्युगमे सङ्करप्रसङ्गात्। तपस्विनोऽपि मतङ्गस्य मरणं विना जात्युत्कर्षासम्भव इतीन्द्रेण ज्ञापितं महाभारतोक्तमत्र स्मर्त्तव्यम्। दासीपुत्रस्य नारदस्य भागवतधर्मप्रभावेण जन्मान्तरे ब्रह्मपुत्रत्वप्राप्तिः श्रीमद्भागवतोक्ता च द्रष्टव्या।

यवनादिजातिषु द्वैविध्यं दृश्यते, केचन प्राक्तनाः क्षत्रिया बलादेव ब्राह्मणसम्पर्कं त्याजिता निःसारिताश्च देशात्, परस्ताच्च शनैः क्रियालोपाद् वृषलत्वं गताः, कर्ममूलत्वेऽपि जन्मान्तरीयकर्मवत् पूर्वपुरुषकर्मात्र मूलमिति सा जातिर्न कर्मकृता, किन्तु जन्मकृतैव। ये च नन्दिनीसृष्टास्तेषां सङ्करविशेषाणाञ्च मूलत एव जन्मकृता जातिः।

भागवतधर्मदीक्षायां जातिविशेषो न प्रतिबन्धकः। "किरातहूणान्ध्रपुलिन्दपुल्कसाः, आभीरकङ्का यवनाः खशादयः। येऽन्येपिपापा यदुपाश्रयाश्रया शुध्यन्ति, इत्यादि भागवतोक्तेः।

(१४६) उ०—यवनादिजातिः पित्रादिपरम्परया यवनानां जन्मसिद्धैव, यवनसंसर्गिणां तु वत्सरचतुष्टयमध्ये न यवनत्वम्, तदनन्तरं तु यवनसाम्यमेव। तैरपि स विशेषः परिपाल्यत एव।

इयान् विशेषः—यद् वैदिकतान्त्रिकमन्त्रेषु द्विजादीनाम, प्राप्तसंकराणां तु लौकिकभाषानिबद्धतदर्थकशब्दमात्रोपदेशेऽधिकारो यथासमयं नियमरक्षणेन। भागवतधर्मदीक्षायां तु सर्वाधिकारस्तथा च तावन्मात्रेण न मोहम्मदत्वमित्यादिव्यवस्था न सम्भवदुक्तिका,तयापि तस्य जातिपरिवृत्तिर्भवतीति निष्कर्षः।

(१४७) उ०—श्रीसोमसुन्दरशास्त्रिणाम्।

सनातनधर्मप्रदीपकनामा प्रबन्धो महनीयश्रीमालवीयमहोदयसंपादितो मन्यामहे सर्वेषां दृष्टिपथं गतः स्यादिति। अत्र हि प्रबन्धे संगृहीता विषया इम एव।

(१) वेदमहिमा, तद्विभागेतिहासपुराणानामावश्यकता, तत्र पुराणादीनां स्त्रीशूद्रसाधरण्येन किं बहुनाऽन्त्यजसाधारण्येनाध्ययनेऽधिकारः, तत्र प्रमाणसंग्रहस्तत्तत्पुराणेतिहासतश्च। अनेन च प्रसङ्गेन "श्रावयेच्चतुरो वर्णान्" इत्यस्य कर्मविशेषबोधन एव तात्पर्यं, न तु श्रवणातिरिक्तपठनादिनिषेधनेऽपीत्यादिविवेचनमपि विस्तृतमुपलभ्यते। न केवलमियदेव, किन्तु कमलाकर भट्टादीनां पुराणश्रवण एवाधिकारः, न तु पठन इति सिद्धान्तो भ्रान्तिमूलक इति तस्य न समादरणीयत्वम्।

तथा—

शूद्राणां तु सधर्माणः सर्वेऽपध्वंसजाः स्मृताः।

इति शूद्रसाधर्म्यादन्त्यजपर्यन्तं पुराणपठनादावधिकारो वर्तत इत्यपि विवेचितम्।

(२) अन्त्यजपर्यन्तमोंकारसहितपञ्चाक्षरीमन्त्रादावधिकारो वर्तते, पञ्चाक्षरादौ सर्वाधिकारो हि स्कन्दपुराणशिवमहापुराणादितोऽव-

गम्यते । यद्यप्योंकारेण साकं षडक्षर एवायं मन्त्रः, न पञ्चाक्षरः। तथापि—

महापातकदावाग्निः सोऽयं मन्त्रः षडक्षरः ।
तस्मात् सर्वप्रदो मन्त्रः सोऽयं पञ्चाक्षरः स्मृतः ।

इति ब्राह्मोत्तरवचनेन

षडक्षररूपस्यैव निरूढ्या पञ्चाक्षरत्वव्यपदेश इति गम्यते।

स्त्रीभिः शूद्रैश्च सङ्कीर्णैर्धार्यते मुक्तिकाङ्क्षिभिः ।

इति वाक्यशेषात् षडक्षरजप एव सर्वसाधारणोऽधिकारः। सति चैवं फलोपसंहारावसरे समान्यतो मानवाः, जन्तुः, नरः, यः, सः, पुरुषः, इति निर्देशोप्युपपद्यते। पञ्चाक्षरमन्त्रोऽयमष्टाक्षरादीनामप्युपलक्षणम्। अष्टाक्षरादिमन्त्रो ह्योंकारसादित्वेनैव भवति नान्यथा, तत्र च—

"एतत् प्रोक्तं द्विजातीनां स्त्रीशूद्रेषु च यत् शृणु।
द्वादशाष्टाक्षरौ मन्त्रौ तेषां प्रोक्तौ महात्मनाम् ।
हितौ तौ च द्विजातीनां मन्त्रश्रेष्ठौ नराधिप ॥"

इत्यादिविष्णुधर्मवचनादितः स्पष्टं स्त्रीशूद्राणामधिकारोऽवगम्यते । यदि ह्योंकारराहित्येन मन्त्रजप एवाधिकारः स्त्रीणां स्यात्, तर्हि कथमत्राष्टाक्षरपदम्, सप्ताक्षरपदं खलु तत्रापेक्षितं स्यादिति सर्व एव विजानन्ति। तथा च पूर्वोक्तन्यायेनान्त्यजपर्यन्तमोंकारसहितमन्त्रजपाधिकार इति सिद्ध्यति ।

यत्तु नृसिंहतापनीये रामतापनीये च "सावित्रीं प्रणवं यजुर्लक्ष्मीं स्त्रीशूद्राय नेच्छन्ति, सावित्रीं लक्ष्मीं यजुः प्रणवं यदि जानीयात् स्त्रीशूद्रः स मृतोऽधोगच्छति" इत्याम्नातम्, तदिदं वैदिकविधिनोच्चरितस्योंकारस्य विषय एव, न तु स्मार्तमन्त्रस्येति प्रदीपककारा मन्यन्ते ।

(३) युगभेदेन धर्मपरिवर्तने धर्मज्ञानामधिकारः ।

(४) ईश्वरस्वीकारे युक्तिप्रमाणाद्युपन्यास इत्यादयः।

अत्रेश्वरस्वरूपविषये, सनातनधर्ममूलस्वरूपादिविषये श्रुतिस्मृतीतिहासपुराणादिमहिमादिविषये, युगभेदेन धर्मपरिवर्तन महात्मनामधिकारविषयाणि वा तानि प्रमाणानि तत्र तत्र प्रकीर्णान्येकीकृत्य संगृह्य च प्रकाशनेन सत्यं श्रीमहनीयमालवीयमहोदया उत्तमर्णा इति वस्तुस्थितिकथनमिदम्।

अन्त्यजपर्यन्तमोंकारजपेऽप्यधिकार इति सिद्धान्तस्तेषां न केवलं कमलाकरभट्टादिसिद्धान्तविरुद्धः, किन्तु सत्सम्प्रदायस्य न केवलं व्याख्यानादिना, किन्तु स्वयमनुष्ठानानुष्ठापनपद्धत्यापि प्रवर्त्यमानस्यश्री १००८वल्लभाचार्यादिसिद्धान्तस्यापि विरुद्ध इति विशदमिदं सप्रकाशाणुभाष्यदर्शिनाम्। एतान्यत्र प्रकाशगतानि वाक्यानि, "वेदः प्रभाव एवाग्रे" "स सर्ववेदोपनिषद्वेदबीजं सनातनम्" इत्यादिवाक्यैः प्रणवस्य विशेषतो वेदत्वनिश्चयात्, औपनिषदानां नारायणाष्टाक्षरादीनां मन्त्राणां नारायणकवचादौ प्रत्यभिज्ञानाच्च। न च देवतादिवाचकपदवत् प्रत्यभिज्ञाया अप्रयोजकत्वमिति शङ्क्यम्, नाममन्त्रस्तु शूद्रस्येति, "स्वाहाकारनमस्कारौ मन्त्रौ शूद्रे विधीयते। ताभ्यां शूद्रः पाकयज्ञैर्यजेत ब्रह्मवान् स्वयम्"। इत्यानुशासनिकपर्वादौ तदनुज्ञादर्शनेन तेषां तदभावेनैव दृष्टान्तस्यात्र वक्तुमशक्यत्वात्। अनेन हीदं स्पष्टमेव गम्यते यत्, नारायणाष्टाक्षरादीनां नमःशब्देनैव जपः स्त्रीशूद्राणां नोंकारेणापि। ओंकारो हि यत्र कुत्रापि प्रयुज्यमानो वेद एव, न तस्य कुत्रापि स्मार्तत्वमिति खल्वतोऽवगम्यते। तथा च सावित्रीं प्रणवं यजुर्लक्ष्मीं स्त्रीशूद्राय नेच्छन्ति" इत्याद्युपनिषदोऽपि न स्मार्तोंकाराविषयत्वकल्पनोपपद्यते। अष्टाक्षरत्वप्रसिद्धिस्तु द्विजाभिप्रायेणैव, न शूद्राद्यभिप्रायेण। अष्टाक्षरोपदेशो हि यत्र यत्र वचनेषूपक्षिप्तः, सर्वत्र तत्र द्विजानामप्युल्लेखो दृश्यते, न द्विजेतरमा-

त्रोल्लेखः, तत्र च प्रकल्प्य चापवादविषयमुत्सर्गोऽभिनिविशते इति न्यायात् द्विजेतरविषये प्रणवांशत्यागेनेति पूरणेनैन निर्वाहो नान्यथेति कस्य वेदं परोक्षम् ? नेदमस्माकमनवसरं सूचनम्-यत् वासुदेवाभिधामस्तोत्रे सर्वेषामधिकारः शूद्रादिसाधारण्येनेति ब्रह्मपुराणतोऽवगम्यते इत्युपक्षेपोयं न प्रकृतोपयुक्तः। यतोऽत्र स्तोत्रानुसंधान एव सर्वेषामधिकारो बोध्यते, न नारायणाष्टाक्षरादिमन्त्रजपे। अत्र ग्रन्थकारैर्वासुदेवाभिधानस्तोत्रपदस्यैव ओं नमो भगवते वासुदेवायेति मन्त्रपरतया विवरणं यत् कृतम्, तदिदं चिन्त्यमूलमिति प्रतिभाति। तथा च ब्रह्मपुराणवचनानां संगृहीतानां नात्रोपयोगः।

श्रीमद्भागवतगतनारायणकवचं हि त्वाष्ट्रेणेन्द्रायोपदिष्टं सत्यमों नमो नारायणायेतिमन्त्रगतोंकारादीनां हृदयादिविन्यासोपयोगं गमयति, परन्तु नास्योंकारघटितस्य शूद्रादिसाधारण्येऽप्यत्र प्रकरणे संगृहीतं किमपि वचनमुपलभ्यते। प्रत्युत, फलकथनावसरे कौशिकादिद्विजानामेव शब्दतो ग्रहणात् द्विजेतराणां नाधिकार इति गम्यते। महेन्द्रस्तु न द्विजेतरः, देवानामपि वर्णत्वपक्षे, पक्षान्तरे तु देवद्विजेतरविषयत्वं नास्य कवचस्येत्येव युक्तम्, न सर्वसाधारण्यम्।

एतेनाष्टमस्कन्धगताऽदितिपयोव्रतकथापि व्याख्याता, अत्र हि- "गन्धधूपादिभिश्चार्चेद्द्वादशाक्षरविद्यया" इत्यादिना धर्मातिदेश एव क्रियते "नमस्तुभ्य"मित्यादिमन्त्रपठने, न द्वादशाक्षरजपाद्युपदेश इति नास्योंकारसहितमन्त्रपाठे सर्वाधिकारव्यवस्थापकत्वम्।

विष्णुधर्मे तु "एतत्प्रोक्तं द्विजातीनां स्त्रीशूद्रेषु च यच्छृणु।
द्वादशाष्टाक्षरौ मन्त्रौ तेषां प्रोक्तौ महात्मनाम्।
हितौ तौ च द्विजातीनां मन्त्रश्रेष्ठौ नराधिप।

इति। सत्यं द्विजेतराणामधिकारोऽष्टाक्षरादौ वर्ण्यते परंतु द्विजानामप्यत्रोल्लेखात् तदभिप्रायेणाष्टाक्षरतायामेव पूर्वोक्तरीत्या तात्पर्यं युक्तम्, न सर्वसाधारण्याभिप्रायेण। न ह्योंकारे वैदिकत्वस्मार्तत्वविभागादिकं सम्भवतीति पूर्वमेवोपवर्णितम्। अन्यथाष्टाक्षरादिमन्त्राणामपि स्मार्तानामौपनिषदमन्त्रेभ्यो भेदकल्पना हि प्रसज्येत। एतेन—तदिदं वैदिकविधिनोच्चारितस्यैवोंकारस्य विषये, न तु स्मार्तमन्त्रस्थस्येति दीपकयोजनमपि—व्याख्यातम्।

ओंकारादिसमायुक्तं नमःकारान्तदीपितम्।
तन्नाम सर्वसत्त्वानां मन्त्र इत्यभिधीयते॥

इति ब्रह्मपुराणवचनमपि सत्त्वपदेन तिर्यग्जातिवर्जनवत् प्रमाणान्तरतोऽनधिकारितया निर्णीतद्विजेतरवर्जनेनापि योजनस्यैव युक्तत्वात् नाष्टाक्षरादीनां सर्वसाधारणाधिकारे निरङ्कुशं प्रमाणम्। न हि वयं कुत्रापि नरादिपदेन मानवादिपदेन वा न फलाम्नानमिति वदामः, किं तु तावन्मात्रेषु शास्त्रान्तरबाधनेनापि सर्वसाधारण्यव्यवस्थापनं नोपपद्यत इति, तथा च नृसिंहपुराणादितः संगृहीतानां सामान्यवचनानां केषामपि नात्र विषये निरङ्कुशा प्रमाणतेति युक्तमुत्पश्यामः।

पञ्चाक्षरविषये तु पञ्चाक्षरविद्यायां सर्वसाधारणोऽधिकार इत्यत्र न वयमनुपपत्तिं कामपि पश्यामः। इदमेवात्रालोचनीयम् यत् षडक्षरस्यैव मन्त्रस्य पञ्चाक्षरत्वम्, उत पञ्चाक्षरमन्त्रस्यैव पञ्चाक्षरत्वमिति। दीपकगृहीताभ्याम्—

"महापातकदावाग्निः सोऽयं मन्त्रः षडक्षरः।
तस्मात् सर्वप्रदो मन्त्रः सोऽयं पञ्चाक्षरः स्मृतः॥
"वेदे शिवागमे चायमुभयत्र षडक्षरः।
मन्त्रः स्थितः सदा पुण्यो लोके पञ्चाक्षरः स्मृतः।
सर्वमन्त्राधिकश्चायमोंकाराद्यः षडक्षरः॥"

इति ब्रह्मोत्तरखण्डशिवपुराणवचनाभ्यां षडक्षरस्यैव मन्त्रस्य पञ्चाक्षरत्वप्रसिद्धिरिति सत्यं विशदं प्रतीयते; तथापीदमत्राति-विचित्रम् यत् "महापातकदावाग्निः सोऽयं मन्त्रः षडक्षरः" इत्यस्यानन्तरं "प्रणवेन विना मन्त्रः सोऽयं पञ्चाक्षरो मतः" इति पादोऽप्यधिको ब्रह्मोत्तरखण्डे समुपलभ्यमानः केनापि निमित्तेन महनीयप्रकृतीनां दीपककाराणां न दृष्टिपथं गतः। इदमपि नात्रानवसरं सूचनम्—यत्—

वेदे शिवागमे चायमुभयत्र षडक्षरः।
मन्त्रः स्थितः सदा मुख्यो लोके पञ्चाक्षरः स्मृतः॥
सर्वमन्त्राधिकश्चायमोंकाराद्यः षडक्षरः।
सर्वेषां शिवभक्तानामशेषार्थप्रसाधकः॥

इति शिवपुराणतः प्रदीपककारधृतेषु वचनेषु—

मन्त्रः स्थितः सदा मुख्यो लोके पञ्चाक्षरः स्मृतः।
सर्वमन्त्राधिकश्चायमोंकाराद्यः षडक्षरः॥

इति श्लोको न शिवपुराणे दृश्यते, यस्य हि महिम्ना षडक्षर-स्यैव लोके पञ्चाक्षरत्वप्रसिद्धिरिति प्रदीपककाराः साधयन्ति। तथा चेदमेवात्र समुचितं प्रतिभाति—यत् न षडक्षरस्यैव पञ्चा-क्षरत्वं, किन्तु पञ्चाक्षरस्यैव; तथाच तत्र तत्र पञ्चाक्षरविद्यायाम-न्त्यजादिसाधारणोऽधिकारो दृश्यमानः कथं वा प्रदीपककारम-तानुगुण इति त एव नाम समालोचयन्तु। शिवमहापुराणे तस्मिन्नेवाध्याये दीपककारसंगृहीतेष्वेव वचनेषु—

तेनाधीतं श्रुतं तेन कृतं सर्वमनुष्ठितम्।
यस्योंनमः शिवायेति मन्त्राभ्यासः स्थिरीकृतः॥

इति श्लोकस्यानन्तरं,

नमस्कारादिसंयुक्तं शिवायेत्यक्षरद्वयम्।
जिह्वाग्रे वर्तते यस्य सफलं तस्य जीवितम्॥

इति नमः शिवायेति मन्त्रमात्रं प्रक्रम्य—

अन्त्यजो वाऽधमो वापि मूर्खोऽपि पण्डितोऽपि वा ।
पञ्चाक्षरजपनिष्ठो मुच्यते पापपञ्जरात् ॥

इति स्पष्टमन्त्यजादिसाधारण्येन नमः शिवायेत्यत्रैवाधिकारः प्रतिपादित उपलभ्यते ।

षडक्षरेण वा देवि तथा पञ्चाक्षरेण वा ॥

इति वचनं तु यथासिद्धाधिकारव्यवस्थाऽविरोधेनैव योजनमर्हति । इदमत्र सप्रश्रयमनुयुज्यते—यत् प्रदीपककारास्सर्वत्र पञ्चाक्षरादिसम्बन्धेन प्रकीर्णानां श्लोकानां संग्रहावसरे कथं वा—

मम पञ्चाक्षरे मन्त्रे तस्माच्छ्रेष्ठतरो हि सः ।

इत्यस्यानन्तरं

तस्मादनेन मन्त्रेण मनोवाक्कायभेदतः ।

इति श्लोकतः पूर्वं चतुस्त्रिंशच्छ्लोकान् न समगृह्णन्निति । इमान्यत्र तैरसंगृहीतानि कानिचन वचनानि—

पञ्चाक्षरप्रभावेण लोकवेदमहर्षयः ।
तिष्ठन्ति शाश्वता धर्मा देवाः सर्वमिदं जगत् ॥ २१ ॥

....

इत्येवं प्रार्थितस्तेन पञ्चवक्त्रधरो ह्यहम् ।
पञ्चाक्षराणि क्रमशः प्रोक्तवान् पद्मयोनये ।
स पञ्चवदनैस्तानि गृह्णँल्लोकपितामहः ॥

....

अस्याः परमविद्यायाः स्वरूपमधुनोच्यते ।
आदौ नमः प्रयोक्तव्यं शिवाय तु ततः परम् ॥
सैषा पञ्चाक्षरी विद्या सर्वश्रुतिशिरोगता ।
नकारः शिर उच्येत मकारस्तु शिखोच्यते ।
शिकारः कवचं तद्वत् वकारो नेत्रमुच्यते ।

यकारोऽस्त्रं नमः स्वाहा वषड् हुं वौषडित्यपि ॥ इति ।

एतैर्हि वचनैर्मध्यगतैः स्पष्टमिदं विशदीभवति—यत् पञ्चाक्षरविद्यायां नोंकारस्य प्रवेशलेशोऽपि । मन्त्रसामान्ये ओंकारसाहित्यमधिकारिविशेष इति नियमेनैव षडक्षरत्वादिव्यपदेशस्तत्र तत्रेति कथं वा पञ्चाक्षरविद्यायां शूद्राद्यधिकारश्रवणमात्रमोंकारसहितपञ्चाक्षरविद्यायां तदधिकारस्थापनाय । अथान्ववसरमिदमपि सूच्यते—शिवपुराणे पञ्चाक्षरविद्याङ्गतया—

तत्राद्यो मातृकान्यासः, ब्रह्मन्यासस्ततः परः ।
तृतीयः प्रणवन्यासः, हंसन्यासस्तदुत्तरः ॥
पञ्चमः कथ्यते सद्भिर्न्यासः पञ्चाक्षरावधिः ।

इति पञ्च न्यासानुपक्रम्य—

पश्चात्प्रणवविद्धीमान् प्रणवन्यासमाचरेत् ।

इति प्रणवन्यासे प्रणवविदामेवाधिकारो नान्येषामिति विशदीकरणान्नोंकारसहितपञ्चाक्षरविद्यायां सर्वाधिकार इति स्पष्टमवगम्यते । एतेन तत्र तत्रोंकारन्यासविधानमपि व्याख्यातम् । अधिकं त्ववसरान्तरे विवेचयिष्यते ।

(१४८, १४६, १५१, १५२) उ०—प्राचीनपक्षः ।

(१५३) उ०—कौशिकसंहितायाम्—

कलौ ब्राह्मणता वीर्यात्तपश्चर्यादिना न हि ।
शुद्धं त्वशुद्धतामेत्य शोधनाच्छुध्यते पुनः ॥
यच्च स्वभावतोऽशुद्धं तन्न शुध्यति शोधनात् ।
यथा भस्मादिसंसर्गादशुद्धं तैजसं शुचि ॥
गुदं न शुद्धिमाप्नोति गङ्गाम्भःप्लावनादपि । इति ।

त्रिविधा भागवतदीक्षा, वैदिकी तान्त्रिकी लौकिकी च । तत्र

स्त्रीशूद्रद्विजबन्धूनां त्रयी न श्रुतिगोचरा ।

इति भागवतवचनात् "सावित्री लक्ष्मीं यजुः प्रणवं यदि जानी-

यात् स्त्री शूद्रः स मृतोऽधो गच्छती"ति नृसिंहतापनीयवचनाच्च शूद्राणां वैदिक्यामनधिकारः। किं तु अगस्त्यसंहितायाम्,

शुचिव्रततमाः शूद्रा धार्मिका द्विजसेवकाः।
स्त्रियः पतिव्रताश्चान्ये प्रतिलोमानुलोमजाः॥
लोकाश्चण्डालपर्यंतं सर्वेप्यत्राधिकारिणः।
मन्त्रोऽयमुपदेष्टव्यो ब्राह्मणाद्यनुरूपतः॥
श्रुतिर्ब्रह्माह षड्वर्णं स्मृतिर्वर्णद्वयात्मकम्।
षड्वर्णं ब्राह्मणादीनां त्रयाणां, यद्वद्विर्वणकम्।
तदन्येषां दैशिकेन वक्तव्यं तारकं परम्।

इत्युक्त्वाच्छूद्रादिसर्वजातीयानां द्विवर्णकरामनामोपदेशात्मकलौकिकदीक्षायामधिकारः। कचिच्छूद्राणां तान्त्रिक्यामप्यधिकारोऽस्तीत्युक्तम्। यथा ब्रह्मोत्तरखण्डे,

चातुर्वर्ण्यस्य वक्ष्यामि दीक्षामद्य यशस्विनि।

इत्युपक्रम्य,

शूद्रस्यापि प्रवक्ष्यामि मद्भक्तस्य वरानने।

इत्युपक्रम्य शूद्राणां काचित्तान्त्रिकी दीक्षा प्रतिपादिता।

(१५४, १५५, १५७, १५८, १५६, १६०, १६१, १६२, १६३, १६४, १६६, १६६, १७०, १७१) उ०—प्राचीनपक्षः।

———

पञ्चमभागस्य—

भूमिका

—※※—

अथ त्रयोदशचतुर्दशपञ्चदशप्रश्नानामुत्तराणि समालोचनार्थं श्रीमतां पुरत उपह्रियन्ते।

जानन्त्येव भवन्तः सर्वेऽपि प्रश्नानां स्वरूपम्, यत् उपक्रम एवास्मिन् पुस्तके सङ्गृहीतम्।

अत्रैतावन्तो मतभेदा वर्तन्ते—यत् देवलस्मृतिर्न प्रमाणम्, शूलपाण्यादिनिबन्धाद्दृतव्यवस्थयैव तत्प्रामाण्यम्, मन्वादिस्मृत्येकवाक्यतयैव तत्प्रामाण्यमिति च।

तत्र प्रथममते द्वे मते दृश्येते—यत् स्मृत्यन्तरविरुद्धेंऽशेऽप्रामाण्यमित्येकं मतम्, सर्वथाऽप्रामाण्यमित्यपरं मतम्।

तत्र प्रथमप्रथममतस्य द्वितीयमतस्य च न फलतो विशेषः, यतो निबन्धकारैरपि तदविरोधेनैव व्यवस्था दत्ता। प्रथमद्वितीयमते तु सर्वथाऽप्रामाण्यरूपे, विंशतिसंवत्सरं यावच्छुद्धिरिति नियमनं न योग्यमित्येकः पक्षः। अपरस्तु स्मृत्यन्तरानुसारेणैव व्यवस्था समादरणीयेति।

अप्रामाण्यवादे युक्तिस्तु—निबन्धग्रन्थेषु वहूनां वचनानामनुपलभ्यमानत्वमेव। प्रायश्चित्तविवेकमयूखादिनिबन्धेषु तु वहूनां मुद्रापितदेवलस्मृतिगतवचनानामुपलम्भान्नाप्रामाण्यशङ्कावसरः। न हि सर्वाणि वचनानि तत्तत्स्मृतिगतानि सर्वैर्निबन्धकारैरुद्ध्रियन्ते इति नियमः। निबन्धकारैश्चिन्त्यमूलानीति यानि परमुपन्यस्तानि, तानि विहाय सर्वेषामुपलभ्यमानस्मृतिवचनानां प्रामाण्यमेव युक्तमिति

मुद्रापितदेवलस्मृतिप्रामाण्याङ्गीकारोऽपि युक्त एवेति परे मन्यन्ते।

तत्प्रामाण्यमूरीकर्तारः केचन वत्सरचतुष्टयानन्तरं न प्रायश्चित्तीयतेति शूलपाण्याद्यनुसारेण, परे तु "संवत्सरैश्चतुर्भिस्तु तद्भावमधिगच्छति" इति देवलवचनस्यानुपनीताष्टवर्षबालविषयत्वात्तस्य च पादप्रायश्चित्तविधानात् पूर्णप्रायश्चित्ताधिकारिणामन्येषां वत्सरातिक्रमे न प्रायश्चित्तीयतेति श्रीस्मार्तभट्टाचार्यसिद्धान्तमनुसृत्य वदन्ति।

अन्ये तु प्रथमसंवत्सरमध्ये लघुसंसर्ग एव व्यवहार्यता, वत्सरचतुष्टयमध्ये तु स्वधर्माधिकारमात्रम्, न व्यवहार्यत्वमिति मन्यन्ते।

एतन्मते—"अथ पतिताः समवसाय धर्मांश्चरेयुरितरेतरयाजका इतरेतराध्यापका मिथो विवहमानाश्च" इति बोधायनसूत्रे पतितपदमकृतप्रायश्चित्तानां पतितानां स्वधर्माधिकारस्यैवासम्भवात् कृतप्रायश्चित्तपरमेव।

इतरे तु विंशतिवत्सरपर्यन्तं प्रायश्चित्तीयता व्यवहार्यता चेति वदन्ति।

सर्वमिदं समालोच्य यथोचितं श्रीमन्तः पण्डितप्रवरा व्यवस्थापयिष्यन्तीति सर्वतन्त्रस्वतन्त्रेषु नाधिकमत्रोपक्षिप्यते।

कार्तिककृष्ण ५ शुक्रवासरे
सम्वत् १९८५

विधेयतमः
अनन्तकृष्णशास्त्री
सम्पादकः।

* श्रीविश्वनाथः शरणम् *

अखिलभारतवर्षीय-

ब्राह्मणमहासम्मेलने

समालोचनीयप्रश्नावलीनामुत्तराणि ।

———*****———

(१३) प्रश्नः—देवलस्मृतेः शूलपाण्यादिव्यवस्थानुसारेण प्रामाण्यं किमङ्गीकरणीयमुत न ?

(१४) प्र०—कियदवधि म्लेच्छसंसर्गेण प्रायश्चित्तीयता ?

(१५) प्र०—संवत्सरपर्यन्तं म्लेच्छसंसर्गिणां तदधिककालं यावत् म्लेच्छसंसर्गिणां च प्रायश्चित्तविषये व्यवहार्यताविषये च किमैकरूप्यमुत वैरूप्यम् ।

(१, २, ३, ४, ५, ६, ७, ८, ९, १०, ११, १२, १३, १४, १५, १६, १७, १८, १९)

उ०—देवलस्मृतेर्मन्वाद्येकवाक्यतास्थल एव प्रामाण्यम् नान्यत्र, तथाचैकवर्षपर्यन्तं प्रायश्चित्तीयतायां न विप्रतिपत्तिः । संवत्सरपर्यन्तं म्लेच्छसंसर्गे प्रायश्चित्तेन व्यवहार्यता, तदधिकसंसर्गिणां तु न ।

श्रीगणेशदत्तनैयायिकास्तु विंशतिवत्सरमध्ये म्लेच्छसंसर्गिणां प्रायश्चित्तीयतेति वदन्ति, परन्तु स संसर्गः सहवासमात्रमुत गुरुतरसंसर्गोऽपीति न विवेचयन्ति ।

पालघाटवैदिकसमाजतिरुवादिविद्यालयपण्डिता अपि श्रीसूर्यनारायणशास्त्रिणां मतमेवानुवर्तन्ते ।

मायूरशिवरामकृष्णशास्त्रिणोऽपि चतुर्वत्सरानन्तरं न प्रायश्चित्तीयतेत्येतावन्मात्रं वदन्ति, ततो न्यूनकालेऽपि संवत्सर-



श्रीम ॥

श्रीमनाथजी

श्री ॥

श्रीमनाथ ॥ श्री

~श्रीमनाथ स्वरूप

श्रीमनाथजी म

श्रीमनाथ ११ क

पर्यन्तं लघुतरसंसर्गे प्रायश्चित्तीयता व्यवहार्यता च, तदनन्तरं तु प्रायश्चित्तीयत्वेऽपि न व्यवहार्यता।

विजयनगरपण्डिता अपि वर्षचतुष्टयपर्यन्तं प्रायश्चित्तीयता, व्यवहार्यतादिविषये तु मतभेदात् देशविशेषात् व्यवस्था, देवलस्मृतिर्मुद्रापिता न प्रमाणमिति वदन्ति। शूलपाण्युद्धृतवचनानां तु नाप्रामाण्यमिति वदन्ति। इदमेव ।तरुपतिपण्डितानां श्रीरामकृष्णशास्त्रिप्रभृतीनामपि मतम्।

शेखावाटीश्रीसीतारामशास्त्रिणस्तु यथाशास्त्रं संसर्गभेदादिना व्यवस्थेति वदन्ति।

देवलस्मृतेर्निबन्धानुसारेण प्रामाण्यमस्त्येव, संवत्सरपर्यन्तं म्लेच्छसंसर्गे न प्रायश्चित्तीयतेति मैथिलनिबन्धानुसारिणां मतम्। तेन्नालिवेङ्कटरामशास्त्रिणामपि इदमेव मतम्।

(२०) उ०—नोत्तरं लिखितम्।

(२१) उ०—वत्सरचतुष्टयावाध म्लेच्छसंसर्गिणां प्रायश्चित्तीयता, न तदुपरि।

(२२,२३) उ०—न किमपि लिखितम्।

(२४) उ०—"संवत्सरेण पतति पतितेन सहाचरन्" इति बहुस्मृतिसम्मतत्वात् किञ्चिदूनसंवत्सरपर्यन्तं प्रायश्चित्तीयता, वर्षचतुष्टयं यावत् म्लेच्छसंसर्गिणामपि प्रायश्चित्तीयतेति मतान्तरम्। विंशतिसंवत्सरं प्रायश्चित्तीयतेति देवलवचनमप्रमाणम्।

(२५) उ०—वत्सरमध्ये पतितानां प्रायश्चित्तेन स्वजातिसम्बन्धः, तदनन्तरं वर्षचतुष्टयं यावत् पृथक्संस्था, तदनन्तरं तु न प्रायश्चित्तीयतापीति।

(२६) उ०—बलात् मतान्तरप्रविष्टानां संवत्सरमध्ये संसर्गतारतम्यादि विचार्य प्रायश्चित्तादिना शुद्धिः कर्तव्या, संसर्गभेदेन व्यवहार्यतायां वैरूप्यमप्यस्ति।

(२७) उ०—संवत्सरचतुष्टयावधि देवलस्मृत्यनुसारेण प्रायश्चित्तीयता।

(२८) उ०—देवलस्मृतिरुपलभ्यमाना न प्रमाणम्। परं तु विनापि विधिं प्रायश्चित्तीयता सर्वेषां म्लेच्छानां शुद्धिश्च योग्या।

(२९) उ०—पश्चात्तप्तानां तु म्लेच्छसंसर्गपरित्यागे प्रायश्चित्तीयता, अन्यथा तु न।

(३०) उ०—मुद्रितदेवलस्मृतिरप्रमाणमिति संदेहो भवति, वर्षत्रयादर्वागेवापस्तम्बवचनात्प्रायश्चित्तीयता।

(३१) उ०—एकवत्सरमध्ये स्वजातिप्रवेशः, तदनन्तरं तु वत्सरचतुष्टयमध्ये पृथक्संस्था।

(३२) उ०—नोत्तरं दत्तम्।

(३३) उ०—संवत्सरचतुष्टयमध्ये प्रायश्चित्तीयता, तदनन्तरन्तु तद्भावात् न प्रायश्चित्तीयता।

(३४) उ०—देवलस्मृतिः प्रमाणम्। संसर्गाभ्यासतारतम्यात् प्रायश्चित्तं वर्तत एव।

(३५) उ०—देवलस्मृतिरप्रमाणम्। सर्वदा प्रायश्चित्तीयता।

(३६) उ०—न किमपि लिखितम्।

(३७) उ०—संवत्सरचतुष्टयमध्ये प्रायश्चित्तीयता, तदनन्तरं तु तद्भावात् न प्रायश्चित्तीयता।

(३८) उ०—संवत्सरमध्ये प्रायश्चित्तीयता, तदधिककालसंसर्गे प्रायश्चित्ताधिक्यमेव। परं तु तेन स्वधर्माधिकारमात्रम्। व्यवहार्यताविषयेऽपि वैरूप्यं युक्तमेव।

(३९) उ०—न किमप्युक्तम्।

(४०) उ०—सर्वेषां प्रायश्चित्तीयता भवति, म्लेच्छानां हिन्दुसमाजे प्रवेशश्च, परं तु क्षत्रियेषु गणनीयाः पृथक्संस्था च तेषां कल्पनीया।

(४१) उ०—एकाब्दम्लेच्छसंसर्गेणैव प्रायश्चित्तीयता, न तदनन्तरम्।

(४२) उ०—संवत्सरपर्यन्तं म्लेच्छसंसर्गिणां व्यवहार्यता. संवत्सरचतुष्टये तु कृतप्रायश्चित्तानामप्यव्यवहार्यत्वम् ।

(४३) उ०—यावच्चतुर्विंशतिवर्षप्रायश्चित्तं म्लेच्छसंसर्गिणां प्रायश्चित्तीयता, संसर्गभेदादिना प्रायश्चित्तादिवैरूप्यमस्त्यैव ।

(४४) उ०—यावत् संवत्सरं प्रायश्चित्तीयता, न तु तदनन्तरम् ।

(४५) उ०—यवनसंसर्गेण यवनजातीयत्वमपि भवति ।

(४५) उ०—नोत्तरं लिखितम् ।

(४६, ४७, ४८) उ०—देवलस्मृतेः शूलपाण्यादिव्यवस्थानुसारेण प्रामाण्यमङ्गीकार्यमेव ।

(४९) उ०—

संवत्सरैश्चतुर्भिश्च तद्भावमधिगच्छति ।
ह्रासो न विद्यते तस्य प्रायश्चित्तैर्दुरात्मनः ॥

इति वचनानुसारेण चतुर्वर्षपर्यन्तं प्रायश्चित्तीयता वर्तते ।

(५०) उ०—देवलस्मृतेः शूलपाण्यादिव्यवस्थानुसारेण प्रामाण्यं नाङ्गीकरणीयम् ।

(५१, ५२, ५३) उ०—देवलस्मृतेः शूलपाण्यनुसारेण प्रामाण्यमङ्गीकरणीयम् । यत्र तु वचनान्तरेण सह विरोधस्तत्र तदेकवाक्यतया प्रामाण्यम् । शास्त्रीयव्यवस्थानुसारेण प्रायश्चित्तं वर्तत एव । संसर्गस्य लघुगुरुभेदेन वैरूप्यमप्यस्त्येव ।

(५४) उ०—विचारपूतं स्मृत्यादिप्रामाण्यमवश्यं सर्वैरङ्गीकरणीयम् ।

(५५, ५६, ५७) उ०—सर्वापेक्षया मनुस्मृतेर्बलवत्त्वात् तदेकवाक्यतया देवलस्मृतेः प्रामाण्यमङ्गीकरणीयम् ।

(५८) उ०—संवत्सरपर्यन्तं तदधिककालपर्यन्तं वा म्लेच्छसंसर्गिणां कृतप्रायश्चित्तानामपि न व्यवहार्यता ।

(५९) उ०—मनुस्मृत्येकवाक्यतया प्रामाण्यम् ।

(६०) उ०—एतावता उद्ग्रन्थमल्लस्य देवलवचनं गलहस्त इति ।

(६१, ६२) उ०—मनुस्मृत्येकवाक्यतया प्रामाण्यम् ।

(६३) उ०—

स्मार्तभट्टाचार्यवर्यगुरवः शूलपाणयः ।
देवलादिस्मृतिर्ग्राह्या तत्प्रदर्शितवर्त्मना ॥

(६४) उ० यत्र यत्र स्मृतीनां विरोधस्तत्र स्वतर्केण निश्चेतव्यमित्यस्मदीयं मतम् । वत्सरमध्ये म्लेच्छसंसर्गिभिः प्रायश्चित्तं यथोक्तं करणीयं, तदूर्ध्वं व्यवस्थितप्रायश्चित्तस्य द्विगुणं विधेयम् ।

संवत्सराभिशस्तस्य दुष्टस्य द्विगुणो दमः ।

इति विधानात् । शास्त्रावधारितजात्यन्तरसमतापक्षेऽपि यथोक्तं प्रायश्चित्तं कृतवतां नरकोत्पादिका शक्तिः क्षीयते, व्यवहारनिरोधिका शक्तिरव्याहतैव, किं त्विदानीं सुदूरलण्डनप्रवासिनां बसरावास्तव्यानां च व्यवहार्यता सर्ववादिसम्मता, यतः केचन केषांचन कृतविद्यानां घनिष्ठकुटुम्बाद्यवगाहिस्वजनाः, केचन केषांचिद्धनवतां पुत्रपौत्रादिरूपानुरक्तभाविहितैषिणः, फलतः म्लेच्छराजानां सम्पत्क्रीतानां महदाश्रितानां च सदसद्विचारो मार्जनीयः ।

(६७, ६८) उ०—देवलस्मृतेः प्रामाण्यं रक्षणीयम् ।

(७०) उ०—देवलस्मृतेः शूलपाण्यादिव्यवस्थानुसारेण प्रामाण्यं नाङ्गीकरणीयम् । सा हि स्मृतिः प्रायश्चित्तलाघवात् अनुपनीताष्टवर्षाभ्यन्तरबालविषया ।

(७४) उ० मनुवचनैकवाक्यतया देवलस्मृतेः प्रामाण्यम् । किं च रघुनन्दनव्यवस्थयैव देवलस्मृतेः प्रामाण्यमङ्गीकरणीयम् । म्लेच्छसंसर्गिणस्तृतीयसंसर्गिपर्यन्तं प्रायश्चित्तं करणीयम् । प्रायश्चित्ताश्रवणाच्चतुर्थसंसर्गिणः प्रायश्चित्तं नास्ति । तथा च प्रायश्चित्तविवेके व्यासः,

ये तदन्नाशिनो विप्राः कृच्छ्रं तेषां विधीयते ।

तद्भोजिनोऽर्धकृच्छ्रं तु तदन्नादस्य पादतः ।

तथा आपस्तम्बः,

भुक्तं यैस्तत्र पक्वान्नं कृच्छ्रं तेषां विनिर्दिशेत् ।
तेषामपि च यैर्भुक्तमर्धं तेषां विधीयते ॥
तेषामपि च यैर्भुक्तं तेषां पादो विधीयते ।

अतः—

यो येन पतितेनैषां संसर्गं याति मानवः ।
स तस्यैव व्रतं कुर्यात् तत्संसर्गविशुद्धये ॥

इति मनुवचनं संसर्गित्रितयपरं, प्रायश्चित्तमपि एतेष्वेव, अन्यत्र प्रायश्चित्ताश्रवणात् । लघुतरसंसर्गे म्लेच्छस्पर्शे तु द्वितीयादिसंसर्गिणि पापोत्पत्तौ प्रमाणं नास्ति, अतः प्रथमस्यैव प्रायश्चित्तं, वचनात् । तदाह वृद्धशातातपः,

अशुचिं संस्पृशेद्यस्तु एक एव स दुष्यति ।
तत्स्पृष्टोऽन्यो न दुष्येत्तु सर्वद्रव्येष्वयं विधिः ॥ इति ।

मिताक्षरायां तु पञ्चमसंसर्गिणोऽपि प्रायश्चित्तमुक्तम् । यथा "न च संसर्गिसंसर्गिणः पातित्याभावेन कथं प्रायश्चित्तमिति वाच्यम् ।

एनस्विभिरनिर्णिक्तैर्नार्थं कंचित्समाचरेत् ।

इति सामान्येन एनस्विमात्रसंसर्गप्रतिषेधेन महापातकिसंसर्गिसंसर्गस्यापि प्रतिषिद्धत्वात् पातित्याभावेपि युक्तमेव प्रायश्चित्तं, तच्च पादहीनम् ।

यो येन संवसेद्वर्षं सोपि तत्समतामियात् ।
पादहीनं चरेत्सोऽपि तस्य तस्य व्रतं द्विजः ॥

इति व्यासोक्तं द्रष्टव्यम् । एवं चतुर्थपञ्चमयोरपि कामतः संसर्गिणोरर्धहीनं त्रिपादोनं च द्रष्टव्यमिति ।

(७६) उ०—देवलस्मृतेः शूलपाण्यादिव्यवस्थानुसारेण आलापनध-

नग्रहणेतरत्र प्रामाण्यमङ्गीकरणीयम्। तदुभयत्र तु सर्वदेशीयानामाचारः।

(८०) उ०—याजनं योनिसम्बन्धः स्वाध्यायः सहभोजनम्।
कृत्वा सद्यः पतन्त्येते पतितेन न संशयः॥

इति देवलस्मृतेः शूलपाण्यादिव्यवस्थानुसारेण प्रामाण्यमङ्गीकरणीयम्।

एकोपि वेदविद्धर्मं यं व्यवस्येद्द्विजोत्तमः।
स एव परमो धर्मो नाज्ञानामयुतायुतैः॥

इति वचनात् चण्डालम्लेच्छयोः साम्यमेव। कामतः चतुर्विंशतिवारभोजनसंसर्गे एतैः सह जाते सति चतुर्विंशतिवार्षिकव्रतेन शुद्धिव्यवहार्यता च, तत्स्त्रीणां कामतः सकृत् गमनेपि तथैव।

(९१) उ०—बहुवारं म्लेच्छसंसर्गात्तत्ज्जातिप्राप्तावपि प्रायश्चित्तार्हता वर्त्तत एव, किंतु न व्यवहार्यता।

(९८) उ०—शूलपाण्यादिव्यवस्थया देवलस्मृतेः स्वमतपोषकता। अन्यथा तु न।

(९९) उ०—यत्तु

म्लेच्छैः सहोषितो यस्तु पञ्चप्रभृतिर्विंशतिः।
वर्षाणि शुद्धिरेषोक्ता तस्य चान्द्रायणद्वयम्॥
ऊर्द्ध्वं संवत्सरात्कल्प्यं प्रायश्चित्तं द्विजोत्तमैः।
संवत्सरैश्चतुर्भिस्तु तद्भावं सोऽधिगच्छति॥

इत्यादि देवलवचनं, तत् लघुतरलघुतमादिसंसर्गे यथायोग्यं बोद्धव्यम्।

(१००) उ०—अस्मद्देशे शूलपाणिप्रभृतीनां व्यवस्था प्रचलिता। देवलस्मृतिस्तु संग्रहकृता यत्र यत्र धृता प्रमाणीकृता च तत्र तत्रैव व्यवहार्या, अतो न सर्वत्र प्रामाण्यमङ्गीकरणीयम्।

(१०१) उ०—देवलस्मृतिः प्रमाणमेव । अज्ञानतो म्लेच्छसंसर्ग समाजकल्याणार्थितया राजकोपेन चिकित्साविधानेन आपत्काले च म्लेच्छसंसर्गे किमपि प्रायश्चित्तमत्यावश्यकम् । कामतोऽपि म्लेच्छैः संस्पृष्टानां सत्यनुतापे पुनः स्वसमाजे प्रवेशार्थं किमपि प्रायश्चित्तमवश्यं कल्पनीयम्, तत्र च पातकगौरवलाघवविचारो योग्यः ।

(१०७) उ०—देवलस्मृतेः शूलपाण्यादिव्यवस्थानुसारेण प्रामाण्यमङ्गीकरणीयं, म्लेच्छैः सह संसर्गतारतम्येन प्रायाश्चित्ततारतम्यमङ्गीकरणीयं, न तत्र कश्चिदवधिरस्ति ।

(१०८) उ०—देवलस्मृतेः प्रामाण्यमङ्गीकरणीयम् । तृतीयसंसर्गपर्यन्तं दोषजनकत्वे वैरूप्यमस्ति ।

(१०६) उ०—बहुस्मृतिविरोधेन देवलस्मृतेरप्रामाण्यम्, यथा,

गृहीतो यो बलान्म्लेच्छैः पञ्च षट् सप्त वा समाः ।
दशादि विंशति यावत् तस्य शुद्धिर्विधीयते ॥

अस्य देवलवचनस्य "चण्डालान्त्यस्त्रियो गत्वा" इत्यादिवचनविरोधादप्रामाण्यम् । म्लेच्छैर्बलात्कारेण गृहीतोपि स्वान्नं तदीयद्रव्येण वा तण्डुलादीन् क्रीत्वाऽन्नं भक्षयति । देवलवचनोक्तं प्रायश्चित्तं विधीयत इति भावः । स्मृत्युक्तावधिपर्यन्तं म्लेच्छसंसर्गे प्रायश्चित्तं भवति ।

(११३) उ०—संवत्सरपर्यन्तं म्लेच्छसंसर्गे प्रायश्चित्तयोग्यता ।

संवत्सरपर्यन्तं संसर्गापेक्षया तदधिककालम्लेच्छसंसर्गे प्रायश्चित्ततारतम्यमस्त्येव, परं कृतेपि प्रायश्चित्ते व्यवहार्यता न भवति ।

(११५) उ०—देवलस्मृतिविषये शूलपाणिव्यवस्थाऽङ्गीकरणीया ।

एकवर्षपर्यन्तं म्लेच्छसंसर्गेण प्रायश्चित्तीयता । म्लेच्छसंसर्गविषये प्रायश्चित्तीयत्वव्यवहार्यत्वयोर्वैरूप्यमस्त्येव ।

(११६) उ०—देवलस्मृतिः प्रमाणमेव।

(११७) उ०—देवलस्मृतेर्न केवलं शूलपाण्यादिव्यवस्थानुसारेण प्रामाण्यं किं, तु "संस्काराद्ब्राह्मणो भवेत्" इत्यादिवेदोपबृंहितवचनप्राचुर्येणापि प्रामाण्यमङ्गीकरणीयमेव। म्लेच्छसंसर्गप्रायश्चित्तस्य म्लेच्छसंसर्गव्यतिरिक्तस्थलकालकर्तव्यत्वविधानाददानीं तादृशस्थलकालयोरभावाच्च तद्विचारस्य वैयर्थ्यापादनेन तद्विषयकं प्रश्नद्वयं निरस्तमिति सविनयं विज्ञाप्यते। यदि प्रायश्चित्तं करणीयमेवेत्याग्रहः, तदापि—

यत्त्वगस्थिगतं पापं देहे तिष्ठति मामके।
प्राशनं पञ्चगव्यस्य दहत्यग्निरिवेन्धनम्॥

इत्येतन्मन्त्रं मनसि कृत्वा त्रिवारं पंचगव्यसेवनेन सर्वे पापाः प्रणश्यन्ति, सर्वप्रायश्चित्तफलमपि लभ्यते इत्येव ममाशयः।

(११६, १२०) उ०—प्राचीनपक्ष एव।

(१२१) उ०—केषुचिदंशेषु प्रमाणं केषुचिच्च न। सति पश्चात्तापे अवधिनियमनं न योग्यम्। तथापि स्थिरः कश्चिदवधिस्तु अपेक्षित एव। संसर्गलाघवगौरवविचारोऽपि योग्यः।

(१२२) उ०—देवलस्मृतिर्न प्रमाणम्। म्लेच्छसंसर्गप्रायश्चित्तेऽवधिनियमनं न योग्यम्।

(१२४) अहिन्दूनां हिन्दुत्वं सम्भवति न तु द्विजत्वादि।

(१२५, १२६, १२७, १२८, १३६, १३७, १३८, १४३, १४४) उ०—प्रामाण्यमस्त्येव।

(१४५) उ०—देवलस्मृतेः शूलपाण्यादिव्यवस्थानुसारेण प्रामाण्यं, तद्विरुद्धानाञ्च स्मृत्यन्तरानुकूल्येन प्रामाण्यं भवितुमर्हति। प्रामाण्याङ्गीकारेऽपि देशाचारभेदाद् व्यवस्था।

"येषु स्थानेषु यच्छौचं धर्म्माचारश्च यादृशः।
तत्र तं नावमन्येत धर्म्मस्तत्रैव तादृश" इति मरीचिवचनात्।

येन म्लेच्छसंसर्गः कृतः, स मरणपूर्वकालपर्यन्तं प्रायश्चित्ताधिकारी। मरणोत्तरं तत्पापक्षयार्थं तदीयगुर्वादिभिरपि प्रायश्चित्तं कर्तुं शक्यत इति स्मार्तभट्टाचार्यादिमतम्। परन्तु सद्यो ज्ञानकृतगुरुतरसंसर्गेण चिरकालाभ्यस्तसंसर्गेण वा म्लेच्छभावं प्राप्तस्य कृतेऽपि प्रायश्चित्ते व्यवहार्यत्वं नास्तीति तत्सिद्धान्तः। संसत्सरपर्यन्तम्लेच्छसंसर्ग इत्यादिकालविशेषनिर्देशयुक्तप्रश्नदर्शनात् त्रयोदशप्रश्ने देवलस्मृतेरुल्लेखाच्चानुमीयते देवलवचनमत्र पृच्छ्यते। तदुल्लेखपूर्वकं प्राचीननिबन्धसम्मतसिद्धान्तः प्रदर्श्यते। तथाहि प्रायश्चित्तविवेके देवलः—"दासीकृतो बलान्म्लेच्छैश्चाण्डालाद्यैश्च दस्युभिः। अशुभं कारितं कर्म्म गवादेः प्राणहिंसनम्। उच्छिष्टमार्जनञ्चैव तथा तस्यैव भोजनम्। खरोष्ट्रविड्वराहाणामामिषस्य च भक्षणम्। तत्स्त्रीणाञ्च तथा सङ्गस्ताभिश्च सह भोजनम्। मासोषिते द्विजातौ तु प्राजापत्यं विशोधनम्। चान्द्रायणन्त्वाहिताग्नेः पराकस्त्वथवा भवेत्। चान्द्रायणं पराकं वा चरेत् संवत्सरं द्विजः। संवत्सरोषितः शूद्रो मासार्द्धं यावकं पिबेत्। मासं विप्रोषितः शूद्रः कृच्छ्रपादेन शुध्यति॥ ऊर्द्ध्वं संवत्सरात् कल्प्यं प्रायश्चित्तं द्विजोत्तमैः। संवत्सरैश्चतुर्भिश्च तद्भावं सोऽधिगच्छति। हासो न विद्यते तस्य प्रायश्चित्तैर्दुरात्मनः।" तदिह म्लेच्छैश्चाण्डालाद्यैर्दस्युभिर्यदाऽनाहिताग्निद्विजातिरुच्छिष्टमार्जनोच्छिष्टभक्षणखरोष्ट्रविड्वराहमांसभक्षणम्लेच्छस्त्रीसङ्गतदीयस्त्रीसहभोजनादि कुत्सितं कर्म्म बलात् मासैकं कारितः, तदा तेन प्राजापत्यं, साग्निना तु चान्द्रायणं कार्यम्, क्षत्रियवैश्याभ्यां पराकव्रतम्, अनग्निना तु ब्राह्मणेन वत्सरैकदास्यकरणे चान्द्रायणं कार्यम्, इतराभ्यां पराकः। शूद्रेण तु मासैकदास्ये कृच्छ्रपादव्रतम्।

वत्सरैकदास्ये मासार्द्धं यावकपानं, वत्सराद्रूद्ध्वं वत्सर-चतुष्टयं यावत्तावद् भागहारेण प्रायश्चित्तमूहनीयम्। तदूर्ध्वं तत्समत्वेन पतितत्वात् प्रायश्चित्ताभावान्मरणमिति शूलपाणिमहामहोपाध्यायाः। यत्र समत्वाभिधानं तत्र मरणवैकल्पिकचतुर्विंशतिवार्षिकव्रते कृतेऽपि अव्यवहार्यत्वमिति अनुपातप्रकरणे तत्सिद्धान्तः। अत्र तत्स्त्रीणां सङ्गः सहवासो, न तु मैथुनम्, तत्र चाण्डालतुल्यत्वाभिधानादिति तद् व्याख्याता गोविन्दानन्दः। अत्रैव स्मृतिभट्टाचार्याः, तत् प्रायश्चित्तलाघवात् अनुपनीताष्टवर्षबालविषयम्। अत्र जातमात्रस्याहिताग्नित्वसम्भवः। तथा च जाबालः,–"जाते कुमारेऽरणिं मथित्वा तस्मिन्नायुष्यहोमान् जुहोति" इत्याद्यनन्तरं "स शालाग्नि" रित्यादि। तथा च अष्टवर्षाभ्यन्तरवर्त्ती बालको यदि म्लेच्छचाण्डालैर्बलात् उच्छिष्टमार्जनादिरूपकुत्सितं कर्म्म कारितः स्यात् तदैव देवलोक्तं शूलपाणिव्याख्यातञ्च प्रायश्चित्तं वत्सरैकस्थले वेदितव्यम्, तदूर्द्धवयस्कस्य तु प्रायश्चित्ताधिक्यम्, पूर्णवयस्कस्य बलात्तादृशकर्म्मकरणे ज्ञानकृतान्न्यूनमज्ञानकृताच्चाधिकं तत्तुल्यं वा प्रायश्चित्तम्, अष्टाचत्वारिंशद्वाराभ्यस्ततदन्नभोजनेन पातित्यमिति स्मार्तसम्मतसिद्धान्तः। तदयं निष्कर्षः, संवत्सरपर्यन्तं म्लेच्छसंसर्गिणां अष्टवर्षानधिकवयस्कानां प्रायश्चित्तलाघवम्, वर्षचतुष्टयगते तु कृतप्रायश्चित्तानामपि तेषामव्यवहार्यत्वम्। वसन्तरानन्तरं भागहारेण प्रायश्चित्तवृद्धिरुपरि दर्शितैव।

(१४६) मुद्रापितदेवलस्मृतेर्बहूनि वचनानि शूलपाणिमयूखकारादिभिः स्वनिबन्धे समुद्धृतानीति तत्प्रामाण्यमवश्यमूरीकरणीयम्। सति चैवं वत्सरचतुष्टयपर्यन्तं प्रायश्चित्तीयता ततोऽवगम्यते इति स्पष्टमेव सर्वेषाम्।

यत्तु—

म्लेच्छैस्सहोषितो यस्तु पञ्चप्रभृतिविंशतिः ।
वर्षाणि शुद्धिरेषोक्ता तस्य चान्द्रायणद्वयम् ॥

इति, तदिदं सहवासरूपलघुतरसंसर्गमात्रपरम्, न तु तदन्नभक्षणादिपरम् । अत एव शूलपाणिना—"संवत्सरचतुष्टयानन्तरं प्रातश्चित्ताभावान्मरण" मिति स्वजातिधर्माधिकारः सर्वथा वार्यत इति । इदं तु बलात्कारापादितम्लेच्छसंसर्गादिपरम्, न तु कामतस्तत्संसर्गादिपरम् । कामतस्तु संवत्सरद्वयमध्य एव प्रायश्चित्तानर्हता । स्मार्तभट्टाचार्यास्तु "संवत्सरैश्चतुर्भिस्तु" इति अष्टवर्षन्यूनबालपरमिति वदन्तः प्रवृद्धानां संवत्सरमध्य एव स्वजातिधर्मानधिकार इति विवेचयन्ति । सर्वथा तु संवत्सरानन्तरं स्मार्तभट्टाचार्यसिद्धान्तरीत्या न प्रायश्चित्तीयता । मतान्तरदृष्ट्या तु संवत्सरचतुष्टयमध्ये । तत्राप्ययं विशेषोऽनुसन्धेयः—यत् संवत्सरपर्यन्तं म्लेच्छसंसर्गे स्वजातिप्रवेशः, तस्यापि लघुसंसर्गत्व एवेयं व्यवस्था । भोजनादौ यावच्चतुर्विंशतिवार्षिकप्रायश्चित्तं प्रायश्चित्तीयता, तदनन्तरं तु न । द्वादशवार्षिकप्रायश्चित्तमात्रेण तु व्यवहार्यता भवति । तदधिके तु स्वधर्माधिकारमात्रम् । एतानेव पतितानधिकृत्य "अथ पतिताः समवसाय धर्मांश्चरेयुरितरेतरयाजका" इति बौधायनसूत्रं प्रवृत्तमिति नन्दपण्डितेनाप्युक्तं स्वीयविष्णुस्मृतिव्याख्यायाम् । यद्यपि "पतिताः समवसाय" इति वाक्यं पतितोत्पन्नपरमिति नन्दपण्डितेनोक्तम्, तथापि तैरेव त्यक्तपतितपरत्वस्यैव वर्णनात् वत्सराधिकम्लेच्छसंसर्गिणामपि तदुपलक्षणमेवतैरेव सूचितमिति निष्कर्षः ।

॥ श्रीविश्वनाथः शरणम् ॥

षष्ठो भागः ।

अखिलभारतवर्षीय-

ब्राह्मणमहासम्मेलने

समालोचनीयप्रश्नालीनामुत्तराणि ।



(१६) षोडशः प्रश्नः—व्रात्यसंस्कारः कियत्परम्परापर्यन्तं शास्त्रसिद्धः ।

(१, २, ३, ४, ५, ६, ७, ८, ६, १०, ११, १२, १३, १४, १५, १६, १७, १८, १६) उ०—अनेकपरम्परातिक्रमेऽपि व्रात्यसंस्कारयोग्यतेति जयपुरस्थसूर्यनारायणशास्त्रिणां मतम् । शेखावाटीसीतारामशास्त्रिणामपीदमेव मतम् ।

परम्परात्रयानतिक्रम एव व्रात्यसंस्कार इति भगवान्शास्त्रिणः, तेन्नालिवेंकटरामशास्त्रिणः, पालघाटवैदिकसमाजतिरुवादिपण्डिताः, श्रीरामकृष्णशास्त्रिप्रभृतयो विजयनगरपण्डितास्तिरुपतिपण्डिताश्च वदन्ति ।

मायूरशिवरामकृष्णशास्त्रिणस्तु कस्यामपि परम्परायां न व्रात्यसंस्कारयोग्यतेति वदन्ति ।

वाणीशझामहोदयाः त्रिपुरुषमेव व्रात्यसंस्कारयोग्यता, क्वचित्तु दशपुरुषपर्यन्तमपि व्रात्यसंस्कारो दृश्यत इति वदन्ति ।

(२०, २१, २२) उ०—पुरुषत्रयावधि शास्त्रसम्मतः ।

(२४) उ०—द्वादशपुरुषावधि व्रात्यसंस्कारयोग्यता ।

(२५) उ०—पुरुषचतुष्टयानुपनीतत्व एव व्रात्यसंस्कारः, वीरमित्रोदये तथोक्तेः ।

(२६) उ०—व्रात्यपरम्पराजातानां न व्रात्यसंस्कारः ।

(२७) उ०—त्रिपुरुषं व्रात्यसंकारयोग्यता ।

(२८) उ०—परम्परानियमो वर्तते, अधाहवर्धनमपि कर्तव्यम् ।

(२९) उ०—परम्पराग्रहणेन न व्रात्यसंस्कारः ।

(३०) उ०—पुरुषत्रयपर्यन्तमेव व्रात्यसंस्कारः ।

(३१, ३३, ३४, ३५, ३६, ३७, ३८, ३९, ४०) उ०—त्रिपुरुषमेवानुपनीतानां व्रात्यसंस्कारः ।

(४१) उ०—परम्पराचतुष्टयातिक्रमे न व्रात्यसंस्कारयोग्यता ।

(४२) उ०—त्रिपुरुषं व्रात्यसंस्कारयोग्यता, परम्पराऽविगणनेऽपि व्रात्यसंस्कारयोग्यतेति केषांचन मतम् ।

(४३) उ०—त्रिपुरुषमनुपनीतानामपरिणीतासवर्णकन्यकानां परिपाल्यमानजननादिनिमित्तद्विजाद्याशौचानां व्रात्यसंस्कारयोग्यता । "त्रिपुरुषं मातृतः पितृतश्चाशुद्धा" इति त्याज्यप्रकरणीयविष्णुसूत्रात्, "यस्य प्रपितामहादी" त्यापस्तम्बवचनाच्च । "शनकैस्तु क्रियालोपात्" इत्यत्र शनकैः पदमपि प्रपितामहपर्यन्तार्थकम् ।

(४५) उ०–त्रिपुरुषम्, त्रिपुरुषाधिकस्य व्रात्यस्य न संस्कारः, "त्रिपुरुषं पतितसावित्रीकाणामपत्ये नोपनयनं नाध्यापनं च" इति पारस्करगृह्यसूत्रात् ।

(४६, ४७) उ०—व्रात्यसंस्कारः त्रिपुरुषपर्यन्तं शास्त्रसिद्धः अग्रे तूपनयनं भवति, नाध्यापनम् ।

(४८) उ०—बहुपरम्परायामपि व्रात्यसंस्कारः शास्त्रसिद्धः ।

(४९, ५०) उ०—त्रिपुरुषपर्यन्तं व्रात्यसंस्कारः शास्त्रसिद्धः, न चतुर्थे ।

(५१, ५२, ५३, ५४, ५५, ५६,) चतुर्थपुरुषपर्यन्तं व्रात्यसंस्कारः शास्त्रसिद्धः, अतः परं निषिद्धः, "त्रिपुरुषं पतितसावित्रीकाणामधिकारो नाध्यापनं च तेषाम्" इति पारस्करगृह्यसूत्रात्, आपस्तम्बादिसूत्राच्च ।

(५७, ५८) उ०—"व्रात्यात्तु जायते विप्रात्पापात्मा" इतिमन्वादिवचन-

पर्यालोचनया उपनयनोत्तरकालात्परं संस्कारक्रमप्राप्तविवाह-संस्कारात्प्राक् व्रात्यसंस्कारः कार्यः। अग्रेऽपि त्रिपुरुषपतितसावित्रीकाणामेव व्रात्यसंस्कारो भवितुमर्हति, पारस्करसूत्रात्।

(६०,६१) उ०—व्रात्यसंस्कारः पुरुषत्रयपर्यन्तं शास्त्रसिद्धः, आपस्तम्बसूत्रात्। केचित्तु सप्तमपुरुषपर्यन्तमिति वदन्ति।

आसप्तमाच्च पुरुषात्सावित्री पतिता यदि।
चान्द्रायणसहस्रेण न ते शुद्धिमवाप्नुयुः॥

इति वचनात्।

(६५) उ०—सम्प्रति स्थविरदशायां बहुपुरुषात्परमपि व्रात्यसंस्कारं विधाय क्षत्रियवैश्यभिन्नवर्णैः अज्ञातकुलाचारैरुपवीतग्रहणं विधीयते पण्डितरत्नैरिति।

(७१) व्रात्यसंस्कारस्त्रिपुरुषपर्यन्तं भवति, तदनन्तरं कृतेऽपि गुरुतरप्रायश्चित्ते न योग्यता। तथा च पारस्करगृह्यसूत्रे द्वितीयकाण्डे ५ कण्डिकायां ४२ सूत्रं, "त्रिपुरुषं पतितसावित्रीकाणां अपत्ये संस्कारो नाध्यापनं च", ४३ सूत्रं, "नैनमुपनयेयुर्नाध्यापयेयु"रिति। अस्य हरिहरभाष्यम् "पतितास्खलिता अधिकाराभावान्निवृत्ता सावित्री गायत्री येभ्यस्ते पतितसावित्रीका भवन्ति सम्पद्यन्ते तेषां त्रीन् पुरुषान्यावत् ये पतितसावित्रीकाः पितृपुत्रपौत्राः तेषामपत्ये पुत्रे संस्कारः उपनयनं भवति न पुनश्चतुर्थादीनाम्। एवं आपस्तम्बसूत्रे हरदत्तस्वामिना व्याख्यातं, "प्रपितामहादेरिति। प्रपितामहः पितामहः पिता स्वयं चानुपनीतः तत्रैव प्रायश्चित्तीयता संस्कारश्च। एतदधिकपुरुषेषु अनुपनीतेषु न तथा"।

(७१) उ०—त्रिपुरुषं व्रात्यसंस्कारो भवति, पारस्करसूत्रात्। यत्तु—

आसप्तमात्तु पुरुषान्नोपनीतद्विजन्मनाम्।
प्रायश्चित्तशतेनाऽपि निष्कृतिर्नैव जायते॥

इति बृहन्मनुना सप्तमपुरुषं यावत् व्रात्यसंस्कारः करणीय

इत्युक्तं, तत् जडत्वमूकत्वादिनाऽनुपनीतविषयम्, तत्रैव तस्य व्यवस्थापितत्वादिति। जडत्वमूकत्वादिनाऽनुपनीतानां अपतितत्वं पितृधनाधिकारित्वं च दायभागे उक्तं यथा "उपनयनानर्हस्यानुपनीतत्वे शूद्रवदपतितत्वात्, तेनैतेषां यथासम्भवमौरसक्षेत्रजाः क्लीबत्वादिशून्याः स्वपित्रनुसारेण भागहारिणः। अत्रोपनयनानर्हपदेन उपनयनयोग्यानामेव पातित्यमभिहितम् न तु उपनयनानधिकारिणां जडादीनाम्" इति।

(८०) उ०—त्रिपुरुषावधिव्रात्यदोषस्थले द्वादशवार्षिकं कर्तव्यं, तदधिकपुरुषावधि व्रात्यदोषस्थले प्रायश्चित्तव्यवस्था शास्त्रे न लिखिता। यदि चान्यत्र दृष्ट्या व्यवस्था कल्प्यते तदा यवनादीनामपि भूतपूर्वक्षत्रियत्वात् चतुर्विंशतिवार्षिकादिव्रतानुष्ठानेन शुद्धतया संस्कारापत्तिः व्यवहारापत्तिश्च, दुर्निवारा स्यादिति।

(८१) उ०—"शनकैस्तु क्रियालोपा"दिति मनुवचनस्य मेधातिथिभाष्ये उक्तम् "अथ वा शास्त्रार्थसंशये प्रायश्चित्तेनापि एषां परिषद्गमनाभाव इति पुनस्तत्रैवोक्तम्। ननु महाभारतादौ क्षत्रिया वर्तन्ते। तथा अद्यत्वेऽपि एते क्षत्रिया एवेति कस्यचिद्भ्रान्तिः स्यादत एवोक्तं "एते वृषला एवेति"।

(६६) उ३—मनुसंहितायां,

शूद्रायां ब्राह्मणाज्जातः श्रेयसा चेत्प्रजायत।
अश्रेयान् श्रेयसीं जातिं गच्छत्यासप्तमाद्युगात्॥
शूद्रो ब्राह्मणतामेति ब्राह्मणश्चैति शूद्रताम्।
क्षत्रियाज्जातमेवं तु विद्याद्वैश्यं तथैव च॥

याज्ञवल्क्यसंहितायां,

जात्युत्कर्षो युगे ज्ञेयः पञ्चमे सप्तमेपि वा।

एतेन सप्तमे जन्मनि पञ्चमे जन्मनि याज्ञवल्क्योक्त'वा'शब्देन तृतीये जन्मनि च ब्राह्मणत्वलाभविषये व्रात्यसंस्कारः शास्त्र-

सिद्धः। संस्काराभावे न ब्राह्मणत्वं लभेत, तथा चोक्तं मनुना,

नैतैरपूतैर्विधिवत् आपद्यपि च कर्हिचित्।
ब्राह्मान्यौनांश्च सम्बन्धानाचरेद् ब्राह्मणः सह ॥

एतद्वचनोक्ता एषा व्यवस्था कलीतरपरा। कलौ चतुर्वर्णानां परस्पराव्यवहारभावात् ॥

(९७) उ०—व्रात्यसंस्कारः स्वपितामहपर्यन्तं शास्त्रसिद्धः। स्वपितृपितामहयोरेकतरस्योपनयने अन्यतरस्योपनयनाभावेऽपि स्वस्य उपनयनं स्यात्। अनयोरुभयोरुपनयनाभावे स्वस्यापि नोपनयनं स्यात्।

पिता पितामहो यस्य नोपनीतौ द्विजन्मनः।
कृतकृत्योप्यसौ सद्भिर्नोपनेयः कदाचन ॥

इत्यादिवचनात्।

(१००) उ०—व्रात्यसंकारः सप्तमपुरुषपर्यन्तम् "आसप्तमात्तु पुरुषा" दित्यादिवचनात्।

(१०७) उ०—संस्कृतमातापितृजातस्यैव व्रात्यस्य संस्कार्यता।

(१०८) उ०—त्रिपुरुषपर्यन्तं शास्त्रसिद्धः।


(११५) उ०—त्रिपुरुषपर्यन्तं व्रात्यसंस्कारः शास्त्रसिद्धः। आपस्तम्बमते चतुर्थे संस्कारमात्रं गार्हस्थ्योपदेशश्च। पञ्चमस्य व्रात्यसंस्कारः। षष्ठादारभ्य प्रकृतिवत्।

(११६, १२०, १२१) उ०—प्राचीनपक्षः।

(१२३) उ०—अनेकपुरुषपरम्परापर्यन्तं व्रात्ययसंस्कार।

(१२४, १२५, १२६, १२७, १२८, १३४, १३६, १३७, १३८, १४३, १४४) उ०—प्राचीनपक्षः।

(१४५) उ०—त्रिपुरुषपर्यन्वं व्रात्यसंस्कारः शास्त्रसिद्धः। केचित्तु तदधिकपुरुषक्रमेण व्रात्यतां प्राप्तानामपि संस्कारं मन्यन्ते। किन्तु यावन्तः पुरुषा व्रात्यास्तावतां संख्याज्ञानमावश्यकम्, प्रतिपुरुषं



श्रीशुद्धाद्वैतसम्प्रदायाचार्य मथुरापीठाधिपति श्रीमद्गोस्वामि विठ्ठलनाथजी महाराजाः ।

एकैकगोदानरूपप्रायश्चित्तस्य तैर्विधानात्। शूद्रेण यौनसम्बन्धं कृतवत्सु द्विजेषु कस्यापि व्रात्यसंस्कारो नास्ति। अत्र प्रमाणमापस्तम्बादिवचनं प्रसिद्धम्। मनुश्च व्रात्यानां वंशे जात्यन्तरप्राप्तिमाह—"व्रात्यात्तु जायते विप्रात् पापात्मा भूर्जकण्टकः" इत्यादि। "शनकैस्तु क्रियालोपा" दिति वचने 'शनकैः' इत्युक्त्या त्रिपुरुषव्रात्यत्वं सूचितम्। अपि च "व्यभिचारेण वर्णानां अवेद्यावेदनेन च। स्वकर्मणां च त्यागेन जायन्ते वर्णसंकराः"। अत्र अकृतमासाशौचादिरूपशूद्राचाराणां द्विजातिवंश्यत्वेन निर्विप्रतिपत्तिकं पूर्वतः प्रसिद्धानाम् अगणितपुरुषपरम्परया सत्यपि व्रात्यत्वे यथाविधि प्रायश्चित्तानन्तरं संस्कारो भवितुमर्हतीति केचन मन्यन्ते।

(१४६) उ०—"यस्य प्रपितामहादि नानुस्मर्यते" इति प्रपितामहपर्यन्तमनुपनयन एव व्रात्यसंस्कारविधानात् त्रिपुरुषं पतितसावित्रीकाणामेव व्रात्यसंस्कारयोग्यत्वम्। अत एव विष्णुस्मृतौ "अथ त्याज्या" इत्युपक्रम्य "व्रात्याः त्रिपुरुषं मातृतः पितृतश्चाशुद्धा" इति त्रिपुरुषं पतितसावित्रीकाणां त्याज्यत्वमुपवर्णितमुपपद्यते। तत्र पण्डितप्रवरा एव प्रमाणमिति निष्कर्षः।

(१४८, १४६, १५१, १५२, १५३, १५५, १५७) उ०—त्रिपुरुषपर्यन्तम्।

(१५८) उ०—सप्तमपुरुषपर्यन्तं शास्त्रसिद्धः। यथा स्मृतिसागरे बृहन्मनुः—

आ सप्तमाच्च पुरुषान्नोपनीतो द्विजो यदि।
प्रायश्चित्तशतेनापि निष्कृतिर्न विधीयते।

(१५६, १६०, १६१) उ०—प्राचीनपक्षः।

(१६४) उ०—म० म० स्वर्गीय पं० राममिश्रशास्त्रिकृतव्रात्यसंस्कारमीमांसानुसारतः।

(१६६, १६६, १७०, १७१) उ०—प्राचीनपक्षः।

---

* श्रीविश्वनाथः शरणम् *

अखिलभारतवर्षीय-

ब्राह्मणमहासम्मेलने

समालोचनीयप्रश्नावलीनामुत्तराणि ।

(१७) सप्तदशः प्रश्नः—जातिसामान्यमैहिककर्मकृतमव्यवस्थितमुत जन्मकृतं व्यवस्थितं च ?

(१, २, ३, ४, ५, ६, ७, ८, ६, १०, ११, १२, १३, १४, १५, १६, १७, १८, १६, २०, २१, २२, २३, २४, २५, २६, २७, २८, २६, ३०, ३१, ३२, ३३, ३४, ३५, ३६, ३७, ३८, ३६, ४०, ४१, ४२, ४३, ४४, ४५, ४६, ४७, ४८, ४६, ५०,) उ०—जातिसामान्यं जन्मकृतमिति सर्वसम्मतोऽयं विषयः ।

(५५) उ०—जातिसामान्यं कर्मकृतं,

चातुर्वर्ण्यं मया सृष्टं गुणकर्मविभागशः ।

इति भगवद्गीतोक्तेः ।

(६७) जन्मकृतैव, विश्वामित्रादिदृष्टान्तेन जातिपरिवृत्तिवादस्तु न योग्यः । तद्वादिनो हि एवं वाच्याः, यत्खलु भवन्तो विश्वामित्रवत् पूर्वं सहस्रवत्सरं पुनर्बहुसहस्रवत्सरान् पुनरपि बहुसहस्रवत्सरान् व्याप्य कठोरं तपस्तप्यन्तु, अपि च—

'पश्य मे तपसो वीर्यं स्वार्जितस्य नरेश्वर ।
एष त्वां स्वशरीरेण नयामि स्वर्गमोजसा ॥

इति रामायणोक्तरीत्या त्रिशङ्कुमिव कमपि स्वशरीरेण स्वर्गं नयन्तु, अपि च—

सृजन् दक्षिणमार्गस्थान् सप्तर्षीनपरान्पुनः ।
नक्षत्रवंशमपरमसृजत्क्रोधमूर्छितः ॥

इति रामायणोक्तानपरान्सप्तर्षीन् अपरं नक्षत्रवंशं च सृजन्तु, तदनन्तरं च ब्रह्मणो वरेण शूद्राद्वैश्यत्वं वैश्यात्क्षत्रियत्वं क्षत्रियाद्ब्राह्मणत्वं च इत्येवं रूपेण ब्राह्मणत्वं लभन्तां, ततश्च योगिनामलौकिकसामर्थ्यादलौलिकं लौकिके नाङ्गमिति न्यायात् अलौकिकसामर्थ्यदृष्टान्तो लौकिके न सम्भवतीत्यास्तां विस्तरः ।

(९८) उ०—ब्राह्मणादिवर्णजातिर्जन्मकृता व्यवस्थिता च, शूद्राणां म्लेच्छादीनां च जातिर्जन्मना ऐहिककर्मणा च द्विधैव सम्भवति, अव्यवस्थिता च ।

(९९) उ०—आत्मबोधोपनिषत्,

"ब्राह्मण्यं कुलगोत्रे च नामसौन्दर्यजातयः ।
स्थूलदेहगता एते" इति ।

(१०३) जन्मसिद्धमेव । कर्मणा जन्मान्तरे जन्यते । तत्र प्रमाणं हरिवंशे,

सप्त व्याधा दशार्णेषु मृगाः कालाञ्जने गिरौ ।
तेपि जाताः कुरुक्षेत्रे ब्राह्मणा वेदपारगाः ॥

(१०७, १०८) उ०—जन्मकृतं व्यवस्थितम् ।

(१०९) उ०—जातिसामान्यं कर्मकृतं व्यवस्थितं च ।

अपि च ब्राह्मणत्वादिजातयः तपसा दीक्षया योगबलेन वा इह जन्मनि इतरैर्न लभ्यन्ते एव । तत्र महाभारतवचनं प्रमाणं, यथा अनुशासनपर्वणि ४ अध्याये,

न ब्राह्मण्यं क्षत्रियाद्यैस्तपःकोट्यापि लभ्यते ।
विश्वामित्रस्य तत्प्राप्तिर्मात्रा ब्रह्मोदनाशनात् ॥

(११३) जातिसामान्यं जन्मकृतं व्यवस्थितं च ।

(११४) ब्राह्मणत्वादिजातिर्जन्मकृता व्यवस्थिता च ।

(११५) जातिसामान्यं जन्मकृतं व्यास्थितं च ।

(११७) उ०—जातिसामान्यं ऐहिककर्मकृतं अव्यवस्थितं च इत्येव शास्त्राणां तत्त्वम् । तथाहि, जात्या ब्राह्मणत्वे प्रमाणवचनानि । चातुर्वर्ण्यं ब्रह्मणो मुखवाहूरुपादजन्यमित्येकम्, तैत्तिरीयब्राह्मणे "ऋग्भ्यो जातं वैश्यं वर्णमाहुः । यजुर्वेदं क्षत्रियस्याहुर्योनिम् । सामवेदो ब्राह्मणानां प्रसूतिः ।" इति द्वितीयम् । शतपथब्राह्मणे "भूरिति वै प्रजापतिर्ब्रह्माजनयत् भुव इति क्षत्रं सुव इति विशः" इति तृतीयम् । अस्मिन् प्रमाणद्वये शूद्राणां प्रसक्तिर्नास्त्येव । ऋक्संहितायां विराट्पुरुषवर्णने "मुखं किमस्य कौ बाहू" इत्यादिप्रश्नस्योत्तरत्वेन "ब्राह्मणोस्य मुखमासीद्बाहू राजन्यः कृतः । ऊरू तदस्य यद्वैश्यः पद्भ्यां शूद्रोऽजायत" इत्युक्तम् । तत्र ब्राह्मणादयो वैराजस्य मुखादिस्थानीयाः, न तु मुखादिभ्यो जाता इति ज्ञायते ।

ब्राह्मण्यां ब्राह्मणेनैव चोत्पन्नो ब्राह्मणः स्मृतः ।

इति हारीतः ।

ब्राह्मण्यां ब्राह्मणाज्जातः संस्काराद्ब्राह्मणो भवेत् ।

इति देवलः ।

एतेषां श्रुतिस्मृतिवचनानां अन्योन्यमनैक्यदर्शनात् एतानि सर्वाणि ब्रह्मस्तुतिपराण्येवेति निश्चिनुमः । अपि च "न चैतद्विद्मो ब्राह्मणाः स्मोऽब्राह्मणा वा" इति श्रुत्या जन्मना जातिकल्पनं निरस्तम् । अथ वृत्त्या जातिकल्पने प्रमाणवचनानि—

विप्राणां ज्ञानतो ज्यैष्ठ्यं क्षत्रियाणां तु वीर्यतः ।
वैश्यानां धान्यधनतः शूद्राणामेव जन्मतः ॥

इति मनुः ।

न जात्या ब्राह्मणश्चात्र क्षत्रियो वैश्य एव च ।
न शूद्रो न च वै म्लेच्छो भेदिता गुणकर्मभिः ॥

इति शुक्रनीतिः ।

तपो दमो दया दानं सत्यं धर्मः श्रुतं घृणा ।
विद्या विज्ञानमास्तिक्यं एतद्ब्राह्मणलक्षणम् ॥

इति शातातपः ।

चातुर्वर्ण्यं मया सृष्टं गुणकर्मविभागशः । इति ।
शान्तं दान्तं जितक्रोधं जितात्मानं जितेन्द्रियम् ।
तमेव ब्राह्मणं मन्ये शेषाः शूद्रा इति स्मृताः ॥

इति धर्मतत्त्वम् ।

न जातिः पूज्यते राजन् गुणाः कल्याणदायकाः ।
चण्डालमपि सद्वृत्तं तं देवा ब्राह्मणं विदुः ॥

इति गौतमसंहिता,

ब्राह्मणः पतनीयेषु वर्तमानो विकर्मसु ।
दाम्भिको दुष्कृतप्रायः शूद्रेण सदृशो भवेत् ॥
यस्तु शूद्रो दमे सत्ये धर्मे च सततोत्थितः ।
तं ब्राह्मणमहं मन्ये वृत्तेन हि भवेद्द्विजः ॥
शूद्रे चैव भवेल्लक्ष्म द्विजे तच्च न विद्यते ।
न वै शूद्रो भवेच्छूद्रो ब्राह्मणो न च ब्राह्मणः ॥
यत्रैतल्लक्ष्यते सर्प वृत्तं स ब्राह्मणः स्मृतः ।
यत्रैतन्न भवेत्सर्वं तं शूद्रमिति निर्दिशेत् ।

इति भारते वनपर्वणि,

शूद्रेऽपि दृश्यते वृत्तं ब्राह्मणे न तु दृश्यते ।
शूद्रोऽपि ब्राह्मणो ज्ञेयो ब्राह्मणः शूद्र एव सः ॥

इति ।

न विशेषोऽस्ति वर्णानां सर्वं ब्रह्ममयं जगत् ।
ब्रह्मणा पूर्वसृष्टं हि कर्मभिर्वर्णतां गतम् ॥

इति शान्तिपर्वणि ।

भक्तिरष्टविधा ह्येषा यस्मिन्म्लेच्छेपि वर्तते ॥
स विप्रेन्द्रो मुनिः श्रीमान् स यतिः स च पण्डितः ॥

इति विष्णुधर्मः ।

चित्रकर्म यथाऽनेकैरङ्गैरु मील्यते शनैः ।
ब्राह्मण्यमपि तद्वत्स्यात् संस्कारैर्विधिपूर्वकैः ॥

इत्यंगिराः ।

न ह्यस्य विद्यते कर्म किञ्चिदामौञ्जिबन्धनात् ।
वृत्त्या शूद्रसमस्तावत् यावद्वेदे न जायते ॥

इति वसिष्ठः । "धर्मचर्यया जघन्यो वर्णः पूर्वं पूर्वं वर्णमापद्यते जातिपरिवृत्तौ" इत्यापस्तम्बः । इत्यादिप्रमाणकोटिभिः कर्मणैव ब्राह्मणत्वसिद्धिः न तु जन्मनेति व्यवस्थितम् । कालान्तरप्रवर्तितधर्मव्यवस्थापकस्य मीमांसाशास्त्रस्य परिवर्तितधर्मव्यस्थापने प्रसक्त्यभावात् वेदवादमात्रपरत्वाच्च तत्सरणिर्नाङ्गीकृतेति क्षन्तव्यम् ।

(११६, १२०, १२१, १२२, १२३, १२४, १२५, १२६, १२७, १२८)
उ०—प्राचीनपक्षः ।

(१२६) उ०—जातेर्जन्मकृतत्ववादिभिरपि अनापदि कर्मणां व्यत्यये अपकृष्टजातिप्राप्तिर्भवतीति स्वीक्रियत एव ।

यस्य यल्लक्षणं प्रोक्तं पुंसो वर्णाभिव्यञ्जकम् ।
तदन्यत्रापि दृश्येत तत्तेनैव विनिर्दिशेत् ।

इत्यादिभागवतवचनेन—

तपोबीजप्रभावैस्तु ते गच्छन्ति युगे युगे ।
उत्कर्षं चापकर्षं च मनुष्येष्विह जन्मतः ॥

इत्यादिमनुवचनोपरि "सजातिजानन्तरजाः तपःप्रभावेण विश्वामित्रवत्, बीजप्रभावेण ऋष्यशृङ्गादिवत् कृतत्रेतादौ मनुष्यमध्ये जात्युत्कर्षं गच्छन्ति" इति कुल्लूकभट्टव्याख्यानेन मनु-

वचनस्थ "इह" पदस्य एतज्जन्मनीत्यर्थकतया जन्मान्तरकल्पनाया असम्भवेन–

यद्दुस्तरं यद्दुरापं यद्दुर्गं यच्च दुष्करम् ।
सर्वं तत्तपसा साध्यं तपो हि दुरतिक्रमम् ॥

इत्यादिमनुवचनपर्यालोचनेन—

व्यत्यते कर्मणां शाम्यं पूर्ववच्चाधरोत्तरम् ।

इत्यादियाज्ञवल्क्यवचनपर्यालोचनेन चावगम्यते ।

ब्राह्मणस्य तपो ज्ञानं तपः क्षत्रस्य रक्षणम् ।
वैश्यस्य तु तपो वार्ता तपः शूद्रस्य सेवनम् ॥

इत्यादिना च मनुनैव तपःशब्दार्थोपि विवृतः । एवं च

शूद्रो ब्राह्मणतामेति ब्राह्मणश्चैति शूद्रताम् ।

इत्यादि मनुवचनमपि आञ्जस्येनैव संगच्छते ।

(१३१) उ०—श्रुतिः ।

ब्राह्मणोऽस्य मुखमासीद्बाहू राजन्यः कृतः ।
ऊरू तदस्य यद्वैश्यः पद्भ्यां शूद्रो अजायत ॥

आपस्तम्बः—

चत्वारो वर्णा ब्राह्मणक्षत्रियवैश्यशूद्रास्तेषां पूर्वः पूर्वो जन्मतः श्रेयान् ।

याज्ञवल्क्यापस्तम्बौ—

ब्राह्मण्यां ब्राह्मणेनैव ह्युत्पन्नो ब्राह्मणः स्मृतः ।
सवर्णेभ्यः सवर्णासु जायन्ते हि सजातयः ॥

सवर्णापूर्वशास्त्रविहितायां यथर्तु गच्छतः पुत्रास्तेषां कर्मभिः सम्बन्धः । इत्यादि ।

(१३६, १३७, १४१, १४३, १४४) उ०—प्राचीनपक्ष एव ।

(१४५) उ०—जातिसामान्यं जन्मकृतं व्यवस्थितश्च । "ब्राह्मणोऽस्य मुखमासी" दित्यादि श्रुतिः, "लोकानां तु विवृद्ध्यर्थम्," इत्या-

दिस्मृतिः जातकर्मादिसंस्कारसमये जातकस्य तपस्यादिकर्मणोऽसम्पत्तावपि जातिभेदनियन्त्रितव्यवस्थानुसरणमत्र प्रमाणम्। "जन्मना ब्राह्मणो ज्ञेयः संस्काराद् द्विज उच्यते। विद्यया याति विप्रत्वं श्रोत्रियस्त्रिभिरेव चे" ति पैठीनसिना, "स वै शूद्रो न वै शूद्रो ब्राह्मणो न च ब्राह्मणः" इत्यादि महाभारतवचनेन जातिब्राह्मणादेः प्रतिपादनात्। जन्मना ब्राह्मणस्य गुणवशान्मुख्यब्राह्मण्यम्. जन्मना हीनस्य सत्यपि गुणे जात्या ब्राह्मण्यं नास्ति। एवं जात्यन्तरेषु ज्ञेयम्, इति संक्षेपः।

(१४६, १४८, १४९, १५२, १५४, १५५, १५७, १५९, १६०, १६१, १६२, १६२, १६३, १६४, १६६, १६९, १७०, १७१) उ०—जातिसामान्यं जन्मकृतमेव, न तु कर्मकृतम्।

इति।

शुद्धिपत्रम् ।

१ सारल्याय प्रायशः सन्धिर्नादृतः ।
२ वेंक, संकी इत्यादौ बवादि स्थाने च ङ्क, वबवोर्यथायोग्यं योजना कर्तव्या ।

भूमिका ।

पृष्ठ संख्या	पंक्तिसंख्या	अशुद्धम्	शुद्धम्
४	२४	तव	तमव
५	६	पूर्व	पूर्वं
"	२३	तृतीम	तृतीय
६	८	ताल	तावल
"	२२	नियमन	नियमनं

प्रश्नोत्तराणि ।

१	१०	वानू	वात्
२	१	साथम्	सार्थम्
"	१७	स्त्रोणां	स्त्रीणां
"	२६	पुपंष	पुष्पं
३	७	तैनि	तैर्नि
"	२४	सवैं	सर्वे
४	२४	विवादे	विवाहे
५	२२	यनाम्	यानाम्
६	१	वर्यन्तं	पर्यन्तं

पृष्ठ संख्या	पंक्तिसंख्या	अशुद्धम्	शुद्धम्
"	६	वादस्य	वाहस्य
७	६	पनप्र	नप
११	६	पूर्वं	अनन्तरं
"	१०	अनन्तरं	पूर्वं
"	१५	श्चयो	श्चनयो
८	११	दृशी	दृश
१०	२१	तरें	तरं
११	२२	भत्वयेव	भवत्येव
"	६	तुर्विंक्ष	तुर्विंक्ष
"	१८	तरे	तरं
१२	११	मातापितृभ्रातॄणां	मातापिताभ्रातॄणां
११	१६	कवृ	कत्वम् । घृ
११	२६	च्छ्रिक	च्छिक
१३	१५	त्वःए	त्वए
१४	१६	स्यन्तौ	स्यन्त्यौ
१५	७	विघं	विधं
१६	६	विवहः	विवाहः
"	१०	ल्यनं	ल्पनं
"	२०	वति	वर्ति
१७	१	त्पयम्	त्पर्यं
"	१३	प्रदानक्षमः	प्रदानं क्षमम्
१८	५	स्यमु	स्यामु
१०	२३	पडि	पण्डि
२१	११	वति	वत
२२	६	लिख	लेख

पृष्ठ संख्या	पंक्तिसंख्या	अशुद्धम्	शुद्धम्
,,	२३	दिनां	दिना
२३	१	णक्ष	क्षण
,,	२६	म्मव	म्भव
२४	२४	नाममङ्ग	नामङ्ग
२५	१६	पुंसो	पुंसयो
,,	२४	काले	कालं
२३	१	चयं	चर्यं
,,	,,	पुंसो	पुंसयो
,,	११	वष	वर्षं
,,	,,	साल	सलि
२७	६	ना	नाम्
,,	१६	र्य्यम्	र्यम्
,,	१७	तक्र	तर्क
,,	१८	पुसः	पुंसः
,,	२२	त्रागा	त्रगा
,,	२४	न्तमि	न्तत्वमि
२८	४	स्त्रो	स्त्री
,,	६	क्रमःत्	क्रमात्
,,	२१	विवाद	विवाह
२६	८	स्त्रांनु	स्त्रानु
,,	१६	पय	पर्य
३२	१७	वतो	वती
,,	२३	त्यक्त	त्यक्तु
३३	२	व्वव	व्यव
,,	६	गन्तु	गन्तु

पृष्ठ संख्या	पंक्तिसंख्या	अशुद्धम्	शुद्धम्
,,	२५	नतरं	नन्तरं
३५	८	वृप	वर्ष
३६	३	मअवै	मवै
,,	१२	उपगमन	उपहसन
,,	१७	तद्या	तब्या
३८	२६	षला	षली
३९	१	न्वत्र	न्यत्र
४२	६	कर्तु	कर्तुं
४२	३	वजनं	वचनं
४३	१६	पितृभ्रात्राद	पिताभ्रात्रादि
४४	१८	शलेख	शालेख
४५	२६	ध्याव	ध्यविहै
४६	२४	ष्ट्रैव्य	ष्ट्रैर्व्य
४७	१७	नरका	नरका
५२	२६	तावतां	तावता
५२	१८	विप्रत्ति	विप्रति
,,	२४	प्रतिज्ञाना	परिज्ञाना
५३	१७	शेषणा	शेषाणा
५५	७	कतुं	कर्तुं
,,	१४	धमस्य	धर्मस्य
,,	२०	पारव	परिव
५६	११	एवाधिकार	एवाधिकारः
५७	१	धभ	धर्म
,,	४	कापि	कोपि
,,	८	स्रवि	स्रावि

पृष्ठ संख्या	पंक्तिसंख्या	अशुद्धम्	शुद्धम्
५६	१५	ठाधप	ठाधिप
६०	११	शूदादि	शूद्रादी
६३	१६	णामू	णाम्
६४	१६	विस्तारा	विस्तरा
,,	२३	तासम	तासाव
६६	११	वार्वि	वावि
,,	,,	स्त्रीपुंवि	स्त्रीपुंस
,,	१६	तर्या	पर्या
६७	३	पदा	पदां
६६	२०	प्रहण	ग्रहण
७०	४	विधा	विधा
,,	७	प्रवा	प्रब्र
,,	८	कियते	क्रियते
७२	२५	धाद	धादि
७४	५	बसिष्ट	वसिष्ठ
,,	१७	नन्तरे	नन्तरं
,,	२२	पतौ	पत्यौ
७५	१७	भतु कम्	भर्तृ कम्
,,	२४	मद्धला	मङ्गला
७६	१४	प्रवसरण	प्रसनमरण
,,	१६	शुद्ध	शुद्धि
,,	२७	विवेकः	विवेकः
७७	१६	दारिद्रं	दरिद्रं
७८	६	दाहताः	दाह्रताः
,,	१२	पत्थु	पत्यु

पृष्ठ संख्या	पंक्तिसंख्या	अशुद्धम्	शुद्धम्
,,	१३	सर्वत्र द्वितीया	
,,	१६	गृहीयात्	गृह्णीयात्
,,	२०	विश	विंश
,,	२३	येग्द्रि	येन्द्रि
७६	७	यान्ये	यन्त्ये
,,	२५	मणं	मणं
८०	१	ताभ	ताभि
,,	१०	यर्थासः	यथासः
,,	१२	साङ्गष्ठं	साङ्गुष्ठं
,,	१८	कावि	काऽवि
८१	७	निषेधी	निषेधो
८१	१३	विावदे	विविदे
,,	२२	धाबुक्तं	धात्रुक्तं
८३	२२	निष्कि	निष्क
,,	२५	न्तग्र	न्तरग्र
८५	८	ताम्यं	तम्यं
,,	१४	आप	अपि
,,	१५	धेम	धेन
८७	१	श्पपा	श्वपा
८८	५	दिनभ	दिना भ
,,	१२	कााद	कादि
८६	४	माध	मधि
,,	५	अरत्य	अन्त्य
,,	१५	याग्य	योग्य
६०	१	पञ्च	पाञ्च

पृष्ठ संख्या	पंक्तिसंख्या	अशुद्धम्	शुद्धम्
"	६	यिष्णु	विष्णु
६१	८	पार	पारि
६२	११	श्रम	श्रमं
६३	३	विशये	विषये
"	२५	भसा	सभा
६४	१	सर्व	सर्वं
"	४	वृद्द	बृह
६५	६	हनि	हानि
"	१४	चक्रान	चक्रनि
"	२२	प्रभूतीबामषि	प्रभृतीनामपि
"	२६	हट्ठ	हट्ट
६६	१६	षाभ	षाम
"	२३	पल्क्यः	वल्क्यः
६७	२५	ते नव	तेनैव
६८	१	ऽन्त्यैः	ऽन्यैः
"	२३	सरांस	सरांसि
"	२६	ष्टन्या	ष्टान्य
१००	१८	देहो	देहा
"	२१	सूतो	सूतं
१०१	२	दिरु	दिभिरु
१०२	१	कोऽपि	केऽपि
"	२३	वश्वं	वश्यं
१०३	१५	त्पर्य	त्पर्य
"	२५	कूत	कूप
१०४	१७	विशष	विशेष


पृष्ठ संख्या	पंक्तिसंख्या	अशुद्धम्	शुद्धम्
,,	२१	वल्यक	वल्क्य
१०५	२६	जाना	जानां
१०६	६	दोशो	दोषो
,,	१२	चञ्डा	चण्डा
१०७	५	मस्त्य	मन्त्य
१०८	१	क्षालेन	क्षालनं
,,	,,	करस्य	कांस्य
१०६	४	परी	पुरी
११०	१	मक्षौररोन	मनक्षौररो
,,	२	चााद	चादि
११२	१२	क्षाया	क्षया
११३	१७	वजिते	वर्जिते
,,	२१	पर्यण्य	पर्यस्य
,,	२२	धर्ममेव	र्ध मेव
११४	२	पराह्ले	पराह्ले
,,	२६	निणय	निर्णय
११५	१२	स्यैत्र	स्यैव
११६	१	पुष्का	पुष्क
,,	६	चाण्ड	चारुड
,,	१४	स्मोर्त	स्मार्त
११७	१	ञ्चप	ञ्चयप
११७	४	चााद	चादि
,,	,,	स्पर्शादो	स्पर्शदो
,,	१५	रात्रेणा	रात्रेण
,,	२२	प्रवैश	प्रवेश


पृष्ठ संख्या	पंक्तिसंख्या	अशुद्धम्	शुद्धम्
१२०	८	मगव	भगव
१२४	३	धम	धर्म
,,	१४	अवैाद्	अवैदि
,,	१६	तेषां	तेषा
१२६	२५	थेषा तेतथां	येषां ते तथा
१२७	४	हार	हरि
,,	१८	ग्र्थः	ग्रथः
१२८	१३	दिंज	दिजा
१३०	१	नांशस्य	नाशस्यै
,,	७	कस्य	कारस्य
१३१	६	निष्ठरः	निष्ठुरः
१३३	१	धम	धर्म
,,	६	चोक्त	चोक्तं
१३४	५	दाक्ष	दीक्ष
,,	१०	तुल्म	तुल्य
,,	२४	साद्भन	साद्भिर्न
१३५	१६	दर्म	धर्म
१३८	२६	श्रया	श्रयाः
१३९	१४	साधर	साधार
१४१	३	वर्तन	वर्तने
१४२	२	नैन	नैव
,,	४	धाम	धान
१४४	२५	द्वयम्	त्रयम्
१४५	१६	सर्च	सर्व
१४८	१	चतुदश	चतुर्दश

पृष्ठ संख्या	पंक्तिसंख्या	अशुद्धम्	शुद्धम्
१५३	४	स्त्यैव	स्त्येव
१५६	३	भोनम्	भोजनम्
,,	६	डात्म	डाल
,,	१०	विंश	विंश
,,	११	शुद्धिव्य	शुद्धिर्व्य
,,	१३	ज्जात्ति	ज्जाति
,,	२०	त्त	त्तं
,,	२१	विग	धिग
१५७	१	संसग	संसर्ग
,,	३	किमाप	किमपि
,,	८	याश्चि	यश्चि
१५८	५	नाव	नादि
,,	१६	एत्र	एव
१५९	६	संसत्	संवत्
,,	१८	त्तमेः	त्तमैः
,,	१९	ह्रासो	ह्रासो
१६०	१६	र्द्धव	र्ध्वव
,,	२२	सन्तरा	त्वरा
१६२	८	कृष्ए	कृष्ण
,,	१०	रम्यरा	रम्परा
१६५	१८	ताय	तायाम्
,,	१९	यत	यते
१६६	६	हर्य	हपर्य
,,	१३	संका	संस्का
,,	२१	त्ययसंस्कार	त्यसंस्कारः
१६९	३	पींन्	वींन्

पृष्ठ संख्या	पंक्तिसंख्या	अशुद्धम्	शुद्धम्
१६९	४	श्याक्ष	श्यात्क्ष
,,	१६	ध्याधा	व्याधा
१७०	१	न्यास्थि	व्यवस्थि
१७१	५	क्रोंधं	क्रोधं
,,	१७	सर्प वृत्तं	सर्ववृत्तं
१७२	१	वतते	वर्तते
,,	४	रुमी	रुग्मी
१७३	६	व्यत्यते	व्यत्यये
,,	,,	शाम्यं	साम्यं
,,	७	वलक्व	वल्क्यव
,,	१५	पद्भ्या	पद्भ्यां
,,	१७	क्षत्रिय	क्षत्रिय







॥ श्रीविश्वेश्वरः शरणम् ॥

अखिलभारतवर्षीय—

ब्राह्मणमहासम्मेलनस्य

निर्णयाः ।

कार्तिक कृष्ण ११ गुरौ सम्वत् १९८५

अखिलभारतवर्षीयब्राह्मणमहासम्मेलने

विचारसभायां मध्यस्थानां निर्णयाः ।

प्रथमो विषयः ।

१ अष्टमवयसः पूर्वमेवोत्कृष्टवरलाभे विवाहो नासिद्धः, परन्तु समाजहितदृष्ट्या समाजेन तत्तत्समाजविषये यदि विवाहोऽष्टमवयसः पूर्वं न कर्तव्य इति नियम्यते, तर्हि शास्त्राविरोधादनुमोदनमर्हति, इति महासम्मेलनविचारसभायां सर्वानुमतः प्रस्तावोऽस्माभिरप्यनुमन्यते ।

२ विवाहो ह्यष्टवर्षायाः कन्यायाश्च प्रशस्यते । सर्वेषामेव दानानामेकजन्मानुगं फलम् । हाटकगृहगौरीणां सप्तजन्मानुगं फलम् । अष्टवर्षा भवेद्गौरी—इत्यादिप्रमाणानुसारेण अष्टमवर्षे कन्यादानस्य विशिष्टफलाम्नानात् स्त्रीणां विवाहस्य उपनयनस्थानापन्नत्वेन उपनयने ब्राह्मणानां अष्टमवर्षस्यैव मुख्यकालत्वस्मरणाच्च । ब्राह्मणकन्यानां दशमवयसः पूर्वं विवाहो न कर्त्तव्य इति नियमनं नास्माकमभिमतं, अत ऊर्ध्वं रजस्वलेति वचनेन सर्ववर्णेषु दशमवयसोऽनन्तरं विवाहस्य मुख्यकालत्वनिषेधात् । क्षत्रियादीनां दमशवयसः पूर्वं उपनयनकालाभावेन समाजहितदृष्ट्या विवाहनियमनं तत्तत्समाजेन क्रियमाणं न विरुद्धमिति अस्माभिर्मन्यते । शूद्रविषयेऽपीयमेव व्यवस्था ।

३ उत्तरविधिविषये कुत्रचन द्वादशे वृषली स्मृतेति वचनेन द्वादशवयस्येव वृषलीत्वबोधनेऽपि रजोदर्शनस्यैव वृषलीत्वप्रयोजकत्वात्

दशमवयसोऽनन्तरं ऋतुदर्शनात्पूर्वं मुख्यकालोल्लङ्घनप्रयुक्तप्रायश्चित्तानुष्ठानपूर्वकं आपदि विवाहः कार्यः ।

४ रजोदर्शनानन्तरमपि अविवाहितानां ब्राह्मणस्त्रीणां कृतप्रायश्चित्तानमापि अव्यवहार्यतेति श्रीराजेश्वरशास्त्रिप्रभृतीनां मतं, तत्र वर्षत्रयमध्ये कृतप्रायश्चित्तानामप्यव्यवहार्यतेत्येकं मतं श्रीमल्लादिरामकृष्णशास्त्रिप्रभृतीनां, राजेश्वरशास्त्रिप्रभृतीनां तु वर्षत्रयमध्ये पित्रा दित्सितापि या विवाहं नेच्छति तस्याः कृतप्रायश्चित्ताया अपि अव्यवहार्यत्वं, पितृदोषेणाविवाहितायास्तु पापमात्रं न वृषलीत्वं, वर्षत्रयानन्तरमप्यविवाहितायास्तु न वृषलीत्वस्य प्रायश्चित्तेन निवृत्तिरिति मतम् । वङ्गीयास्तु पितृदोषेणाविवाहितायाः साधारणं पापं, साहसेनाविवाहितायास्तु वृषलीत्वं यद्यपि भवति, तथापि कृतप्रायश्चित्ताया व्यवहार्यत्वं, परित्यागविधिस्तु सर्वथा विवाहविमुखकन्यापर इति वदन्ति । महामहोपाध्यायानां तातसुब्रायशास्त्रिणां विन्ध्येश्वरीप्रसादशास्त्रिणामपि इदमेव सम्मतम् । प्रायश्चित्ते गुरुलघुव्यवस्थाऽपि सुब्रायशास्त्रिभिरङ्गीक्रियते । क्षत्रियविषये तु स्वयंवरस्याभ्यनुज्ञानात् कृतप्रायश्चित्तानां ऋतुदर्शनप्रयुक्तवृषलीत्वस्य निवृत्त्या व्यवहार्यत्वमिति सर्वसम्मतः पक्षः ।

उपदर्शितान् पक्षान् सम्यगालोच्य अस्माभिरित्थं निर्णीयते—धर्मशास्त्रेषु ऋतुमतीविवाहः सर्वात्मना निन्दितः, क्वचित् महत्यामापदि प्रायश्चित्तविधिपूर्वकं तादृश्या अपि विवाहोऽभ्यनुज्ञायते, एवमपि इदमेव व्याजीकृत्य मुख्यकल्पानुष्ठानसमर्थैरपि अयं पक्षो नावलम्बीयः, अस्य पक्षस्यात्यन्तिकापद्विषयत्वात्, आपदि अल्पत्वमहत्त्वनिर्णयस्तु तत्तत्समाजेनैव करणीयः । व्यवहार्यत्वविषये तत्तत्कुलाचारः प्रमाणम् । ऋतुदर्शनानन्तरं सर्वथा साहसेन विवाहविमुखकन्यायास्तु परित्याग एव ।

५ अवान्तरश्रेणीषु विवाहविषये विवाहे कुलपरीक्षणस्यावश्यकत्वात् सह्याद्रिखण्डादौ स्कान्दान्तर्गते अवान्तरजातिरक्षणस्यावश्यकत्वप्रतिपादनात् सह्याद्रिखण्डाप्रामाण्यवादस्यायुक्तत्वान्नागरखण्डे बलीवर्दसमानोऽपि नागर एव ग्रहीतव्य इति व्यवस्थापन्नाच्च गत्यन्तराभावस्य समाजानुमतत्वे सन्निकृष्टतमसमानाचारशीलावान्तरश्रेणीपरिग्रहस्य कर्त्तव्यत्वेऽपि सत्यां गतौ तत्तच्छ्रेणीसम्बन्धनियमपरित्यागः गत्यन्तराभावेऽपि विप्रकृष्टश्रेण्यन्तरपरिग्रहश्च शास्त्राचारोभयाननुमत एवेति मन्यते ।

४।११।२८,

विरूपाक्षशास्त्री,

डि० श्रीनिवासाचारु,

श्रीशशिनाथ झा,

श्रीचण्डीदासन्यायतर्कतीर्थः,

नवद्वीपवासी ।

देवशिखामणि रामानुजाचार्यः,

पूर्वोत्तरमीमांसाभूषणः ।

आदितः पञ्चसु प्रश्नेषु मह्यं विचाराय दत्तेषु प्रथमचतुर्थौ विना यथानिर्णयमभिमताः । प्रथमे तु अष्टमवर्षमारभ्य ऋतुसम्भावनातः पूर्वं कन्याविवाहो युक्तः, चतुर्थप्रश्ने तु वृषल्याः प्रायश्चित्तानन्तरं व्यवहार्य्यता अस्त्येव ।

द० पं० नन्दकिशोरः ।

त्रयोदशप्रश्नविषये मध्यस्थानामभिप्रायः ।

१ आनन्दाश्रममुद्रिता देवलस्मृतिः सम्पूर्णा त्रुटिता वेति सन्दिग्धत्वाच्छूलपाणिनिबन्धव्यवस्थया प्रामाण्यं स्वीक्रियते ।

चतुर्दशप्रश्नविषये मध्यस्थानां आशयः ।

२ अष्टाचत्वारिंशद्वारं अकामत एकामत्रभोजनादिरूपगुरुतरसंसर्गे कृतेऽपि प्रायश्चित्ते न व्यवहार्यता,कामतस्तु उक्तविषये चतुर्विंशति-वाराभ्यासे तथात्वम्। एकपङ्क्त्युपविष्टभोजनादिरूपलघुभोजनसंस-र्गाद्कामतः वत्सरेण, कामतस्तु वत्सरार्धेन अव्यवहार्यता इति भोजनादौ व्यवस्था। तत्स्त्रीगमने तु अकामतः वारद्वयाभ्यासेन, कामतस्तु सकृदेव कृते अव्यवहार्यता। बलात्कारितम्लेच्छदास्या-दिस्थले तु शूलपाण्युद्धृतदेवलवचनानां व्यवस्था स्मार्तभट्टाचार्यै-रनुपनीताष्टवर्षानधिकवयस्कबालकविषयतया कृता। तत्रापि संव-त्सरचतुष्टयानंतरं म्लेच्छसंसर्गे अव्यवहार्यतैव पूर्णा। इदमपि 'तत्स्त्रीणां च तथा सङ्ग' इत्यत्र सङ्गपदेन संलापादिलघुसंसर्ग एव विवक्षितः इत्यभ्युपगम्य। तत्स्त्रीगमने तु 'सवर्णान्यांगताद्दुष्टैः संसर्गः शोधितैरपि' इति कलिवर्ज्यप्रकरणानुसारेण ततः पूर्वमपि अव्यवहार्यतैव। अथ वा। 'संवत्सरेण पतती' त्यनुसारेण बलात्का-रितस्थले मयूखादिनिबन्धकारसंमताकामकृतप्रायश्चित्तयोजनेन संव-त्सरपर्यन्तं बलात् म्लेच्छदास्ये कारिते द्वादशाब्दं प्रायश्चित्तं, व्यव-हार्यता च पूर्णा। संवत्सरद्वयातिक्रमे तु चतुर्विंशतिवार्षिकं प्रायश्चि-त्तम्, अथ पतिताः समवसाय धर्मांश्चरेयु'रित्यादिबौधायनसूत्रस्य नन्दपण्डिताद्युक्तव्यवस्थानुसारेण पृथक्संस्थया स्वधर्मानुष्ठानाधि-कारश्च। वत्सरचतुष्टयातिक्रमे तु 'संवत्सरैश्चतुर्भिश्च तद्भावं सोऽधि-गच्छति। ह्रासो न विद्यते तस्य प्रायश्चित्तैर्दुरात्मनः॥' इति देवल-वचनानुसारेण न प्रायश्चित्तं, नतरां व्यवहार्यता, नतमां च पृथक्सं-स्थयाऽपि स्वधर्माधिकारिता। भागवतादिधर्मानुष्ठानं तु अनुमन्यत एव। 'चतुर्थे नास्ति निष्कृति' रिति वचनमत्र व्यवस्थायामुपोद्ब-लकम्। यत्तु विंशतिवत्सरम्लेच्छसंसर्गानंतरं चान्द्रायणत्रयं प्राय-श्चित्तमुक्तम्, तत्तु 'म्लेच्छैः सहोषित' इत्युपक्रमात् केवलसहवास-

परम्। यत्तु स्त्रीणां विषये देवलेन गर्भोत्पत्त्यनंतरमपि प्रायश्चित्तेन व्यवहार्यत्वमुक्तम्, तत्तु बलाद्दासीकृतनारीरेव उपक्रम्य हेमाद्युद्धृतमार्कण्डेयवचने गर्भे स्त्रीणां परित्यागस्यैवोक्तत्वात् वैकल्पिकम्। विकल्पे च 'बलात्कारादिदुष्टस्त्रीसंग्रहो विधिनोदितः' इति कलिवर्ज्यप्रकरणे पाठात् देवलोक्ता गर्भोत्पत्त्यनंतरमपि स्त्रीणां व्यवहार्यता कलिभिन्नविषय एव इति सिद्धान्तः।

पञ्चदशप्रश्नविषये मध्यस्थानां अभिप्रायः।

३ वैरूप्यमेव।

शास्त्री हाथीभाई हरिशङ्करात्मजः। महामहोपाध्यायः।
श्रीदुर्गाचरणसांख्यवेदान्ततीर्थः। महामहोपाध्यायः।
मैथिल मार्कण्डेय मिश्रः।

भट्ट रमानाथ देवर्षिः शुद्धाद्वैतभूषणः।
नागेशशास्त्री धारवाड, तर्कविद्वान्, विद्यालङ्कारश्च।

अधोनिर्दिष्टानां विषयाणां विमर्शे साधकबाधकानि वचनानि युक्तयश्च सावधानतयाऽऽलोचिताः, अनुकूलप्रतिकूलवक्तॄणां चाशयोऽपि सम्यगवधारितः। ततः परं सर्वेषां ऐकमत्येन यत् सिद्धान्तितं तदधस्तान्निवेश्य ततः स्वसंमतिविषये नामानि निर्दिष्टानि।

श्रीकालीकिशोरदेवशर्म स्मृतिरत्नः।
श्रीआशुतोषदेवशर्मा स्मृतिरत्नोपाधिकः।
श्रीकमलकृष्णस्मृतितीर्थः।
बालशास्त्री हरिशास्त्री भट्टः।

रंगाचार्य बालकृष्णाचार्य रड्डी ।

मल्लादि श्रीरामकृष्णशास्त्री महाग्निचित् ।

चण्डालविषये विचारे तु ते अस्पृश्या देवालयादिषु अप्रवेश्या इति स्मृतिवचनैर्निश्चीयते । तथा ते म्लेच्छयवनाद्यपेक्षया निकृष्टा इति प्रमाणैरेव नास्माभिरङ्गीक्रियते ।

अत्रार्थे संमतयः ।

बालशास्त्री हरिशास्त्री भट्ट इंदुरकर

सम्मतिरत्र द्वारभंगास्थ श्रीमद्रमेश्वरलताविद्यालया-

ध्यापकस्य श्रीमुक्तिनाथ मिश्रस्य ।

रड्डीत्युपाह्वो रंगाचार्यः ।

श्रीआशुतोषदेवशर्मा स्मृतिरत्नः ।

श्रीकमलकृष्णस्मृतितीर्थः भट्टपल्लीनिवासी ।

चाण्डालानां ग्रामान्तर्निवास देवालयप्रवेशः स्पर्शश्च शास्त्रेण निषिध्यते । म्लेच्छा यद्यपि गुणतो धर्मतश्च चण्डालतो निकृष्टाः, तथापि महाभाष्ये अनिरवसितशूद्रेषु परिगणनात् आगमेषु चण्डालापेक्षया देवालयप्राकारेषु सन्निकृष्टकक्ष्याप्रवेशाभ्यनुज्ञानाच्च चण्डालापेक्षया तेषां किञ्चित्तारतम्यं वर्तत इत ममाशयः ।

मल्लादिश्रीरामकृष्णशास्त्री महाग्निचित्

अमरावतीपत्तनम् ।

गुंटूर जिला ।

मद्रास् प्रसिडेन्सी ।

अधुनातनेषु यवनेषु के वा चाण्डालादिषु उत्पन्नाः के वा शुद्ध-यवना इति न ज्ञातुं शक्यते, यदि तदीयस्सङ्करो ज्ञायेत, तदा पूर्वजात्यनुरूपैव व्यवस्था अङ्गीकरणीया ।

पण्डितप्रवरः

मल्लादिश्रीरामकृष्णशास्त्री

अमरावती

गुंटूर जिला ।

१ सावित्रीभ्रष्टानां चतुर्थपुरुषपर्यन्तमेव व्रात्यस्तोमेन शुद्धिः, नाग्रपुरुषाणाम् ।

१ विधवाविवाहस्तु सर्वथा धर्मशास्त्रविरुद्धः ।

१ म्लेच्छचाण्डालादीनां कूपे अल्पजलाशयादिषु जलग्रहणादिषु नाधिकारोऽस्ति ।

१ श्रुतिस्मृत्यनुसारिभिः न कैरपि स्वयं धर्मपरिवर्तनं कर्तुं शक्यते ।

बालशास्त्री हरिशास्त्री भट्ट इंदुरकर

रंगाचार्यः रड्डीत्युपाह्वः ।

सम्मतिरत्र श्रीमुक्तिनाथमिश्रस्य ।

मल्लादिश्रीरामकृष्णशास्त्री महाग्निचित् ।

अमरावती पत्तनम्

गुंटूर जिला

मद्रास प्रेसीडेन्सी ।

१० दशमः प्रश्नः-भागवतधर्मदीक्षा जात्युत्कर्षप्रापिका न वा इति ।
अस्योत्तरम् ।

भागवतधर्मदीक्षया जात्युत्कर्षो न भवति, अपि तु भावोत्कर्षः।

११ यवनादिजातिः कर्मकृतो उत जन्मसिद्धा ।
अस्योत्तरम् ।
जन्मसिद्धैव यवनादिजातिः ।

१२ भागवतधर्मदीक्षायां जातिविशेषः प्रतिबन्धको वा न वा ।
अस्योत्तरम् ।

कुत्रचिद्दीक्षायां प्रतिबन्धिका जातिः कुत्रचिन्न । तथाहि—
मन्त्रमहोदधौ चतुर्विंशतरङ्गे-त्र्यर्णमेकाक्षरोऽनुष्टुप् त्रिविधो नरकेसरी ॥ इत्यादिना कांश्चिदेव मन्त्रान् परिगणय्य 'वर्णत्रयाय दातव्या एते शूद्राय नो बुधैः' इत्यादिना तत्तद्वर्णविशेषे अधिकारानधिकारौ प्रदर्श्य-छिन्नमस्ता च मातंगी त्रिपुरा कालिका शिवः। लघुश्यामा कालरात्रिर्गोपालो जानकीपतिः। उग्रतारा भैरवश्च देया वर्णचतुष्टये । मृगीदृशां विशेषेण मन्त्रा एते सुसिद्धिदाः । ब्राह्मणाः क्षत्रिया वैश्याः शूद्रा नार्योऽधिकारिण इति स्त्रीशूद्रयोरपि केषुचिन्मन्त्रेषु अधिकारः प्रदर्शितः ।

स्त्रीशूद्रयोः शिवमन्त्ररामन्त्रविषये तु विशेषः—सूतसंहितायां नमोंतेन शिवेनैव स्त्रीणां पूजा विधीयते । विरक्तानां च शूद्राणां एवं पूजा प्रकीर्त्तिता । इति । तद्व्याख्याने माधवीये वसिष्ठः—ब्रह्मचारी गृहस्थश्च वानप्रस्थश्च भिक्षुकः । सर्वो नमः शिवायेति शिवमंत्रं समाश्रयेत् । पंचाक्षरः सप्रणवो द्विजराज्ञोर्विधीयते । विट्शूद्रजन्मनां वापि स्त्रीणां निर्बीज एव हि । सबीजः सस्वरः साम्यो विप्रक्षत्रिययोर्द्वयोः । नेतरेषामितीशानः स्वयमेवाह शंकरः । दुर्वृत्तो वृत्तिहीनो वा पतितोऽथान्त्यजोऽपि वा । जपेत्पञ्चाक्षरीं विद्यां जपेनैवाप्नुया-

च्छिवम्। इत्यादीनि वचनानि। राममन्त्रविषये तु शूद्रकमलाकरे 'अगस्त्यसंहितायां-श्रुतिर्ब्रह्माह षड्वर्णं स्मृतिर्वर्णद्वयात्मकम्। षड्वर्णं ब्राह्मणादीनां त्रयाणां यद्द्विवर्णकम्। तदन्येषां देशिकेन वक्तव्यं तारकं परम्। शुचिव्रततमाः शूद्रा धार्मिका द्विजसेवकाः। स्त्रियः पतिव्रताश्चान्ये प्रतिलोमानुलोमजाः। लोकाश्चण्डालपर्यन्तं सर्वेऽप्यत्राधिकारिणः। अत्र रामेतिमंन्त्रे।' इत्यादिग्रन्थपर्यालोचनया शूद्रादीनां प्रणवरहितेष्वेव मंन्त्रेषु नारायणाष्टाक्षरादिषु केषुचित् अधिकारः।

१ विरूपाक्षशास्त्री, २ तातसुब्बरायशास्त्री,

३ देवकीनन्दन शास्त्री दर्शनालंकारः, ४ श्रीनीलाम्बर झा तर्कतीर्थः,

❀ श्रीविश्वेश्वरः शरणम् ❀

अखिलभारतवर्षीयब्राह्मणमहासम्मेलने उपस्थितानां सर्वेषां धर्माचार्याणां निर्णयाः ।



अति हि नाम प्रमोदतेऽन्तरङ्गमस्माकं निष्प्रत्यूहं प्रचलितां अखिलभारतवर्षीयब्राह्मणमहासम्मेलनविचारसभां निरीक्षितवताम् । विरलः खल्वेवंविधस्तत्तत्तंत्रनदीष्णानां विदुषां एकत्र समागमः, विरलतरा च प्राच्यां मर्यादामाश्रित्य क्रियमाणा धार्मिकी चर्चा, विशेषतश्च सौहार्दन । सर्वथा तु भगवतः परेशितुः कृपया सानन्दं निर्वर्तिता विचारसभा । एतत्पुनर्महान्तमानन्दमुपजनयत्यस्माकं यदत्र धर्मपीठगुरूणामेकत्रावस्थानं संपन्नम् । मन्यामहे सोऽयं नव्य एव प्रसङ्ग इति । अतः परं परिचाल्यमाना तु महासम्मेलनपरिषदपि सर्वैः सप्रणयं निरुह्येत, प्रकटीक्रियेत च वास्तवं धर्मतत्त्वं, संपाद्येत च ततः सर्वेषां निरवधिकं श्रेय इत्याशीर्भिरभिनन्दयन्तः स्वं निर्णयमधस्तात्प्रदर्शयामः ।

निर्णयाः—

१, ३, स्त्रीणां विवाहे गर्भतोऽष्टमवर्षो मुख्यः कालः, नवमदशमौ मध्यमौ, तदूर्ध्वं यावदृतुदर्शनं गौणः कालः, ऋतुदर्शनोर्ध्वं तु सर्वथा निन्द्यः ।

२ अष्टमवर्षात्प्रभृति यावदृतुदर्शनं परिस्थित्यनुसारेणाऽपि विवाहनिषेधनियमनं सर्वथाऽयोग्यम् ।

४ वृषलीत्वबोधकवचनानां धर्मकार्यानर्हत्वे तात्पर्यम् ।

५ अवान्तरश्रेणीषु परस्परं विवाहो निन्द्यः ।

६ धर्मज्ञा मन्वादयः, तेऽपि स्वातन्त्र्येण किमपि धर्मपरिवर्तनं कर्तुं न प्रभवन्ति ।

७ त्रैवर्णिकविधवाविवाहः, दम्पत्योर्विवाहमोक्षश्च सर्वथा निषिद्धः ।*

८ म्लेच्छचाण्डालादीनामस्पृश्यत्वं जातितः, तद्भावापन्नानां च कर्मतः ।

९ धार्मिकदृष्ट्या इदानीन्तनम्लेच्छानां चाण्डालानां चास्पृश्यत्वं देवालयसभादिप्रवेशानर्हत्वं तद्भाण्डसंस्पृष्टकूपोदकग्रहणस्यायोग्यत्वञ्च सर्वथा शास्त्रेणानुशिष्यते, तत्तु रक्षणीयमेव ।

१० मन्त्रग्रहणादिरूपभागवतधर्मदीक्षा एतस्मिन् जन्मनि उत्कृष्ट-जातिप्रापिका न भवति ।

११ यवनादिजातिर्जन्मसिद्धैव ।

१२ प्रणवरहितेषु केषुचिन्नाममन्त्रेषु जातिविशेषो न प्रतिबन्धकः (सर्वे धर्माचार्याः) । विशिष्टविधिविषयान्मन्त्रान्मुक्त्वा अन्यत्रप्रतिबन्धक एव (तेङ्गलेसम्प्रदायिनः श्रीवैष्णवाः) ।

१३ शूलपाण्याद्युक्तव्यवस्थानुसारेण देवलस्मृतेः प्रामाण्ये च किञ्चि-द्बाधकम् ।

१४ बलाद्दासीकृतस्य म्लेच्छादिसंसर्गे त्रिवर्षपर्यन्तं मन्वाद्युक्तव्यव-स्थाऽविरोधेन प्रायश्चित्तेन शुद्धिः सर्वनिबन्धकाराविरुद्धा । कामतो म्ले-च्छस्त्रीगमने सकृत्कृतेऽपि पातित्यम् । एकामत्रभोजनरूपगुरुतरसंसर्गे कामतश्चतुर्विंशतिवाराभ्यस्तेऽपि पातित्यमेव । एकपंक्त्युपविष्टभोज-नादौ तु कामतः कृते संवत्सरेण पतति ।

१५ पूर्वोक्तस्थलेषु निर्दिष्टतत्तदवध्युत्तरं तु कृतेऽपि प्रायश्चित्तेऽव्यव-हार्यतैव । तथा विदेश (विलायत) प्रत्यागतेष्वपि ।

१६ व्रात्यसंस्कारस्त्रिपुरुषपर्यन्तं प्रशस्तः ।

१७ चातुर्वर्ण्यं जन्मसिद्धमेव, न तु तज्जन्मीयकर्मकृतम् ।

॥ इति ॥

---

* सर्वथा निषिद्ध इत्यनेन शूद्रेष्वपि विधवाविवाहस्य निन्द्यत्वं बोधितमिति सम्मेलन एवोद्घोषितमपि ।

सर्वेषां धर्माचार्याणां एतद्विषयाणि महानुशासनपत्राणि परस्ता-त्प्रकाशयिष्यन्ते ।

श्रीविश्वनाथो विजयतेतराम् ॥

अखिलभारतवर्षीयब्राह्मणमहासम्मेलनाङ्गभूतविचारसभायां—

स्वस्ति श्रीमत्समस्तसुरवृन्दपूजितपादारविन्द शिवप्रतिबिंबवर्य-श्रीमत्परमहंसपरिव्राजकाचार्य-पदवाक्यप्रमाणपारावारपारीणयमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाध्यष्टाङ्गयोगानुष्ठाननिष्ठतपश्चक्रवर्त्यनाद्यविच्छिन्नगुरु-परंपराप्राप्तषड्दर्शन-संस्थापनाचार्य-व्याख्यानसिंहासनाधीश्वर-सकलनिगमागमसारहृदयसांख्यत्रयप्रतिपादकसकलनास्तिकमतोच्छेदपूर्वकसकल-धर्मसंस्थापनैकधुरीण-वैदिकमार्गप्रवर्तकसर्वतंत्रस्वतन्त्र-श्रीमहाराजधानीऋष्यश्रृङ्गपुरवराधीश-श्रीमद्राजाधिराजगुरुमण्डलाचार्य-श्रीमच्छङ्कराचार्यान्वयसञ्जाताभिनव-पञ्चगङ्गातीरवासकमलानिकेतनकरवीरसिंहासनाधीश्वरश्रीसच्चिदानन्दविद्याशंकरभारती-करकमलकिंजल्कोद्भव-श्रीमदभिनवसच्चिदानन्दविद्यानरसिंहभारतीस्वामिचरणानां—

प्रास्ताविकमभिभाषणम् ।

यस्याऽऽहुरागमविदः परिपूर्णशक्ते—
रंशे कियत्यपि निविष्टममं प्रपञ्चम् ।
तस्मै तमालरुचिभासुरकन्धराय
नारायणीसहचराय नमः शिवाय ॥ १ ॥

अहो महानयमस्माकमानन्दहेतुः, यदद्य भगवतो जगदीश्वरस्य श्रीविश्वनाथस्य राजधान्यामस्यां वाराणस्यां राज, महाराज, विद्वद्वर, पौरजानपद, श्रेष्ठि, धनिक, भौरिकप्रभृतिभिः साम्प्रतं सर्वत्र विवादविषयान् धार्मिकान् विषयान्निर्णेतुमखिलभारतवर्षीया ब्राह्मणमहासभा सोत्साहं निर्वर्त्यत इति । नूनमेष कालः कलितकोलाहलः कलिः । अत्र हि

वैदेशिकवैदुष्यविमोहितान्तरङ्गाः प्रायेण भारतवर्षीयाः स्वं सनातनधर्म-कल्पद्रुमं पङ्कावमर्दमवमृद्नन्तो नाऽवबुध्यन्ते आत्मनोऽवनतिगर्तं पतनम्।

विरलान्येव किलेदानीं संदृश्यन्तेऽग्निहोत्रादीनि कर्माणि। संध्यापि ननु क्वापि कोणे विलीनेव तिष्ठति, दूरे पुनः श्रौतकर्मणां कथापि। नामान्यपि न श्रूयन्ते शमदमादीनाम्। क्व जपः? क्व तपः! सर्वत्र वैदेशिकाचारानुकरणमेव परमपुरुषार्थः संवृत्तः। सर्वोऽपि सर्वथा परि-जिहासति नियन्त्रणामात्रफलकं मन्यमानो धर्मम्। आश्रयते हेतुवा-दान्। विनिन्दति वेदशास्त्राणि। कुत्सयति वैदिकानाचारान्। नाद्रियते गुरून्। जुगुप्सते शिखासूत्रयोरपि धारणात्। सर्वथा गलहस्तयति गौ-रवमार्यावर्तस्य।

आसीत्कोऽपि तथाविधः समयो भारतवर्षस्य, यत्र चत्वारोऽपि वर्णाः प्राणेभ्योऽपि गरीयांसं धर्मं मन्यमानास्तत्परिपालनायैव समग्रमायुर्हापयन्तः परां किल काष्ठां समुन्नतेरध्यगच्छन्। तेऽपि ननु प्रत्यपीपदन् दुरूहतमानि तत्त्वरत्नानि। व्यवारिषुः परगम्भीरां भगवतीमकृत्रिमां वाचम्। आचेरुः परमपावनानि शुभोदर्काणि कर्माणि। चेरुर्विमानैः। आनैषुः स्वर्गङ्गामपि धरणीतलम्। चुलकयाञ्चक्रुर्गम्भीरमप्यम्भोधिम्। व्याहार्षुर्दिवौकसामपि समाजेन। साक्षाच्चक्रुस्तास्ता इष्टदेवताः। व्यज्ञासिषुस्त्रैकालिकं वस्तुजातम्। आसादयंश्च दिगन्तविसृत्वरं निर्म-लतमं यशःपटलम्। अन्ते च समपीपदन् निखिलपुरुषार्थमूर्द्धन्यं निश्रेयसम्। अत एव आदर्शभावमुपदेशकपदवीं चाऽध्यगमन् अखण्डस्य भूमण्डलस्य भारते लब्धजन्मानो ब्राह्मणाः।

यथाऽऽह मनुः—

'एतद्देशप्रसूतस्य सकाशादग्रजन्मनः।
स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः' ॥ इति ॥

अयि भोः, विमृश्यतां युष्माभिः, कुतो नु नाम एतावान् पराक्रमः प्राचाम्! तेऽपि खल्विदानीन्तना इव मातृगर्भसंभूता एव। तेषामप्य-

स्माकमिव एकादशैवेन्द्रियाणि । न वयं निपुणमपि निरीक्षमाणाः बहिः कमपि विशेषं तेषु निर्वर्णयामः । तत्केन वाऽत्र निदानेन भाव्यम्? यद्येतत् सूक्ष्मं विमर्शपदवीमारोप्येत, तदा इदमेवोत्तरं समधिगम्येत यत्-धर्मानुष्ठानसापेक्षैव बभूव तेषां सिद्धिरिति । कां हि नाम योग्यतां न प्रसुवीत आस्माकोऽयं सनातनो धर्मः? अत एव प्राऽऽह भगवती श्रुतिः— 'धर्मे सर्वं प्रतिष्ठितम्' इति ।

एष पुनर्वैदिको धर्मः—समयपरिपाकात् सांप्रतं सर्वैर्जनैर्बहुधा यथाभिलाषमुत्प्रेक्ष्यमाणः कीदृशीं वा दयनीयां दशामनुभवतीति नैतद्विवरीतुमावश्यकम् । ईदृशेऽपि विषमतमे समये यदत्रत्या धर्मधूर्वहा भूपालाः, पंडितोत्तंसाश्च धर्मयाथात्म्यमवबुभुत्सवः सभामिमामध्यवीविशन्, यच्च तत्र कलिमलकलिलस्यास्य धरित्रीवलयस्य समुद्दिधीर्षया कैलासतः कृतावतारेषु समुद्धृतभूभारेषु कृपापारावारेषु परमशिवश्रीमदाद्यभगवत्पादाचार्यवर्येषु परमं कार्तज्ञ्यमावहन्तः तदीयपीठदेवतया प्रयुक्ता आशिषः समभिलष्यन्तः अस्मानिह उपस्थातुं व्यजिज्ञपन् । यश्चाऽयमघटिष्ट आशीःप्रदानस्य सुयोगः, सोयं समुदितः सर्वोगुणगणः अतिहि नाम धिनोत्यन्तरङ्गमस्माकम् ।

अवश्यमेवंविधाः समितयः भूकैलासायमानेऽस्मिन् काशीक्षेत्रे पुनः पुनरधिवेशनीयाः । एतद्धि अविमुक्तक्षेत्रं प्रणयमंदिरं भगवतो निखिलजगन्नायकस्य चन्द्रमौलेः, क्रीडागारमिदं भक्तपोषणधृतव्रताया भगवत्या अन्नपूर्णाम्बायाः, पतिकुलमेतद्भगवत्याः पापत्रयतापत्रयनिबर्हणगृहीतदीक्षायास्त्रिपथगामिन्याः, आवासोऽयं सर्वदेवानाम्, आकरोयं विविधविद्यानाम्, आश्रयोऽयं ब्रह्मनिष्ठानाम्, निधिरयं पंडितरत्नानाम्, तिलकमिदं भूदेव्याः, मेरुरयं क्षेत्रमणीनाम्, मातृकुलमिदं श्रोत्रियाणाम्, आधारोऽयं कर्मयोगस्य, अंतःपुरमिदमुपासनादेव्याः, विहारभूरियं ज्ञाननिष्ठायाः, अतएव मन्यामहे समुल्लसत्यत्र मूर्तिमती ज्ञानवापी । सर्वथा समुचितमिदं स्थानमेवं विधानां धार्मिकविचाराणाम् ।

धर्मः पुनरवश्यं विचार्यो भवति, ज्ञातव्यतया अनुष्ठातव्यतया च, न पुनः कदापि परिवर्तनीयतया, अलौकिकोह्यसौ धर्मो भवति। नाऽयं प्रमाणान्तरगोचरतामवगाहते । न खलु चिरं विमृशन्नपि सूक्ष्ममतिरपि तर्ककुशलोऽपि स्वर्गयागयोः साध्यसाधनभावं प्रतिपद्यते कश्चित् । सहि भगवता आम्नायेनैव प्रतिपत्तव्यः । श्रुतिर्हि परमं प्रमाणम् । तदविरोधिनी स्मृतिः, तदविरोधी च शिष्टाचारः प्रामाण्यमधिगच्छति । न पुनः कस्याश्चिद्व्यक्तेः स्वोत्प्रेक्षा प्रमाणभावमापद्यते । प्रतिपुरुषं किल सा भिद्यते । प्राच्यैःस्मृतिप्रणेतृभिरपि ऋषिभिः न किमपि धर्मतत्वं स्वोत्प्रेक्षया प्रतिष्ठापितम् । अपि तु दीर्घतरेण तपसा भगवन्तं जगदीश्वरमाराध्य स्वतःसिद्धश्रुतिवचनानामेव तात्पर्यं तत्तद-धिकारिभेदेन उद्घाट्यतेस्म । किंभूयसा ? भगवान् परमेश्वरोऽपि गत-कल्पीयं वेदमनुस्मरन् तदीयां मर्यादां प्रचारयति परिपालयति च ।

यत्पुनर्युगांतरीयधर्माः कलियुगे वर्ज्यतया व्यपदिश्यन्त इत्येतावतैव धर्मस्य परिवर्तनं सांप्रदायिकमिति केषांचिद्धर्ममुग्धानामाकूतम् । सोपि व्यामोह एव । न कदाचिदपि प्राञ्चो महर्षयः धर्मं वा तद्बोधकं शास्त्रं वा पर्यवर्तयन् ? किंतु समानबलत्वेन विकल्पबोधकानां श्रुति-वचसां युगभेदेन देशभेदेन अधिकारिभेदेन च व्यवस्थितत्वं प्रादर्शयन् । नैतत्परिवर्तनं अपि तु व्यवस्थापनम् । तदपि ननु अपरोक्षीकृतमोक्षतत्वैः परोद्दिधीर्षामात्रकृतपराग्व्यवहारैः भ्रमप्रमादादिदोषविधुरैः श्रुतिदेवी-हृदयवेदिभिः मनुयाज्ञवल्क्यभृतिभिर्महर्षिभिरेव कार्यम् , नैव पुनर्मितं-पचमतिभीरागद्वेषविषूचिकाविलिप्तहृदयैः प्राकृतैः । तस्मान्न जातु धर्मस्य वा शास्त्राणां वा परिवर्तनं न्याय्यं श्रेयस्करं वा। अतएव भगवान् कृष्णद्वैपायनः महाभारतान्ते उद्घुष्यति–'धर्मो नित्यः सुख-दुःखेत्वनित्ये' इति । ईश्वरोऽपि—

'श्रुतिस्मृती ममवाज्ञे ते उल्लङ्घ्य प्रवर्तते ।
आज्ञाभङ्गो मम द्रोह' इत्याचष्टे ।

यद्यन्वमंस्यत परिवर्तनं धर्मस्य तदा—

'न जातु कामान्न भयान्नलोभाद्धर्मं त्यजेज्जीवितस्यापि हेतोः' इति, 'आज्ञाभङ्गो ममद्रोह इति वा नाभ्यधारयत् वेदव्यासो वा भगवान् वा। परिस्थित्यनुरोधेन परिवर्तनीयत्वापातेन धर्मत्यागस्य आज्ञाभङ्गस्य वा निषेध्यत्वं नैव सामंजस्यमश्नुवीत। तस्मान्नाणवपि संशयितव्यं यत् 'रूपांतरमापादयितुं शक्यते धर्म' इति। तर्हि किमर्थोऽयमेतावान् सभाधिवेशनप्रयासः इति नूनमाशंकेरन् भूयांसः। नैतच्चोद्यमवतरति—सांप्रतं हि सर्वत्रैव संस्कारकंमन्यैः कामकारमात्रप्रवृत्तैः कैश्चिदुत्प्रेक्ष्यमाणान् शास्त्रवचसामपार्थान् दूरीकृत्य समालोचयितुमावश्यकोऽयमारंभः।

अन्यथा धार्मिकोपि कर्तव्याकर्तव्यमजानन् किंचिदेव प्रतिपद्यमानः पुरुषार्थात् प्रतिहन्येत, अनिष्टं च प्राप्नुयात्। अतः श्रुतिस्मृतिसदाचारानुरुध्य प्राचीनपरंपरया धर्माचरणस्य विशुद्धतमत्वदृढीकरणमेव मन्यामहे सांप्रतं विचारपदव्यपदेश्यमिति।

अनया च सभया स्फोर्यतां सनातनधर्मस्य गौरवम्, जोघुष्यतां श्रुतिस्मृतिशिष्टाचाराणां प्रामाण्यम्। स्थाप्यतां प्राचीनाचारस्य विशुद्धतमत्वम्। आधीयतां भारतीयानां मनसि दृढतमा आस्तिक्यबुद्धिः। प्रचार्यतां सर्वत्र वर्णाश्रमधर्मानुष्ठानम्। एतत्प्रवर्तकाः गोब्राह्मणपरिपालनैकधुरीणाः श्रीकाशीमंडलाधीशश्रीमदर्भंगाधीशप्रभृतयो महाराजाः तत्तद्देशतः समागता अत्रत्याश्च सर्वे वैदिकश्रेष्ठाः पंडितोत्तंसाः, अन्ये च पौरा जानपदाश्च, किं बहुना सर्वेपि भारतीयाः शिष्यनिवहाः परमादरपुरःसरं स्वं स्वं धर्ममनुतिष्ठन्तः भगवति परमेश्वरे निरतिशयां भक्तिमावहन्तः सपरिग्रहाः इह पुरुषायुषं सुखं नंदन्तः पारमेश्वरपदप्राप्त्यधिकारमासादयन्त्विति अनवरतं सादरं श्रीशारदाचंद्रमौलीश्वरदिव्यचरणारविंदयोः प्रार्थयामहे।

इति शिवम्।

॥ श्रीहरिः ॥

'श्रीवेदव्यासविष्णुस्वामिसंप्रदायसमुद्धारसंभृतश्रीपुरुषोत्तमवदनावतारसर्वा-
म्नायसंचारवैष्णवाम्नायप्राचुर्यप्रचारश्रीबिल्वमङ्गलाचार्यसाम्प्रदायिका-
र्पितसाम्राज्यासनाऽखण्डभूमण्डलाचार्यवर्यजगद्गुरुमहाप्रभुश्रीम-
दाचार्य' इतिविद्यानगरनरपतिश्रीकृष्णदेवसमर्पितबिरुदावली-
विराजमानश्रीश्रीजगद्गुरु १०८ श्रीमद्वल्लभाचार्यचरण-
प्रधानपीठस्थगोस्वामितिलकात्मजविद्यासुधाकरश्री
१०५ श्रीमद्गोस्वामि चि० **श्रीदामोदर-**
लालजीमहोदयानां वाराणसेय-
ब्राह्मणमहासम्मेलने

भाषणम्

नमो भगवते तस्मै कृष्णायाऽद्भुतकर्मणे ।
रूपनामाविभेदेन जगत् क्रीडति यो यतः ॥

नमो नमस्तेऽस्त्वृषभाय सात्वतां
विदूरकाष्ठाय मुहुः कुयोगिनाम् ।
निरस्तसाम्यातिशयेन राधसा
स्वधामनि ब्रह्मणि रंस्यते नमः ॥

अयि श्रीमन्तः सनातनधर्मसदाचरणसमाचरणप्रवणमनसः सद्गु-
णगणविस्ताराः सभास्ताराः !



श्रीमच्छुद्धाद्वैतसम्प्रदायाचार्य तिलकायित श्रीनाथद्वाराधिपति श्रीमद्गोस्वामितिलकात्मज
श्री १०८ दामोदरलालजी महाराजाः ।

सुविदितमिदं श्रीमतां यज्जगत्प्रणयनाभ्युदयविलयविधायिना भगवता मनसाऽप्याकलयितुमशक्यमिदमशेषभुवनभवनं लीलयैवाविर्भावितम्, स्वनिःश्वसितभूताः सकलधर्मप्रदर्शनादर्शाः स्वात्मरूपाः स्वैकप्रमाणा अपौरुषेय्यः सर्वाः श्रुतयस्तदुपबृंहका ब्रह्मसूत्रपुराणादयो नानागमाश्च प्रादुर्भावयाञ्चक्रिर इति। येषामनुभावेन सनातनमर्यादां निःशेषयितुं सवेगमापतन्तो रक्षोनिर्विशेषाः केचन सद्यस्तरामुच्चात्स्यन्ते। एवमपि कृते स्वस्य परोक्षतया बलवद्भिराक्रमिते स्वनिर्मिते परमप्रमितेऽभिमते "परित्राणाय साधूनाम्" इति स्ववचः सत्यापयितुं प्रदर्शयितुं चानन्ताद्भुतमहिमानं तेनैव भगवता कलितनिजजनविस्ताराः स्वावताराः प्रदर्शयाञ्चक्रिरे। येषां च निरुपमान्यनन्यशक्यानि निखिलजगज्जेगीयमानानि तानि तानि लीलायितान्यद्यापि प्रथन्ते। पुनरपि दुःसमयाभ्युदयतस्तमेव स्वस्वरूपभूतं धर्मस्वरूपमन्यथयितुं प्रयतमानेषु केषुचन दुर्जनयातुधानेषु स्वस्वरूपाणि तत्तदाचार्यरूपैराविष्कृत्य निःशेषितमखिलमन्धतमसम्, विकासितानि सकलानि दिग्वधूवदनानि, सुदूरमुत्क्षिप्तानि मृदितानि दग्धानि निःशेषितानि च निगमागमकण्टकानि। भगवत्स्वरूपभूतैस्तैस्तैः श्रीमदाचार्यैः सद्विद्यया जन्मना च वंशोऽधिवसुधातलमविच्छिन्नः प्रकटितोऽद्यापि यथावत् स्वचिधित्सितमापादयन् गोपायति तमेव महासेतुम्।

अथ कतिपयेषु गणनामात्रेषु गणरात्रेषु, तमस्विन्यां देवयोनिविशेषा इव, भूयोऽपि भीषयन्तो भगवज्जनानतितरां बाधमानाः केचन विप्लावयन्ति महामर्यादाः। दुर्दैवमेवैतादृशमाधुनिकानां जनानां यद्दूरीकृता अपि सन्निकृष्यन्ते महान्तोऽन्तरायाः। हन्त तेषां बलीयस्त्वम्, येन ते शान्तिकपौष्टिककर्मभिर्न शाम्यन्ति, प्रत्युत सन्निदधते रूपसहस्रैः। सहजसमवदातमपि पश्यन्ति केचिदन्यथारूपं शङ्खम्, मरुमरीचिकास्वपि प्रतिपादयन्ति जलतरङ्गोल्लासम्, सर्वथा विभ्राजमानेषु सद्भिराचर्यमाणेषु निगमाचारेषु स्वप्रतिभासमुन्मेषेण मनसि समुद्गतैर्यत्किञ्चित्तर्कैः

शारदनिशाकरसमुल्लसदमलज्योत्स्नायामकालजलदानिव दोषानुद्भावयन्तः स्वं विख्यापयन्तः किमप्युद्धतं परिक्रामयन्ति । हन्त ! मिथः कृतकलेः कलेः सर्वमुज्जृम्भितमेतत्—येन ते "येन यातः पिताऽस्माकम्...
..." इत्यादि जानन्तोऽपि दुर्विधिना, निधिना महापदाम्, तथा विदधति दुष्कृतचेष्टितानि चेष्टितानि, यैरपचीयन्ते सनातनाः सदाचाराः, विभिद्यन्ते पुरातनाः सेतवः, निश्छिद्यन्ते सरसानि सदाश्रयभूतानि महोपवनानीव सतामाचरणानि । मिथो निगमागमेषु तथा विवाद उद्भाव्यते, येन भवन्ति निःशेषिताः सुकृतसम्पदः सामान्यतः सर्वेषामेव, विभिद्यन्ते स्वयूथ्यानामपि मनांसि, अपरा इव क्रियन्ते मुग्धमनसामन्तःकरणभूतयः । प्रकृत्यैव कराले कालेऽस्मिन् धर्मतः पराङ्मुखी प्रायः प्रवृत्तिः; सा च बलवती क्रियते मेधाविभिः स्वोपज्ञनानाकुतर्कसम्पर्केण । "अयन्तु युगधर्मो हि वर्त्तते कस्य दूषणम्" इति नयमवितुमिव दूरतो भवति दयालुरपि जगतामधिपतिः, न शृण्वन्ति प्रभविष्णवोऽपि दीनानामाक्रन्दितानि, साधनान्यपि देशकालादिपरिवर्त्तनतो न किमपि साधयितुं शक्नुवन्ति । विविधमतानि प्रजानां रात्रिन्दिवमाकर्णयतो भारतसम्राट्प्रतिनिधेरपि वास्तविकवस्तु निर्णेतुं मन्यामहे नाऽञ्जसाऽध्यवस्यति धीः । यदि नियामकस्याऽस्य किञ्चिदन्यदेव भासेत, तर्हि परामृतमेव सर्वमभीप्सितं स्यात् भारतवर्षीयधार्मिकाणाम् ।

एवं स्थिते किमत्र विधीयतामिति सुचिन्तितेऽपि, मनसः समाधिषु बध्यमानेष्वपि, कायिकवाचिकव्यापारेषु प्रवर्त्तितेष्वपि परस्सहस्रेषु, न किमपि फलं भवति दृशोः पुरतः । अपि तु महाप्रासादं चिकीर्षतामुपरि धारासम्पाता इव महान्तोऽन्तरायाः शिरसि निष्पतन्त्यस्माकम् । संप्रति हृदयतो विवसति स्म प्रायः सर्वेषामधर्मतो ग्लानिः, परिवृत्तानि विशुद्धानि मनांसि, विपर्यस्तान्याचरणानि । एवमेव प्रवर्त्तमाने चक्रेऽस्मिन्नचिरादेव सर्वमपि नामशेषमिव स्यात्सद्धर्मविस्फूर्जितम् ।

तदत्र "संघे शक्तिः कलौ युगे" इति न्यायेन सम्भूय समुत्थानं साम्प्रतं साम्प्रतम् । विशेषतोऽस्यां श्रीवाराणस्यां सदाचरणपरायणैर्महाविद्वद्भिरग्रतो भूत्वा परिमाणातीतैः परिश्रमैः परतरैश्च प्रमाणैस्तथा संप्रति संसाध्यते यथा सुचिरमबाध्यमानो नूनं भवमहोदधौ निमज्जतो जनान् परे पारे प्रापयेत्; स्वयमवसाययितुमक्षमाणाम्, अपगतचक्षुषां चक्षुर्ज्योतिर्लाभ इव अपरिश्राम्यतामपि मिततरमतीनां शास्त्रतलगतमपि वस्तु प्रत्यक्षयेत्, दुरामयविप्लुतमनसामासन्नसमवसानानामपि जीवातुरिव स्यात् । निर्णये हि यानि व्यक्तार्थानि वचनानि न तानि बाध्यन्ते तर्कादिभिः, अव्यक्तार्थानि साधारणवचांस्यपि स्वप्रतिभाप्रकटनमात्रं परिहाय शास्त्रपद्धत्यैव संगमनीयानि । इदमेवास्मदभीष्टम् । इयदवधि समवधाय पर्यालोच्यमाने न शास्त्रविरोधि किमपीहादृश्यतेति मदीया मतिः । इतः परमभिमतसाधनं तु केवलं भगवत्कार्यमेव । उक्तं च केनचिदन्यापदेशेन—

एतावत्सरसि सरोरुहस्य कृत्यं
भित्त्वाम्भः पयसि विनिर्गमो बहिर्यत् ।
आमोदो मधुकर इन्दिरानिवास-
स्तत् सर्वं दिनकरकृत्यमामनन्ति ॥

साम्प्रतिको व्यतिकरस्तु मर्षणीय एव । युक्तं चैतत् । उक्तं हि महाकविना श्रीभारविणा—

स्पृहणीयगुणैर्महात्मभिश्चरिते वर्त्मनि यच्छतां मनः ।
विधिहेतुरहेतुरागसां विनिपातोऽपि समः समुन्नतेः ॥ इति ।

अनुमिनुमो यदद्यसैव सकलसंपत्प्रत्यक्षकरः प्रशस्ततमः कालः, तपर्तुपरिपूर्त्तिपरिक्लिष्टानुज्जीवयितुमभिनवप्रावृषिकपयोधरोदय इव, दुरा-

धिव्याधिविलये सुखसंपत्तिरिव, जडतान्धतापगमे विज्ञानमयचक्षुरुन्मीलनमिव, दारिद्र्यदशापगमे निधिलाभ इव नियतं समुदेष्यति ।

महासभयाऽनया सुबहुसंख्यावतः संख्यावत एकीकृत्य महापरिश्रमैर्बहुना धनव्ययेन च विधीयमानमेतादृशं सुमहत् कार्यमग्रतः फलतः सुसंपन्नं भूयादिति चराचरगुरुं परमदयालुं श्रीगोवर्धनदेवं प्रार्थयामहे ।

इति शम् ।

॥ श्रीमते रामानुजाय नमः ॥

अखिलभारतवर्षीयब्राह्मणमहासम्मेलनाङ्गभूतविचारसभायां—
श्रीमद्वेदमार्गप्रतिष्ठापनाचार्यैः, उभयवेदान्तप्रवर्तकाचार्यैः, शान्तिशमदमाद्यनन्तकल्याणगुणगणभूषितैः, श्रीमत्परमहंसपरिव्राजकाचार्यैः, श्रीसंयमिसार्वभौमशासनाधिगतश्रीयदुगिरियतिराजसंपत्कुमारसर्वविधकैङ्कर्यधुरंधरैः, श्रीभगवद्रामानुजसिद्धान्तनिर्धारणसार्वभौमैः, श्रीभगवद्रामानुजाचार्यनिरवधिकपरमानुग्रहसमधिगतश्रीयदुगिरियतिराजमठपरिवृढिमालंकर्मीणैः, श्रीमद्यतीन्द्रप्रवणसत्संप्रदायनिष्ठागरिष्ठैः, श्रीयदुगिरियतिराजसंपत्कुमाररामानुजसंयमिसार्वभौमैर्नारायणस्मरणपूर्वकं समनुगृहीतं—

प्रास्ताविकमभिभाषणम् ।

प्रकृतिपुरुषकालव्यक्तमुक्ता यदिच्छां
अनुविदधति नित्यं नित्यसिद्धैरनेकैः ॥
स्वपरिचरणभोगैः श्रीमति प्रीयमाणे
भवतु मम परस्मिन् पूरुषे भक्तिभूमा ॥

सर्वदा सर्वकार्येषु नास्ति तेषाममङ्गलम् ।
येषां हृदस्थो भगवान् मङ्गलायतनं हरिः ॥

तस्मै रामानुजार्याय नमः परमयोगिने ।
यः श्रुतिस्मृतिसूत्राणामन्तर्ज्वरमशीशमत् ॥

दैवी वाक् ब्राह्मणश्च ।

"एकाक्षरां द्विपदां षट्पदां च वाचं देवा उपजीवन्ति विश्वे ।
वाचं गन्धर्वाः पशवो मनुष्याः वाचीमा विश्वा भुवनान्यर्पिता ॥
सा नो हवं जुषतामिन्द्रपत्नी" ॥

"अतिक्रान्तसुखाः कालाः प्रत्युपस्थितदारुणाः ।
श्वःश्वः पापीयदिवसाः पृथिवी गतयौवना" ॥ (भगवतो व्यासस्य)

अपि नाम स कालः पुनरस्मानुपसीदेत् । यस्मिन्नः पूर्वे पुरुषाः दैवीं वाचमुपचिन्वन्तः उभयतो लोकानामविप्लुतवृत्तय आसन् ।

हन्त हन्त तेऽपि गताः, सापि गता, सोऽपि गतो गह्वरम् । अपि नाम निरन्वयो विनाशः सर्वेषाम् ? शान्तं पापं शान्तं पापम् । अब्रह्मण्यमब्रह्मण्यम् । ननु जीवाम एव वयं तेषामृषीणां वंशे लब्धजन्मानः अमुकशाखाध्यायिनोऽमुकचरणा अमुकप्रवरा इत्यादि ।

सापि जीवति वाक् । यया प्रकृतिप्रत्ययशुद्ध्या आत्ययिकेषु आभ्युदयिकेषु च संस्क्रियामहे । सोऽपि जीवत्येव कालः । यो नः पूर्वपुरुषान् स्मारयन् त्रिभिः क्रमैरतीतागामिवर्तमानैरावर्तयति जगदिदम् ।

एवमिमे सन्मूलाः सदायतनाः सत्प्रतिष्ठा अप्यक्षेत्रज्ञा इव उपर्युपरि सञ्चरन्तोऽपि न बिन्दामस्तमर्थम् । न कुलाभिमता वृत्तिः । अतः सर्वाप्यहितापायबहुला गतिः । न स्वधर्मे समीक्षा । कुतः सा पराशराद्युपसत्तिः ।

यद्यपि—"अङ्गादङ्गात्सम्भवसि हृदयादधिजायसे ।
आत्मा वै पुत्रनामासि स जीव शरदश्शतम्" ॥

इत्याशिषा वर्धिता उत्तरोत्तरं जीवामः । अपि चोपतिष्ठामहे भगवन्तं कं साक्षिणं सूर्यम् "पश्येम शरदश्शतं, जीवेम शरदश्शतं, नन्दाम शरदश्शतं, मोदाम शरदश्शतं, भवाम शरदश्शतं, शृणवाम शरदश्शतं, प्रब्रवाम शरदश्शतं, अजीताः स्याम शरदश्शत"मिति । तथापि दूरदर्शिनोऽन्य एव कूटस्था ऋषयः । अन्यैव सा श्रुतिसुभगा सरस्वती । अपर एव सुकृताविर्भावः कालः । विचित्र एव साम्प्रतिकः परिवर्तः ।

यतो व्यलीकदर्शिनी नो दृष्टिः । रुशती च सा वाक् । प्रवृद्धकलिरयं कालः । विशेषतश्च विधर्मणि वैदेशिके वर्णतः परं विशदे कृत्यतः कालकूटे छद्मप्रहारिणि अस्मद्भाग्यविपर्ययदुर्दैवदत्तबले साम्प्रतं प्रभविष्णौ विप्लवे सर्वतः समास्कन्दति, वज्रादिवाभिहन्यमानं दीर्यत इव सहस्रधा हृदयम् । अमूर्तत्त्वाच्छूकलशो नैव भवति । क्वथदिव सर्वाङ्गीणं रुधिरं सहस्रवेधं जनयति ज्वरं गात्रे स्मृताद्दारुणतमात्ततस्ततश्चाविद्धकर्णानामवस्कन्दात् । कतिकृत्वो न रुरुधुः अपविद्धां भारतीमिमाम् । कति वा न देहुर्वृन्दशः, प्रबन्धानां कोशान् । किमन्यत् चक्षुरेव पाटितं भारतस्य । येनैवमन्धाः सन्धारयामो विडम्बनाहतं जीवितम् ।

अपि स्मर्यते स वटविटपी ? यः सितासितयोः सरितोः सम्भेदस्य साक्षी । अपि नामावशिष्यते तद्बुध्नवासिताया मृत्स्नायाः कणिकापि । अथ किं प्रत्यभिज्ञायते अधिष्ठानवेदिका सोमनाथस्य ।

किमन्यत् । स नाम भगवान्विश्वेश्वरोऽपि स्थाणुतां तत्याजेमां नगरीमधितिष्ठन्नपि वाराणसीम् । या किल अभूतलस्पर्शितया प्रतितिष्ठति दशाङ्गुलमुपर्येव ।

इदमन्यदन्यच्च वैशसं मिषत्येव ब्रह्मतत्रप्ररोहे संवृत्तम् । वन्ध्येयं वसुधा नैव सूते तान् भटान् । ये संवर्मयन्ति स्वानि तेजांसि चापाय शापाय च ।

तदेवं विहस्ते भारते चञ्चानिर्विशेषवृत्तौ वीरपुरुषसङ्घाते का नाम स्वरवर्णविशुद्धिर्मुखे समुन्मीलति ? किं नामोन्मूर्च्छति भुजे तदूर्जितं तेजः ? ऊरुस्तम्भगृहीता पादपरिवृत्तिदुस्थितिरिति न पर्यनुयोगः कश्चित् ।

अपि नामोदेष्यति भारतीमिमामुद्धरन् महावीरः कश्चित् । यथा रामो जामदग्न्यः । अपि वा समुत्पत्स्यते पुनरप्यैदंयुगीनो मयूरवर्मा । यो ब्रह्मकुलावमाननामसहमानः समित्कुशाज्यपरिपूतेन पाणिना समुद्बबर्ह शस्त्रं शर्मपदं च परित्यज्य वर्मपदमधत्त ।

कियती गुणनिका दधीचेः कशेरुकायां वज्रं वज्रमिति । तदेतत्सहस्रधारं वज्रं या ब्राह्मणस्य मुखे संस्कारपूता वाणी ।

ब्राह्मणब्रुव इत्यपि न पर्याप्तार्थः शब्दः, समाख्याने तस्य योऽग्रजन्मां दैवीं वाचं न धारयति। अगृहीता विपरीतं वा गृहीता सा वर्णोत्कर्षं कथमिव मुखे विदधातु।

साम्प्रतिका ब्राह्मणकुलीना दुर्वर्णोपसङ्ग्रह एव आदरमाबध्नन्ति। अन्ततः अवर्णपरिग्रहादपि न लज्जन्ते। क्व नाम पश्येमाध्ययनध्वनिमुखरितमुखानि ब्राह्मणकुलानि। कदा वा वीक्षिषीमहि अनवरताग्निहोत्रधूमलेखासम्पातशारानग्रहारान्। सर्वतो राक्षस्यो वाचः श्रयन्ते। विकृतानि रूपाणि दृश्यन्ते। सनातनधर्मह्रदयेर्माणि कर्माणि निर्मीयन्ते।

एवं नितान्तचिन्तासन्तानदन्तुरितनिखिलान्तरङ्गे एतस्मिन्व्यतीपाते कथमप्यतिवाह्य तां कालरात्रिमुन्मीलितालोकं मित्रमण्डलमभ्युज्जिहानमुद्वीक्षितुं यावदुच्चैः शिरो ध्रियते तावदयं कुतोऽप्यवक्षिप्तः शुष्काशनिः सहस्रदारं ददारेदं भारतं वर्षम्। अथ च कुतोऽपि सम्मूर्च्छितया पाश्चात्यया वात्यया समुत्थित आशुशुक्षणिः कक्षदाहं ददाह च। अप्रतीकारदारुणोऽयं संवर्तगर्तसम्पातः।

यद्यपि प्रथमं अविद्धकर्णसाम्पराये तथा निकृत्तमपि शलकशः बहिरेव विकारनिकारं प्रापितम्, तथापि अन्तस्संरम्भमाणमेव स्वे महिम्नि प्रतिष्ठितया श्रद्धया न व्ययुज्यत मण्डलं भारतम्।

साम्प्रतिकस्तु परिमरः क्षततदं तक्षत् अर्बुद इवानुद्भिन्नमुखः अन्तरेव नुदन् रुचिमेव स्वधर्मं निर्मार्ष्टि।

कति नाम न त्याजिताः स्वं स्वं नैश्रेयसमपि धर्मं, अन्ततो वेषभाषामपि औदरिका भारतत्रकाः। कति कति बलान्न हृतानि आमिषप्रलोभनैराक्रीतानि वा विद्यास्थानानां पुस्तकानि। कियन्तो वार्थाः अपहृता अपविद्धाः पीता उन्मूलिताश्च।

तानीमानि सर्वाणि अस्मद्भाग्यविपर्ययेणेव मूर्तिमता पाश्चात्येन घातिकग्रहेण सोमकेनेवापहृत्य क्वाप्यन्तरीपे निवेश्यन्ते। सा खलु प्राची दिक्, या सर्वाणि तेजांस्याविर्भावयन्ती अन्यासामपि दिशां

नामरूपसम्पदमुद्योत्य यावदात्मस्थितिप्रकाशाय प्रभवति ।

सापि च प्रतीची दिक्, या प्राच्या लब्धस्वरूपा तत उद्दितान्येव तेजांसि तिरोदधाना निरस्तनामरूपं विश्वमेवान्धे तमसि निमज्जयति ।

हतावशिष्टानामपि कोशानां विद्यानां वा अन्येयं कापि कृत्या कण्ठ-त्रोटं त्रोटयति । एकतो मुद्रणा । अन्यतो भृतकाध्यापनचोदना चेति ।

अमूभ्यामुभाभ्यां ग्रस्तानि वाङ्मयानि अचेतितमालामालं प्रसारितानि कन्दुकोपघातं हन्यमानानि कां कां नावहेलनामारोप्यन्ते ।

आद्यया गले गृहीताः कोशास्त्रिचतुरपाणिपरिवर्तनमात्रादेव विशीर्णाः गन्धर्वनगरभर्मसधर्माणः न केवलमजकनाशं नश्यन्ति प्रत्युत मातृकामपि कर्कट्यइव निर्मूलयन्ति । अन्त्यया च ग्रस्ता जनाः श्वनिर्विशेष-वृत्तयः परपरिष्कारसंव्यथितायुषः तृणलब्धरुचयः नास्मै न वा परस्मै लोकाय सम्पद्यन्ते ।

उत्तरतो भूर्जत्वगादिषु दक्षिणतस्तालपत्रादिषु समुल्लिखिताः प्रबन्धानां कोशाः पद्मानामिव सहस्रेणापि कराणामविरतं परिमृज्यमानाः सूर्याभिमुख्यमुज्जृम्भयन्स्येव सहस्रमपि समाः सहैव स्वपोषकैः ।

क्व गतं स्वतः पुरुषार्थभूतं सर्वतोमुखं तद्विद्याध्ययनम् । कुत्र वा विलीनं कृपाप्रसन्नहृदयैर्निष्पुण्यपुण्यं शिष्याणां तदध्यापनम् । कुतःशिक्षितमेतदर्धजरतीयं भृतकाध्यापनम् । कथमयमभिमतो भारतीयानां धर्मपरिमोषः, निरयपरिपोषो निश्रेयसालोकप्रदोषो वेषः । का नाम सा उत्कूलवीचिः निन्द्येषु रुचिः । किमिति नावेद्यन्ते सन्ततेर्गुरवः । कस्मै निरस्यते निरनुक्रोशं धेनुरिव कपिला कुलक्रमागता त्रयी । कस्मादयमवतीर्णः शतशाखप्ररोहः सकुल्येषु द्रोहः । धिग्धिक् श्रमो नाम ग्रहो दैवीं वाचं जग्रास । स्वस्ति कलये भारतधर्मैकलये गृहीतग्रहाय !

तदेयमुपर्युपर्युद्गच्छन्त्यां क्षारक्षारायामश्रान्तान्तःक्षोभनिर्घातास्फालनावशीर्यमाणायां सुदूरनिगूहितरलस्येव जलनिधेः तिरोहितप्रज्ञाचक्षुषोऽस्य भारतस्य वेलायां कूलपातं पतिते नःश्रेयसधर्ममर्मणि ।

"वर्णक्षोभकरापविद्धहृदयव्यावर्धितेर्ष्यानल-
ज्वालोद्गलूगनपूर्वरङ्गपिशुनैर्दुर्वर्णधूमोद्गमैः।
लोकः सम्प्रति लुप्यते श्रुतिवचः प्राप्तावलोकोऽञ्जसा
धिग्विष्टयैव समास्तृणाति जगतीं नीरन्ध्रमन्धं तमः" ॥

रक्षत कोशानामपि कोशं हृदयं यस्मिन् सङ्क्रान्तासु चतुर्दशस्वपि विद्यासु परश्शतं कोशाः सम्पत्तुमुलं भवन्ति।

कामं ह्रियन्तां विक्रीयन्तां वा कोशाः विद्यानां सम्पदां च। ननु कोशवन्तो धनवन्तश्चाग्रजजन्मानो हि प्रज्ञानेन। सत्येकस्मिन्विद्यासम्पन्ने हृदये कति कोशाः कृतीनां धनानां वा। नन्विदमेव नः समाश्वासन-स्थानम्। सत्यपि तिष्यसम्भवे महति कालुष्ये यन्नैकान्तो दुर्गता भारतीयं मही। सन्त्येवेतस्ततो गुल्मान्तरिता महौषधय इव ज्योतिष्मत्यो दैवीं वाचमाचारयन्तः पंक्तिपावनाः स्वालोकमात्रसम्पादितनिरामया विद्यानिष्णातधियः दूरदर्शिनः कृतिनः प्रत्युत विरलविरलाः अनर्थि-सम्पाततिरोहिताः अपांसुलमन्तरङ्गमध्यासते। विस्त्रभत तावन्न वयं श्रुत्या विरहिता भवामः। यावद्भगवती मन्दाकिनी पावयति भारतीमिमां विश्वम्भराम्। इदंपुनरश्रौष्म यथा—

"इह सन्तो न वा सन्ति सतो वा नानुवर्तसे।
तथा हि विपरीता ते बुद्धिराचारवर्जिता" इति।

तदिदमेव नः सन्ततेरविच्छेदाय, यत्तदाचार्यकमनुरुन्धानाः प्रियं धनमाहृत्य तस्मै प्रजातन्तुं मा व्यतिच्छिन्नद्महि। तच्च धनं तेनोपदिष्टा विद्या दर्पण इव प्रतिबिम्बिता। सा हि प्रियता, या शतगुणोत्तरता शिष्यप्रज्ञायाः। सा हि प्रजा, यथा तस्य वयम्, एवमस्माकमन्ये। स खलु तन्तुः यः पूर्वोत्तरमविरहयन् अनुबन्धः स खल्वविच्छेदः य उत्त-रोत्तरमुपसंक्रान्तिविद्यायाः इति। निर्गलितमिदमावेद्यते।

"उत्तिष्ठत मा स्वप्त अग्निमिच्छध्वं भारताः।
राज्ञः सोमस्य तृप्तासः सूर्येण सयुजोषसः" ॥

तदिदं प्राप्तकालं सांदृष्टिकायोदर्काय च। प्रथमं परिहर्तव्यो भारतलिङ्गिषु विस्रम्भः। अनिगदविशद एवायमभारतीयेषु। गोपनीयः कडङ्गरीयेभ्यः कुलक्रमागतो विद्यारहस्य-सस्य-सञ्चयः। प्रवर्तनीयो गृहीतप्रत्ययेषु शिष्येषु विद्यारिक्थविनियोगः। रक्षणीयः सुदृढं समुच्चित्य हतावशिष्टः विद्यास्थानानां कोशवगः। धारणीया ब्राह्मणैः श्रुतिसुभगा दैवी वाक्। व्यावर्तनीयानि हृदयानि अभारतीयामिषप्रलोभेभ्यः। अविस्रम्भणीया वर्णान्तरसहायप्रत्याशा। अध्येतव्या स्वतःपुरुषार्थभूता विद्या। परिहरणीया सर्वापदामास्पदमसूया। संवर्धनीया जीवातुर्मैत्री। सर्वमिदं भारतस्य समृद्धये परं भवति। यद्यप्ययं भारः अविशेषेण चतुर्णामपि वर्णानां शिरसि निहित एव। अन्योन्यं समवेतैरेतैः उद्ध्रियमाणा भारतीयं न विसंस्थुला भवति।

त एते चत्वारोऽपि वर्णाः स्वे स्वे कर्मण्यभिरताः अन्योन्यसमवेताः संसिद्धिं परमां गच्छन्ति। अन्यान् पूर्वानपरांश्च गमयन्ति। विपरीतास्तु न केवलं स्वतो विपरियन्तः कूलपातं पतन्ति, पातयन्ति च परानपि।

सत्यप्यमुष्मिन्व्यवसितविजृम्भे अहिभयोपजापजर्जरमिदं मण्डलं विशीर्यत इवाकृतहस्तावलम्बं इतरेतरं महति दुरुत्तरे गर्ते। येन दीपोद्गमैरिव विशदकायच्छायैः कज्जलोद्गारिभिः कलिबलैरुपजापितानि व्यतिवर्तमानानि अनिमित्तमेव प्रद्विषन्ति मुखभवं वर्णं वर्णान्तराणि।

प्रथमत एव विच्छिन्नो बाहुजबलावलम्बः ऊरुपादभवानां व्यापारश्च अवाच्येव प्रवर्तमानः नोर्ध्वप्रत्यासत्तये भवतीति निर्यवनिकमेव।

बाहूरुपादभवानां क्रमाणां विपर्यासेऽपि मुखभवक्रम एकस्मिन् स्वरवर्णपरिशुद्धे सति निर्विकल्पवेयं भारती सर्वस्म अर्थायेति विश्वजनीनः प्रत्ययः। तदिदं नाम साहित्यं विद्यानाम्। ननु सन्त्येवाङ्गभूतानामङ्गिभूतानां वा विद्यानां पारदृश्वानो विपश्चितः। एकैकशः सन्निधिरप्येषां लोकानामसंभेदाय। तथाप्यन्योन्यं सम्प्रतिपत्तिरेव तेजोऽभिवृद्धये रसाय च। यथा सर्पिषः पयसः फाणितस्य मधुनश्च। यथा च भगवत्याः गङ्गाया यमुनायाः सरस्वत्याश्चेति।

इदमवधानं दीयमानमभ्यर्थये-यत्तन्नाम, ननु विदितमेवैतदाबाल-गोपालं यद्ब्राह्मणानां स मयानुष्ठानादीनि न कयापि विधया परेषामुद्वेग-कराणि भवन्तीति। स चायं कालत्रयानुभूतः सार्वः प्रत्ययस्तान्येतानि समयानुष्ठानादीनि श्रुतिस्मृत्यनुशासनेन ऋषिभिर्नियमितानि न राजशा-सननियम्यानि। प्रजासामान्यया हितधोरण्या अन्योपघातव्यावर्तनेन संरक्षणमेव एषु राज्ञामधिकारः।

संप्रति दुर्दैववशात् अन्तर्ज्वरायमाणाः केऽप्युपजपन्तः किमपि छलमु-द्भाव्य ब्राह्मणैरनुष्ठीयमानानां सनातनधर्माणां लोकबाधकत्वमाघोषयन्तो दानभेदौ प्रयुंजाना दण्डेन स्वार्थं सिषाधयिषवः राजगामिनमभियोगं प्रस्तुवाना दृश्यन्ते।

परलोकफलप्रधाने अनवद्ये ब्राह्मणधर्मे हस्ताक्षेपा यदि राजाज्ञया क्रियेत, तर्हि श्वनिर्विशेषवृत्तितैव सनातनधर्मस्य संपद्येत, मनागत्र निर्दिश्यते अस्पृश्यतानिराकरणं-प्रौढाविवाहः-जात्यन्तरं प्रविष्टस्य दायभाग इत्यादि। सर्वमिदमध्यक्षयन्तो भवन्त एवात्र परमन्यज्जान-न्ति, सांप्रतिकस्य ब्राह्मणमहासभाधिवेशनस्य न केवलं ग्लायमानायाः शास्त्रपद्धतेस्तत्त्वप्रकाशनेन तेजस्संन्धुक्षणमेवैकं फलं प्रत्युत छद्मिभिः प्रक्षिप्तस्य पङ्कस्य निर्णेजनमपि। यदाह भगवान्—

यदा यदा हि धर्मस्य ग्लानिर्भवति भारत।
अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम्॥ इति।

अत्र तृतीयपादार्थ एव भगवतो हृदयमिति तन्निवारणाय तेन सृष्टा भवन्त एव विदन्ति विन्दन्ति च।

तामिमां प्रणालीं सूक्ष्मेक्षिकया विभावयन्तः सांदृष्टिकमौदर्किकं च कल्याणमन्योन्यसमवेता भवन्तस्साधयन्त्विति विस्रम्भमाणाः तस्यैव गीताचार्यस्य परमस्य पुंसश्चरणारविन्दयोः सप्रणिपातं प्रार्थयामहे॥

दिव्यां गिरं च सरितं च समाश्रितानां निर्णिक्तपूतमभिमूर्छतु तद्धि तेजः।
आभूतकल्पमनपायिनि भारतेऽस्मिन् अन्योन्यवैरजननी शममेत्वसूया॥

श्रीमङ्गलमूर्तये नमः ।

अखिलभारतवर्षीयब्राह्मणमहासम्मेलनस्वागताध्यक्षाणां

श्रीमन्महाराजाधिराज काशीराज श्रीप्रभुनारायणसिंह महोदयानां

स्वागताभिभाषणम् ।

यो गङ्गां सहसा मुदा वहदयं लीलावपुर्लीलया
यो बालं विपदो ररक्ष नियतं मृत्योः करालाऽऽस्यतः ।
क्षीरादप्रमथाप्तभूषिततनुर्देवादिदैन्यार्त्तिहृत्
पायादन्धकनिग्रहप्रभुरसावस्मान् सदोमाधवः ॥ १ ॥

अज्ञानान्धतमोध्वंसिज्ञानालोकप्रदायिने ।
शङ्कराय नमस्कुर्मोऽद्वैतमार्गप्रदर्शिने ॥ २ ॥

आर्याः, अस्मिन् ब्राह्मणमहासम्मेलने तत्र भवतः पूजनीयानाचार्यगणान् ऋषिकल्पान्ब्राह्मणपण्डितान् मान्यान् सामाजिकवर्गांश्चाहमभ्यर्थयितुमादिष्टोस्मि । सोऽहं श्रीमद्भिः पण्डितमहोदयैः सामाजिकवर्गैश्चाभ्यर्थनासमितेः सभापतित्वेन बहुमानितः समागतान् नानादिगन्तपावनानाचार्यगणान् विप्रवर्यांश्च अभिवादनपूर्वकस्वागतसम्भाषणेनाभ्यर्थये ।

अयि पूज्यतमाः सनातनधर्मसम्प्रदायप्रतिष्ठापका आचार्यगणाः, अधिगतनिखिलशास्त्रतत्त्वाः पण्डितमहोदयाः सामाजिकवर्गाश्च, यत्राद्य वयं मिलिताः सेयं विश्वेश्वरराजधानी मोक्षनगरी वाराणसी इति सुविदितैव श्रीमताम्, सेयं स्मरणातीतकालादद्यावधि श्रुतिषु प्रकाशमानेतिहासोपनिषत्सु रामायणमहाभारतयोश्च मोक्षनगरीति प्रसिद्धजनपदेति सुराजशासितेति निखिलपुराणोपपुराणकथाऽऽख्यायिकाकाव्याऽलङ्कारनाटकज्योतिषादिशास्त्रेषु प्रायशोऽऽष्टादशविद्यास्थानेषु संसूचितमाहात्म्या महानगरी विराजते ।

सेयं चिरन्तनसदाचारलीलाभूमिरष्टादशविद्यापीठस्थली आचारहीनानां विस्मृतनिजवर्णोचितव्यवहाराणां शोकतापक्लिष्टानां सदाचा-

र्व्यवहारशिक्षादानेन निखिलखेदहन्त्री, अगणितभक्तवृन्दप्रतिष्ठाऽनेकविधकारुकार्य्यसुशोभितगात्रार्धचन्द्रायमानया विष्णुपद्याऽवधौतपादा, पुरहरप्रिया, काशी, वाराणसी, अविमुक्त, रुद्रावास, महाश्मशाना, ऽऽनंदकानन, बनारसादिनामभिराख्यायते ।

निर्वाणकाशनात् काशराजावासतया वा काशीति, वरणास्योर्मध्यभवतया वाराणसीति, शिवाभ्यामपरित्यक्ततया अविमुक्तमिति, निखिलरुद्रावासतया रुद्रावास इति, महाप्रलये महाभूतानामप्यत्र शवरूपेणावस्थानतया महाश्मशानमिति आनन्ददायकतया आनन्दकाननमिति, यवनारिनाम्नाख्यातस्य चन्द्रवंशीयस्य राज्ञो राजधानीतया बनारस, इति संज्ञाकरणानि वेदपुराणेतिहासकाव्यादिषु अवगम्यन्ते ।

अत्र च विश्वविश्रुतकीर्त्तयो विज्ञानशालिनो धार्मिकचूड़ामणयः सुगृहीतनामधेयाः धन्वन्तरिदिवोदासप्रतर्द्दनालर्काऽजातशत्रुभृतयो राजान आसन् । येभ्यश्च क्षत्रियेभ्य आयुर्वेदब्रह्मविद्यासम्प्रदायः प्रवर्त्तित आसीत् । आसंश्चात्र त्रिकालदर्शिनो विज्ञातनिखिलतत्वाः कृष्णद्वैपायनादयो महर्षयः कति कति आचार्य्याः साधवो मुनयश्च ।

इदानीमपि सदाचारपरायणाः पंक्तिपावना वेदागमरहस्यज्ञा अनेके ब्राह्मणाः पण्डिताश्चात्र निवसन्ति, अत्र च देवस्थानादिदिदृक्षूणां प्रत्नतत्वानुशीलिनां शिल्पचातुर्य्यमभ्यस्यतां निखिलवेदागमशास्त्रशिक्षार्थिनां समवायो दरीदृश्यते ।

अत्रस्याश्चाधिवासिनो महासौभाग्यभूमय इति शिवरूपा इति च पुराणादिषु शृणुमः । तीर्थगौरवं मानयतां सदाचारपरम्परारक्षणव्रतिनां धार्मिकाणां न पुरेव अविघ्नं चावस्थानसम्भावना परिलक्ष्यते । तत्र चेदानीन्तना युवानः, अनेके सामाजिकाश्च प्रकृतितः कालतः शिक्षातश्च समाजान्तरनिविष्टाः कोटरस्थवह्नयो वृक्षा वनमिव, कुपुत्राः कुलानीव, नदीरयास्तीराणीव, वर्णाश्रमाचारं चिरन्तनीं मर्य्यादां च विध्वंसयन्ति । अत्र च केचन मनीषिणोऽशक्यप्रतीकारं धर्म्मविप्लवमिमम्मन्यन्ते, अपरे

च विध्वंससहायकाः, केचिच्च यथाशक्त्यं प्रतीकाराय चेष्टन्ते। तत्र ये उदासीना ये च विध्वंससहायकास्ते पाश्चात्यशिक्षा भावेण सनातनधर्म-विरोधिनः सदुपदेशः सन्मार्गेच्छुवः, ये च प्रतीकाराय यतन्ते ते प्रभुशक्ति-सम्पन्नैर्धार्मिकैः सामाजिकैश्च प्रोत्साहनीयाः, यथा सर्वशक्त्या देशस्यार्थे वर्णाश्रमिणाञ्चाभ्युदयाय कर्माचरितुं शक्नुयुः। न खल्वयमभिनवो वि-प्लवः, इतिहासपुराणादिषु प्रतियुगं रागप्राप्तमिमं धर्मविप्लवं श्रृणुमः, तत्र तत्र चातिक्रम्य सर्वामापदं सर्वोपरि अयं सनातनधर्म्मो वरीवर्त्ति।

आह च त्रिकालदर्शी भगवान् कृष्णद्वैपायनो द्वापरयुगान्ते "ऊर्ध्वबा-हुर्विरौम्येष न च कश्चिच्छृणोति मे। धर्म्मादर्थश्च कामश्च स किमर्थं न से-व्यत" इति। कृतयुगे हिरण्यकशिपुप्रभृतिदैत्यप्रभवः, त्रेतायां रावणादिरा-क्षसप्रभवः, द्वापरे अधार्मिकराजन्यप्रभवः, कलौ च अधार्मिकराजन्यजैन-बौद्धम्लेच्छादिसम्भवश्च धर्मविप्लव आसीत्, वर्त्तते च तादृशविप्लववि-घाताय धर्मस्थितये साधूनां परित्राणायच कदाचिद्भगवान् अवततार, क-दाचिच्च तदंशाविष्टः कदाचिच्च तदनुगृहीता भवादृशा एव समाजमूर्द्धन्या ब्राह्मणाः समाजस्थितिमकल्पयन्। अयि भोः पण्डिताः, श्रीमतां सामा-जिकेषु सर्वविधधर्मकार्य्याद्यनुष्ठानाय यथा सम्बन्धो न तथाऽन्येषामिति भवद्भिरेवानाचारदोषसञ्जातदुरारोग्यव्याध्यकालमृत्युपरकालरमणीयता-प्रभृतिदोषगणान् प्रदर्शयद्भिस्तादृशानाचारादीनां समूलोच्छेदः कर्त्तव्यः।

प्रभुशक्तिसम्पन्नश्च शास्त्रवाक्यानां पालनेन श्रीमतां सहायकत्वं स-म्पादयितुं शक्यते। आचरणप्रचारणाऽध्ययनाऽध्यापनाभिश्च श्रीमन्त एव केवलं समर्थयन्ते सनातनधर्मं रक्षितुं द्रढयितुञ्च। एवमद्यावधि तथाऽनु-तिष्ठन्ति च। न खलु नानाविधकार्य्यव्यापृतानां पालकसम्प्रदायानामाच-रणातिरेकं पश्यामो धर्म्मसंरक्षणोपायम्। यथा चेदानीं विप्लववादिनः प्रभवन्ति, तत्रापि कारणं सामाजिकानां तत्रभवतां पण्डितानाञ्च तत्र तत्र प्रयत्नशैथिल्यमेव। यदि नाम सामाजिका भवन्तश्च तदैव कृतपरिकराः सर्वोद्योगेन निवारयितुमचेष्टिष्यन्त तदा नैतावान् धर्म्मविप्लवोऽभविष्यत्।

यथा च जैनबौद्धम्लेच्छप्रभवदुर्दिनेषु विस्मृतसर्वकर्मणां सुगृहीतनामधेयानामाचार्य्यप्रवराणां कुमारिलप्रभाकरशङ्करवाचस्पत्युदयनप्रभृतीनां पण्डितधौर्याणां धर्मरक्षणाय यत्न आसीत्, तथैव श्रीमतामप्यावश्यकः।

इदानीन्तनाः सामाजिका आचार्य्यपादानामनुकम्पयैव वर्णाऽऽश्रमाचारं विलोकयितुं प्रभवन्ति च।

यत्र सहस्रपरिवत्सरान् जैनबौद्धम्लेच्छाः स्वतन्त्रधर्म्ममतानि प्रचारयामासुः, विध्वंसयाञ्चक्रिरे चार्य्यधर्मम्। तदाप्यतिदुर्गमप्रदेशेष्वपि तत्र तत्र गत्वा भगवान् शङ्कराचार्य्यः अस्मिन्समग्रे भारतवर्षे आर्य्यधर्मं पुनरस्थापयत्, निराकार्षीच्च वर्णाश्रमाचारवहिर्भूतान्यधर्ममतानि। सेयं कथा श्रीमतां ज्ञातपूर्वैव। आसंश्च तदानीमपि भारतीया अनेके राजानो वर्णाश्रमधर्म्मविरोधिनः, प्रभुशक्तिः संघशक्तिश्च प्राचीनाऽऽचारव्यवहारविलोपाय प्रयत्नमध्यतिष्ठताम्। तदापि सनातनधर्म्मो न विनष्टः कथमिदानीं विनङ्क्ष्यति। यद्यपि राजशक्तिर्न प्रत्यक्षं धर्मलोपाय प्रवर्तते परमुदासीनेव प्रतिभाति। केवलमुत्साहहीनतैव सामाजिकानां धर्मस्थितिह्रासाय इति मन्ये।

यदि नाम सामाजिका अविज्ञातपरिणामेषु विषयेषु अन्धा इव न प्रावर्त्तिष्यन्त तदा नैवाऽभविष्यदेतावान् विप्लवः। स्वकीयाऽऽचारव्यवहारत्यागस्य न प्रभुर्भवत्यन्यो न वान्यानेव दूषयितुं प्रभवामः।

यदि नाम आशामरीचिकयापहृतविज्ञानाः सामाजिकाः अज्ञातशास्त्ररहस्याः पण्डितविशेषाश्च निजधर्म्माचारबहिर्भूतां शिक्षां नाम न समर्थयेयुः, नापि वैदेशिकभाषाविज्ञानशिक्षायै सर्वानेव पुत्रान् तादृश एवानार्य्याचारदूषिते विद्यालये प्रेरयेयुः, नाभविष्यत्तदैतावान् विश्वग्रासी विप्लवः। किमयम्मोहः? अविमृश्यकारिता वा? अन्धविश्वासो वा? गतानुगतिकन्यायो वा? कालमहिमा वा स्यात्? यथा तथा वा भवतु, उपेक्षितव्याधिरिव महाऽनर्थाय सञ्जातोयं विप्लवः। य एव आदर्शा य एव धर्म्मप्रवक्तारो य एव समाजमर्य्यादापर्वतास्त एव यदि अकारणं विचलिता भवेयुः, कथं नाम सामाजिका न विघटयिष्यन्ति। साधारण-

भोगसाधनोन्नतिकामनया वा भविष्यद्वंशधराणां स्वाधीनजीविकायै वा स्वीयवृत्तिषु अश्रद्धया वा, धनिनां द्वारगमनक्लेशाऽसहिष्णुतया वा प्रवृत्तिरियं पण्डितेषु जातेति न जानीमः। परन्तु विचारदृष्ट्या नेदं समञ्जसम्। ज्ञाततत्त्वानां भोगसाधनोन्नतिचेष्टाऽऽपामरसाधारणीति न तत्रानुरागः कर्त्तव्यः। ऋषिप्रदर्शितस्वीयजीविकापरित्यागेन परकीयवृत्त्यवलम्बनं कथं स्वाधीनतानाम्ना व्यपदेष्टुं शक्यते। "स्वधर्मे निधनं श्रेयः परधर्मो भयावह" इत्युपदिशतां कथं ब्राह्मणोचितवृत्ति- ष्वश्रद्धा भवितुमर्हति, धनिनां द्वारगमनक्लेशकथापि न विचारसहा, तदपेक्षया बहुतरजनाऽनुरोधादिजनितक्लेशसम्भवाच्च।

ये च प्रतीच्यशिक्षिताः शिखासूत्रधारिणो विदुषः कटाक्षेणेक्षितुमपि नेच्छन्ति न वा सम्भाषन्ते तादृशानां गृहगमनापेक्षया स्वागताऽभिवाद- नादिपराणां कथञ्चिद्दित्सूनां दातृणां च धनिनां द्वारगमने कः क्लेशः काऽसम्भावना वा।

स्मरामि मुद्राराक्षसान्तर्गतमलयकेतोर्वचनस्य "स्वार्थे कस्मिन् समीहा पुनरधिकतरे त्वामनार्य्यं करोतीति" सेयं चेष्टा स्वस्य वंशधराणा- ञ्च सुखविघातायैव। यद्येवमत्रोच्यते-द्विविधा हि मानवाः, स्वतन्त्रप्रज्ञाः परतन्त्रप्रज्ञाश्च स्वतन्त्रप्रज्ञा दुर्लभा एव। परतन्त्रप्रज्ञाः प्रायशः, ते च गतानुगतिकन्यायमनुसरन्तीति तत्र विदितवेदितव्या ज्ञातलोकस्थितयः परिणामदर्शिनः परिणतवयसो विद्याव्रतस्नाताः पण्डितप्रकाण्डा अपि साधारणा इव कथं नाम तामेव समाजविप्लावकसरणिमनुगच्छन्ति।

यदि नाम सर्व एव सामाजिकाः पण्डिताश्च वैदेशिकाऽऽचारव्यव- हारशिक्षामार्गमनुगच्छेयुः, कथङ्कारमनालम्बा वर्णाश्रमाचारशिक्षा अव- तिष्ठेत्। य एव वैदेशिकशिक्षाचारदोषान् कथयन्ति त एव यदि स्वीयपु- त्रादीन् तादृशशिक्षाचारेषु विनयन्ते तदा सामाजिकाः किं कुर्वन्तु, तदुपदेशानुष्ठानं तत्सदृशानुचरणं वा।

वयन्तु जानीमः आचरणं यथाकार्य्यकारि न तथा उपदेशः, उक्त-

ञ्चैतद्भगवता—"यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः । स यत्प्रमाणं कुरुते लोकस्तदनुवर्त्तते" ॥१॥ इति ।

अथेदानीं ब्राह्मणा अपि वैश्यशूद्रकर्माणो ब्राह्मणेतरे च विप्रकर्माणः परिदृश्यन्ते । तत्रतत्र स्ववृत्तावसन्तोषः कारणम् । असन्तोषे चार्थकामयोरशमस्पृहैव कारणम् । अशमस्पृहा चार्थकामावेव पुरुषार्थौ मन्यमानानां साहचर्य्यादुपदेशतश्च सञ्जाता ।

तामिमां धर्म्मविचारविध्वंसिनीमापदं परिजिहीर्षूणां प्राचीनाचारशिक्षाव्यवहारचञ्चुराणां धर्म्मभीरूणां सामाजिकानां पण्डितानाञ्च स्वप्रभावाऽधिकृतेषु पुत्रशिष्यादिषु तादृशाचारशिक्षाव्यवहारप्रवर्त्तनमेव तादृशाचारादिरक्षणोपाय इति लौकिकदृष्ट्या युक्त्या चाभ्युपगच्छामः ।

यथा च स्वाचारे पुत्रादीनां प्रतिष्ठापनद्वारा विपत्प्रतीकारः सुकरः स्यान्न तथाऽन्यप्रयत्नसहस्रैः, नास्त्यसाध्यं तपस इति हि पुराणादिषु श्रूयते । एतादृशे घोरेपि धर्मविप्लवे श्रीमन्तः पूज्यतमा आचार्यगणाः पण्डितप्रकाण्डा ब्राह्मणाश्च सम्भूय यत् सनातनधर्मरक्षार्थं महान्तं प्रयत्नमाचरन्ति तेन वयमिदानीमाशास्महे यच्छ्रीमतां प्रयत्नं श्रीभगवानवश्यं सफलं विधास्यति । स हि भगवानार्त्तत्राणाय धर्म्मसंरक्षणाय च प्रतिजज्ञे न कथं श्रीमतामीप्सितं पूरयिष्यति ।

महाग्राहेण संग्रस्तं कातरं शरणागतम् ।
गजेन्द्रं मोक्षयामास सेयं पौराणिकी कथा ॥
यस्य निश्वसितं वेदा यस्येच्छाकल्पितं जगत् ।
स रक्षिष्यति धर्म्मज्ञो येनाचारः प्रवर्त्तितः ॥ १ ॥
सत्यः सनातनो यश्च धर्मो देवर्षिसत्कृतः ।
स कथं विप्लवेभ्यश्च नात्मानमुद्धरिष्यति ॥ २ ॥
यत्पादपद्ममदधत्पद्मनाभो हृदा स्वयम् ।
तेभ्यो जगत्पुनीतेभ्यो ब्राह्मणेभ्यो नुमः सदा ॥

॥ इति शिवम् ॥

अखिलभारतवर्षीय ब्राह्मणमहासम्मेलन प्रबन्धकारिणी सभा

एवं विगत कालिया ब्राह्मणमहासम्मेलन के मनोनीत सभापति



महामहोपाध्याय श्रीयुक्त परिडतवर पञ्चाननतर्करत्न भट्टाचार्य महोदय।

* नमो ब्रह्मण्यदेवाय *

अखिलभारतवर्षीयब्राह्मणसम्मेलनप्रबन्धकारिणीसभापतेः

महामहोपाध्याय पण्डित श्रीयुक्त पञ्चाननतर्करत्न भट्टाचार्यमहोदयस्य

अभिभाषणम् ।

नमः सर्वजगद्बिम्बच्छायामण्डलमूर्त्तये ।
अनन्तज्ञानविज्ञानश्रेयःसौभाग्यपूर्त्तये ॥ १ ॥
शिवं गिरीशानतया जनार्द्दनं श्रीनन्दलालाभिधया द्विजोज्ज्वलम् ।
तमात्मभू विग्रहकृद्गुणाधिकं श्यामाङ्गभंगिं प्रणतोऽस्मि सन्ततम् ॥२॥
वन्दे तातमनल्पलोहितदृगम्भोजस्फुरच्छेमुषी-
तेजःसज्जितमञ्जुभाववदनोद्भासिप्रशान्तश्रियम् ।
पीनोरःस्थललोललोमलतया स्वान्तःस्थयज्ञानलोद्-
गच्छद्धूमशिखां दधानमरुणज्योतिः पदाम्भोभुवा ॥ ३ ॥

विदितमस्तु तावदत्रभवतां श्रीभारतधर्माचार्यनिदेशनियन्त्रितसदाचारवर्त्मनां सामाजिकानाम्, यद्ब्राह्मणमहासम्मेलनमष्टकृत्वः संघटितपूर्वम्, यदा यदा हि धर्मस्य ग्लानिर्भवति भारत । अभ्युत्थानमधर्म्मस्य तदात्मानं सृजाम्यहमिति भगवद्वचसि नितरां श्रद्दधानैरस्माभिः प्रतिसम्मेलनमेव अदृश्यत पुरतः सर्वब्राह्मणसदस्यतेजोमण्डलमध्यवर्त्ती शंखचक्रगदापद्मधरो भगवान् ब्रह्मण्यदेवः। अद्य पुनरस्मिन्नवेऽधिवेशने नवमतया समुद्घोषिते यथा बहिरङ्गानां नवीकारः, यथा च अखिलभारतवर्षीयचतुराश्रमिविद्वद्ब्राह्मणादिसमागमसौभाग्यलक्ष्मीर्नवीनतया नितरां विराजते । यथा च त्रिदिवाधिका भगवती वाराणसी सम्मेलनस्यास्य नवीनं क्षेत्रम्, तथैव दृश्यतां दृश्यतां पुरतो हरिहरमूर्त्तिः मुहुर्मुहुः

भैष्टेति वदन् कृपाकटाक्षपातैः कमलमालामयीमिव दिशमातनोति। प्रसीद प्रभो गृह्यतामयमधमस्य मे दासानुदासस्य प्रणामपर्यायः। अस्मिन् वैदेशिकशिक्षाविकारमये समये नास्माकं शरणमन्यदस्ति, श्रीभगवतः कृपैवास्माकमेकं शरणम्। पूर्वं हि धर्मरक्षणकामैरस्माभिः पुरुषकाररूपेण यद्यदाचरितं तत्सर्वं प्रायेण विफलं जातम्। समानकर्माणो ये ये बन्धवः सादरमुपासिताः, सर्व एव ते प्रायेण विस्रस्ताः केचन मृत्युना केचिद्वा मृत्योरधिकेन वैमत्येन इति दर्शं दर्शं भवत्करुणामात्रमपेक्षमाणा सद्ब्राह्मणानामियं गोष्ठी धर्मात्मनां भारतीयानां साहायकेन सम्पादिता। तत्परिचर्या च श्रीभगवत एव सपर्य्या, तदधिष्ठानमेव भगवदधिष्ठानम्, तत् करुणैव भगवत्करुणेत्यस्ति प्रतिपत्तिः, तेन प्रसीद भगवन् गृह्यतां सपर्या, अधिष्ठीयतामस्मिन् सदसि, क्रियतां निरवलम्बनेष्वस्मासु नितरामयोग्येष्वपि धर्मब्राह्मण्यरक्षणी करुणा।

एतेन मुख्यप्रयोजनं व्याख्यातम्। अस्ति, चावान्तरप्रयोजनं, तदुच्यते, चिरं जीवता मया दृष्टा प्राचीना समाजस्थितिः, क्रमविस्रस्तिश्च, तस्या यन्मूलं वैदेशिकी शिक्षा, वैदेशिकं हि राजचक्रं बहुजनपूर्णायामस्यां स्वर्णप्रसवित्र्यां भारतधरित्र्यामव्याहतमाधिपत्यं कामयमानमार्षोपदेशविरुद्धस्वदेशीयकौशलं शिक्षाव्यपदेशेन तथा प्रवर्त्तयामास, यथा तत्परावर्त्तितमतिकाः प्रायेण समाजस्थितिविरोधिनो भवेयुः, स्वांश्चावमन्येरन् अन्तर्भेदेन चत्वारो वर्णा विशेषतो वर्णबाह्या जीर्येयुः। अस्त्येव सर्वेषां मनुष्याणां साम्यं, कल्पितो वर्णभेदः स्वार्थसाधनपरैर्धूर्त्तब्राह्मणैः, निपीडिता हि प्राचीनाभिजाताः नवागतानामार्याणां प्रभावेन, शूद्राः खलु भारतवर्षस्य प्राचीनाधिकारिणः। येषां मूर्द्धन्या द्राविडा आसन्।" इत्येवं नाम वैदेशिकी शिक्षा, तया च शनैरुत्तम्भितो भेदः। भेदो हि राज्ञां प्रणेयः प्रथमोपायः। सति च भेदे वर्द्धमाने चान्योन्यं विद्वेषे यथावसरं तत्र तत्रानुकूलायमानस्य राजचक्रस्य समदृष्टितादिप्रशंसा च प्रवृत्ता। अथ गच्छति कियति काले तच्छिक्षापरिणतिरन्यादृशी जाता,

यया बहवो राजचक्रविद्वेषिणो बभूवुः, राजचक्रं हि समदर्शनं स्वपक्षस्य ख्यापयति, विषमदर्शनं च ब्राह्मणादीनाम्, आचरति च विषमं भारतीयः सह सजातीनां विरोधे, उपेक्षते च योग्यमपि भारतीयं राजकीयविशिष्टकृत्येषु, येन कनीयानपि स्वदेशस्यापकारः कल्याणं च प्रभूतं भारतस्य न तं पन्थानमाश्रयत इत्येवं वैषम्यावबोधः प्रद्वेषहेतुः प्रादुरासीत् । न तावत् तच्छिक्षायामस्ति जन्मान्तरवादः, नापि राजरूपस्य भगवद्विभूतित्वज्ञापनमपि तु राजचक्रोच्छेदपद्धतिप्रतिपत्तिः । तदनुशीलनलब्धप्रकर्षाणां केषाञ्चन वैदेशिकशासनोच्छेदबुद्धिरुदपादि । बमगोला (बोम) इति प्रसिद्धसंहारप्रहरणं यस्याः फलमन्ये च तत्तदुपायास्तेषामासन्, समाचरितबन्धुद्रोहाणां कियताञ्च भारतीयानां कर्मणा परिज्ञाततदुदन्तेन राजचक्रेण रक्तलोचनेन सता तथोग्रदण्डः समुद्गूर्णः, येन सापराधा निरपराधाश्च सममेव सन्ताडिताः । अद्यापि यदाघातकातराः पङ्गव इव वर्त्तन्ते केचित् तद्वित्रासनिर्वर्त्तितसाहसाः नेतृपदाभिभूताः केचित् संघशक्तिवृद्धये नाम कूटराजनीतिचर्चापराङ्मुखान् स्वाचाररक्षणपरान् शास्त्रनिष्ठान् ब्राह्मणान् निगृह्णन्तः प्राचीनसमाजस्थितिमपध्वंसयितुं प्रवृत्ताः । ते हि अहिंसा सत्यमस्तेयं शौचमिन्द्रियनिग्रहः । एतत् सामाजिकं धर्मं चातुर्वर्ण्येऽब्रवीन्मनुरिति भगवतो मनोरुपदेशं तृणाय मत्वा धार्मिकहिंसामसत्यमात्मस्तेयमाशौचं कपटसत्यकवचेनाऽऽच्छादयन्तोऽनुतिष्ठन्ति स्वैराचारं धर्माचारवतो भण्डा इति विनिन्दन्ति । देशोद्धार एव परममस्माकं कर्म इति भावं प्रकटयन्तो देशमध एव पातयन्ति—न हि श्रुतिस्मृत्युदितधर्मभ्रंशनं कदाचिदुद्धारोपायो भवितुमर्हति । स्वाधीनतैव परमोऽर्थ इत्युदीरयन्तः अन्तश्च बहिश्च सर्वथैव परतन्त्रा भवन्ति प्रयच्छन्ति च पारतंत्र्यमाश्रवेभ्यः । स्वशास्त्रविधिमुत्सृज्य स्वैराचारपराः स्वेषां चिरन्तनभावमपजहतः स्वीकुर्वाणाश्च म्लेच्छभावपारतंत्र्यं कथं नाम नामापि गृह्णन्ति स्वातन्त्र्यस्येति भृशं चित्रीयामहे । भोज्यदानविनिमयेन वा ललनो-

पचारदानपरिवर्त्तेन वा सज्ञार्पणकौशलेन वा प्रायेण तेषामर्था ह्रियन्ते पणननिपुणैर्वैदेशिकैः । न हि वैदेशिकद्रव्यसम्भारव्यवहारमन्तरेण तेषामहरेकमप्यतिवर्त्तते इत्येवं परतन्त्रवृत्तयः स्वातंत्र्यस्वरूपमप्यजानन्तः स्वाधीनतावादेन परप्रत्ययनेयबुद्धीन् व्यामोहयन्ति । केचित्तु बाह्याचारेण प्राचीनभावमाश्रयमाणा अपि मनसा तानेवानुकुर्वते । तथाहि न तेऽपि शास्त्रं बहु मन्यन्ते, नापि चिरन्तनाचारं, वैदेशिका यथा ब्राह्मणद्वेषं प्रचारयामासुः तेऽपि तथैवाभ्युपगच्छन्ति, न च विश्वसन्ति जन्मान्तरीयकर्मफलेन जात्यायुर्भोगान् । इत्येवं परानुकरणपटीयसा मनसा चिन्त्यमानं स्वातंत्र्यमपि पारतंत्र्यायैवैकः प्रकारः, न हि दौवारिकरक्षितो गृहपतिः परतन्त्रो भवति नापि दौवारिकविरहितो ऽप्रावृतद्वारेषु गृहेषु निवसन् निगडबद्धः पुरुषः स्वतंत्रो भवति । आर्षपद्धतिमनुसरंतो वर्णाश्रमिणः सुदीर्घमनेहसं बाह्यपारतन्त्र्यमनुभवन्तोऽपि आन्तरेण स्वातन्त्र्यामृतेनाऽऽप्यायितजीवितात्ययं नापेदिरे । प्रत्युतापेदिरे पुष्टिम् ।

आर्षपद्धतिपरित्यागप्रणयिनश्च साम्प्रतिका यद्यपि बाह्यपारतन्त्र्याद्विमुच्येरन्, आन्तरपारतंत्र्यकालकूटास्वादसम्मूढा जीवितादेव भ्रश्येयुः, एवं नाम गतानुगतिकतया वयमपि मा भूमेति समानशीलव्यसनेषु निवेदनमेकमवान्तरप्रयोजनम् । अपि च साम्प्रतम्—

नेतृत्वं नाम शास्त्रावमन्तृत्वम्,
देशभक्तिर्नाम ब्राह्मणद्वेषः,
औदार्यं नाम अविचारेण पानभोजनम्,
समदर्शनं नाम प्रतिष्ठितदेवालयेषु सर्वजातिप्रवेशनम्,
विद्या नाम परप्रतारणम्,
धर्म्मो नाम आत्मस्तेयम्,
कर्म्म नाम अनुकूलनीयपापानुवृत्तिः,
वीरत्वं नाम सदाचारत्यागः,
त्यागो नाम परस्वाधिपत्यम्,

दया नाम दुःखजीविस्वजनोपेक्षा,

कृतज्ञता नाम पित्रादिपरित्यागः,,

संस्कारो नाम समाजस्थितिभङ्ग इत्यादयो नवाः परिभाषाः प्रचरन्ति ।

स्वशास्त्रपरिनिष्णाता अपि न शिक्षितसंज्ञां लभन्ते । वैदेशिकशिक्षा-कवलितास्तु तामविसंवादमेवाधिगच्छन्ति । आपणक्रीतम्लेच्छान्नजीवि-नश्च चुल्लीहीनगृहाधिष्ठातारोऽपि पुरुषधौरेयाः महात्मत्वेन संज्ञायन्ते हिन्दुनामलाञ्छनमितरव्यावर्त्तनाय महम्मदीयैः प्रवर्त्तितमधुनाऽतिव्या-प्नुवदालक्ष्यते ।

यथाऽस्मत्समशीलव्यसना वर्णा भाषाविपर्ययजनितभ्रान्तयो मा भूवन्नित्येतदर्थमैकमत्यसाधनमपरं प्रयोजनम् । ये तावन्मूलतः सजा-तीया अपि विजातीयभावमापन्नाः समभाषा अपि विषमभाषाव्यहारिणः कुलतो मित्रभूता अपि शत्रयमाणाः शान्तिकामसमुपेक्षितराजनीतिवर्त्मना लब्धप्रवेशाः समाजाभ्यन्तरं दूषयितं प्रयतन्ते, न च स्वरूपतस्तावदिमान् जानीते लोकः, एते हि येषां राजनीतिचर्चाप्रतिनिधितया राजकीयपरि-षदि लब्धासनास्तेषामेव प्राणाधिकं धर्माचारं विध्वंसयितुमीहन्ते, इय-मेषामालम्बनशाखोच्छेदनी नीतिः सर्वतस्तारस्वरेणोद्घोषणीया, न खलु स्वशास्त्रविश्वासमन्तरेण भवति जात्यभ्युदयः । अयं विश्वासो यथा बद्धमूलो भवेत्तदर्थं प्रयतनीयम् । एवमुद्योगः सर्वत्र भारतप्रान्तेषु सममेव सम्पादनीय इत्यत्रैकमत्यं सर्वेषां सनातनधर्मिणां सहमेलनमन्त-रेण न भवतीति सम्मेलनमिदं तेनापि सप्रयोजनम् । सम्मिलितभग-वद्धर्माचार्यचरणावलोकपुण्यसंचयश्च विधान्तरदुर्लभं प्रयोजनम् ।

किञ्च सर्वधर्म्मविरहितानां राजनीतिचर्चामात्रसाराणां सामाजिक-तत्वमविदुषां नर्त्तनकूर्दनपटीयसां जनानामुल्लम्फनप्रोल्लम्फनवाक्-कन्दुकलोलाहतमनसः प्राकृतास्तद्वशतामधियन्ति । केचन मध्यमा-स्तेषु वीतरागा अपि तदितरेषामालस्यदोषजनितां वा मोहजनितां वा

बहुषु कर्मसूपेक्षामवलोक्यानन्यगतिकतया तदनुवर्त्तिनो भवन्ति। परे च समाश्रयणीयः कः पन्था इति संशेरते, चिरमनुत्थाने च तावदस्माकं सम्प्रति संशयाना अपि पुरस्तात्तद्वर्त्मैवाश्रयिष्यन्ति, एवं क्रमेण प्रसृते तदनुगमनप्रवाहे पिण्डोदकलोपः सर्वेषामेवास्माकं नियतमेव भविता।

दुष्करो हि संयम आपातक्लेशभयिष्ठश्च, सुकरः स्वैराचारो रमणीयश्चापातः।

विना शास्त्रविश्वासं विना परलोकभीतिं न चैतयोरुपादानहाने भवतः। शास्त्रविश्वासभङ्गे परलोकभयाभावे च सर्वा एव स्थितयो भज्येरन्, भग्नस्थितिकाश्च मानवाः पशुप्राया भविष्यन्ति। इत्येषाऽनर्थपरम्परा सर्वतो बोधनीया। तदर्थमप्येतन्महासम्मेलनम्। इत्येतावन्ति प्रयोजनान्यभिलक्ष्य संघटितमिदं महासम्मेलनं श्रीश्रीविश्वेश्वरकृपया श्री १०८ धर्माचार्यपादानां श्रीश्रीसन्यासिविप्राणां श्रीश्रीमद्विद्वद्ब्राह्मणानां श्रीश्रीमन्मिथिलेशश्रीश्रीकाशीनरेशश्रीमत्ताहेरपुरेश्वरश्रीमद्गौरीपुरेश्वरप्रभृतीनां राज्ञां सम्मेलनपोषकानां वणिग्वराणां च तत्तत्सभानां चानुग्रहेण सुसम्पन्नं भूयादिति शम्॥



श्री १०८ विश्वेश्वरः शरणम् ॥

"अखिल भारतवर्षीय ब्राह्मणमहासम्मेलन" काशी

के महोत्सव में

७ नवम्बर १९२८ ई० को

श्रीमान् भारतधर्मदिवाकर महाराजाधिराज दरभंगाधिपति

का

अभिभाषण ।

उद्गीतमेतत्परमं तु ब्रह्म
तस्मिंस्त्रयं सुप्रतिष्ठाऽक्षरं च ।
अत्रान्तरं ब्रह्मविदो विदित्वा
लीना ब्रह्मणि तत्परा योनिमुक्ताः ॥ १ ॥

संयुक्तमेतत्क्षरमक्षरं च
व्यक्ताव्यक्तं भरते विश्वमीशः ।
अनीशश्चात्मा बुध्यते भोक्तृभावा-
ज्ज्ञात्वा देवं मुच्यते सर्वपाशैः ॥ २ ॥

तमीश्वरानां परमं महेश्वरं
तं देवतानां परमं च दैवतम् ।
पतिं पतीना परमं परस्ता-
द्विदाम देवं भुवनेशमीड्यम् ॥ ३ ॥

हमारे देश के धर्म और गौरवस्वरूप श्रीमान् धर्माचार्य महोदय तथा परिडतमरडलीमरिडत विद्वान्शिरोमणि विद्वद्गण !

आज आप सब महाशयों की उपस्थिति में यह अखिल भारतवर्षीय ब्राह्मण महासम्मेलन कैसा उज्ज्वल रूप से जगमगा रहा है और कैसी अपूर्व शोभा की आभा चारों ओर विकसित होकर हम सब के हृदयों को प्रफुल्लित कर रही है और कैसा अनुपम दृश्य हमारे नेत्रों को पवित्रता से प्रस्फुलित कर रहा है और इस अवसर पर हमारा अन्तरात्मा कैसा गद्गद प्रसन्न और हर्ष से परिपूर्ण होकर मानों धर्मोत्साह का समुद्र चारों ओर लहरें लेता हुआ अपनी तरंगों से इस सभामण्डप को धर्मानन्द में निमग्न करता हुआ और देश भर में इसी आनन्दप्रवाह के उत्साह को फैलाता हुआ सब भूमि को धर्म की वर्षा से उर्वरा कर रहा है इस आनन्द और उत्साह को शब्दों द्वारा प्रकट करने का सामर्थ्य हम में नहीं।

[श्री विश्वनाथ दरबार में सम्मेलन की शोभा]

आप सब महानुभावों धर्माचार्यों दिग्गज विद्वानों ब्राह्मणकुल-भूषणों तथा और समस्त सज्जनों के विराजमान होने से, जो इस देश के समस्त प्रान्तों और राजधानियों से दूर २ से पधार कर इस महा सम्मेलन को अपनी शोभा और प्रतिभा से विभूषित कर रहे हैं, यह महा सभा ऐसी दे दीप्यमान हो रही है मानो धर्म रूपी नभोमण्डल में तारागण सहित अनेक चन्द्रमा प्रकाशित होकर अपनी सुधा वर्षा और अमृत रूपी किरणा से दिगदिगान्तर को धर्मजीवन प्रदान करते हुए परिव्याप्त और परिपूर्ण कर रहे हैं। हम हार्दिक धन्यवाद देते हैं उन धर्म प्रेमियों को, जिनके असीम उत्साह और परिश्रम से इस महान्

अनुष्ठान का प्रबन्ध हुआ और जिनकी सहायता से इस अनुपम महा-सम्मेलन का उद्योग इस प्रकार फलीभूत हुआ ।

परम पुनीत काशीपुरी में देवाधिदेव श्री विश्वनाथ तथा श्री-महाभगवती अन्नपूर्णा के पवित्र दरबार में जो इस महाधिवेशन का सम्मेलन हुआ यह और भी गौरवप्रद और शुभलक्षणयुक्त है, और आशा की जाती है कि भगवान् आशुतोष शंकर की परम कृपा और श्री जगदम्बा राजराजेश्वरी महेश मुख चन्द्र चकोरी, गिरिराज किशोरी साक्षात् अन्नपूर्णा भवानी के आशीर्वाद से, जिनके चरण कमलों में हमारे कोटानुकोट दण्डवत् प्रणाम हैं, आपका यह धर्मोत्साहपूर्ण परिश्रम सफल होगा और जिन शुभ कामनाओं से आपने इस महायज्ञ का अनुष्ठान किया है वह परिपूर्ण होंगी ।

[हमारा धन्यवाद और आपका कर्त्तव्य]

सज्जन वृन्द ! हमारे पास ऐसे कोई शब्द नहीं है जिनके द्वारा हम यथार्थ रीति से आपका समुचित धन्यवाद कर सकें उस पवित्र प्रतिष्ठा के लिये जो आप महानुभावों ने हमको इस अखिल भारतवर्षीय ब्राह्मण सम्मेलन का अध्यक्ष निर्वाचन करके प्रदान की है । यह आपकी अत्यन्त ही कृपा है कि आप सज्जनों ने हमें इस पद पर अभिषिक्त करके हमें सम्मानित किया है । इस पद के परम गौरवान्वित भार को ग्रहण करने की यथा योग्य सामर्थ्य न रखने का अनुभव करते हुए भी जो हमने इसको कृतज्ञता पूर्वक स्वीकार किया है तो उसका कारण यही है कि एक तो आप सब धार्मिक महानुभावों की ऐसी धार्मिक सेवा के विषय में आज्ञा पालन सब का कर्त्तव्य है और दूसरा हमें इस बात का विश्वास है कि जब आप सज्जनों ने हमें सभा नायक बनाया है तो आप हमको अपने शुभेच्छा पूर्ण आशीर्वादों द्वारा बल प्रदान करेंगे कि

हम इस पद की ज़िम्मेवारी को यथा योग्य रीति पर निर्वाह सकें। आप सब की सहायता और बल के विना हम इस बृहत् कार्य के सम्पादन में कृतकार्य नहीं हो सकते। किसी बड़ी सेना का नायक कैसा भी योग्य, चतुर और रणकुशल हो, परन्तु जब तक सारी सेना के सब वीर योद्धा तथा रथी महारथी गण उसकी सहायता पर पूर्ण उत्साह और प्राणपण से उद्यत नहीं होते तब तक सेना नायक विजय प्राप्त नहीं कर सकता। इसी प्रकार इस वर्त्तमान युद्ध क्षेत्र में जब कि हम अवतीर्ण हुए हैं जहां हमको कई प्रकार के विपक्षियों से संग्राम करना है और जो हमारे धार्मिक, सामाजिक, राजनैतिक तथा वर्णाश्रम संस्कार रूपी दुर्गों पर घोर आक्रमण कर रहे है, और विविध प्रकार से कूट-नीति और छल-बल द्वारा हमने इन दुर्गों पर अस्त्र शस्त्र चला रहे हैं, और जब ऐसे अस्त्र-शस्त्र उनके विफल हो जाते हैं तो विष युक्त आन्दोलन अर्थात् ज़हरीली गैस के द्वारा हमारी सेना को विमोहित करने का उद्यम करते हैं, तो ऐसी दशा में यह और भी परमावश्यक है कि हमारी सेना के सभी योद्धा गण खूब चौकस रह कर पार्श्वरक्षा, पृष्ठरक्षा, केन्द्ररक्षा, सीमारक्षा और दसों-दिशा की रक्षा में सचेत रहें और कहीं से कोई छिद्र ऐसा न दें कि ज़हरीली गैस की वायु हमारे धार्मिक दुर्गों में प्रवेश कर सकें। हमें किसी पर आक्रमण करने की इच्छा नहीं है परन्तु विपक्षियों के आक्रमणों से अपनी रक्षा और उनको इस आक्रमण में परास्त करने की परम आवश्यकता है और इसके लिये हमें सब प्रकार से कटिबद्ध होना चाहिये। यदि हमारे सेना के सब वीर अपने सब अस्त्रों को पैनी धार के साथ तेज़ और चमचमाते रख कर अपने पवित्र कवचों को धारण करते हुए, इस रण क्षेत्र में अपने धार्मिक, सामाजिक राजनैतिक आदि अनादि काल से निर्मित किलों की रक्षा पर उद्यत होंगे और कटिबद्ध रहेंगे तो अवश्य हम अपने पूर्व पुरुखाओं की समुज्ज्वल कीर्ति को सुर-

क्षित रखने में कृतकार्य होकर उनके आशीर्वाद के भागी होंगे।

[ब्रह्म-कुलभूषणों से निवेदन]

यह हमारा ब्राह्मण कुलोद्भव भाइयों का महा सम्मेलन है। और हमें भी उसी पवित्र विप्र वंश का गौरव प्राप्त होने के कारण से हमें विशेष कर अपने ब्राह्मण महानुभावों और ब्राह्मण कुल भूषण भाइयों से कुछ आवश्यक निवेदन करना है, और हमें आशा है कि जो कुछ अपने भ्रातृभाव के सम्बन्ध से हम आपसे निवेदन करेंगे इस पर आप विचार पूर्वक ध्यान देंगे। जो कुछ राजनैतिक, सामाजिक और धार्मिक आदि विषयों में हमें अनुभव प्राप्त हुआ है, उसे आप महानुभावों के समक्ष स्पष्ट रीति से प्रकट करेंगे; और जो हमारे ब्राह्मण विद्वानों, पण्डितों, आचार्यों, आदि का कर्त्तव्य इस वर्त्तमान असाधारण समय में विशेष रूप से है और इस वर्त्तमान स्थिति में हमें किस प्रकार अपने धार्मिक और सामाजिक सत्वों की रक्षा में उद्यत होना चाहिये और किस प्रकार विपत्तियों के प्रहारों को निष्फल करके अपने प्राचीन गौरव को दृढ़ रखने में कृत कार्य होना उचित है, इस पर आपके समक्ष में अपना विचार खुले दिल से प्रकट करेंगे कि आपको विदित हो जाय कि कौनसा रास्ता हमारे लिये सुगम और विजय प्राप्त करने का साधन है और किस प्रकार हम अपने विपक्षियों के सब प्रकार के चक्रव्यूह और सूचीमुख आदि व्यूहों का भेदन कर सकेंगे जो हमारे आक्रमण के लिये बड़ी कौशलता पूर्वक रचे जा रहे हैं।

[ब्राह्मण जाति पर परस्पर-विरुद्ध घोर आक्षेप]

प्रिय सज्जनों ! जैसे पहले समय में ब्राह्मण जाति सब से उच्च श्रेष्ठ और माननीय समझी जाती थी और सब विषयों में अग्रणीय थी वैसे ही आज कल हमारी यह अग्रजन्मा जाति सब से अधिक आक्षेपों का लक्ष्य हो रही हैं, और सब से अधिक प्रहार इसी जाति पर होते है। जितने आधुनिक समाज सुधारक उत्पन्न होते हैं और समाज सुधार का कोलाहल मचाते हैं वह अपने लेखों और भाषणों की तीक्ष्ण बाणों की वर्षा विशेष कर ब्राह्मण पण्डित मण्डली पर ही करते हैं और उन पर कठोराघात करते हुए यह अपराध उनके ऊपर लगाते है कि देशोन्नति समाजोन्नति राजनैतिक उन्नति किन्तु सब प्रकार की उन्नति के बाधक यह ब्राह्मण पण्डितगण ही है-यही उन्नति के पथ में कण्टक स्वरूप हैं—यही लोग देश को उन्नति के बदले उसको अवनति की ओर घसीट रहे हैं—यदि यह कण्टक स्वरूप बाधक रास्ते में रुकावटें न डालते वा न डालें और उनका अस्तित्व लोप हो जावे तो वह एक दम देश को उन्नति के शिखर पर घसीट कर ले जावें। उनके विचार में यह पुरानी चाल के पण्डित लोग ही उन्नति की गाड़ी के रास्ते में रोंड़े अटका रहे है और इसको कीचड़ और दल दल में फंसा रहे है।

महान् आश्चर्य तो यह है कि इधर हमारे देशवासी सुधारक भाई जो नई सभ्यता के रङ्ग में रङ्गे हुए है हम पर एक तर्फ से इस प्रकार के तीव्र आक्षेप करते है और उधर विलायत में सर माइकल ओड्वायर आदि तीव्र राजनैतिक नेता दूसरी तर्फ से ब्राह्मणों ही पर यह दोषारोपण करते हैं कि भारतवर्ष में फ़िसाद और उपद्रव की जड़ ब्राह्मण ही हैं। यही लोग बृटिश राज्य को विध्वंस करके अपना राज्य स्थापन करना चाहते हैं; अभी तक इनके अन्दर महान् शक्ति और बल हैं; इनका अदृष्ट

प्रभाव जनता पर ऐसा है कि बाहर वालों को दिखाई नहीं देता, परन्तु उसी अपने गुह्य प्रबल प्रभाव से यह अंग्रेज़ी राज के मूलोच्छेद का उपाय कर रहे हैं कि फिर अपना पूर्व अधिकार उनको प्राप्त होजाय जिस में अंग्रेजी राज्य ने बड़ी भारी बाधा डाली है। वह जब देखते है कि भारतवर्ष में बृटिश राज्य के विरुद्ध घोर राजनैतिक आन्दोलन के नेता लोकमान्य तिलक, सुरेन्द्रनाथ बनर्जी, सुब्रह्मण्य अय्यर, पं० मोती लाल नेहरू, पं० तेजबहादुर सप्रू आदि २ सब ब्राह्मणगण ही हैं तो उनके विचार में यह ब्राह्मण जाति जिसको हमारे यहां के हमारे सुधारक भाई बिलकुल निकम्मा और अकर्मण्य समझते है विलायत के उन राजनैनिक नेताओं की दृष्टि में महा भयानक और घोर विप्लव मचाने में बड़े प्रबल वेग के साथ काम कर रही है। ऐसी विचित्र परिस्थिति में इस ब्राह्मण जाति का (जो इन विविध लोगों को विचित्र और परस्पर विरूद्ध रङ्गों में दिखाई देरही है) क्या कर्तव्य है इसी गंभीर विषय पर हमें विचार करना है।

[ब्राह्मण जाति का संस्कृत भाषा रक्षा का उपकार और स्वार्थत्याग]

ब्राह्मण जाति पर चाहे कैसे भी कठोराघात हों परन्तु सम्पूर्ण देश हितैषियों और मातृभूमि भारत के सपूतों की दृष्टि में ब्राह्मण गण ही ऐसे असीम धन्यवाद और साधुवाद के भागी हैं कि केवल उन्हीं के निस्वार्थ परिश्रम और बड़े भारी बलिदान के कारण से अभी तक संस्कृत भाषा इस देश में जीवित है। जब कि और सब भारतीय जातियों ने अपनी इस प्राचीन मातृभाषा संस्कृत से मुंह मोड़ लिया है और सांसारिक सुख और ऐश्वर्य के लोभ से संस्कृत का पूर्ण परित्याग कर दिया है वहां यही ब्राह्मण सन्तान हैं जो अब भी एक २

समय अन्न खाकर, गर्मी सर्दी का दुख सह कर, परिश्रम करते हुए इस हमारी मातृभाषा के अभ्यास में अपनी आयु समाप्त करके बड़े भारी स्वार्थत्याग का उदाहरण दिखा रहे हैं जो श्रीमान् गांधी, लोकमान्य तिलक, देशबन्धुदास, अरविन्द घोष, मोतीलाल नेहरू आदि के अपूर्व स्वार्थत्याग की अपेक्षा अपने ढंग का किसी बात में कम स्वार्थ त्याग नहीं है। जिस संस्कृत भाषा को ब्राह्मणों से अतिरिक्त और सब क्षत्रियादि वर्ण एक "डैड-लैंगुयज" Dead Language अर्थात् मृत भाषा पुकारते है उसी भाषा को ब्राह्मण विद्वान्, और उनके सहस्रशः शिष्य ब्राह्मण-कुमार अभी तक जीवित रखे हुए है और यदि समय अनुकूल रहा तो आगे भी रखेंगे।

जब कि आधुनिक अंग्रेजी कालिजों के छात्र प्रायः पन्द्रह वर्ष के परिश्रम से एम० ए०, एम० एल० सी०, वकील, वैरिस्टर, डाक्टर इंजिनियर, पुलीस, अफ़ीसर मुन्सिफ़, डिपटी और सैशन जज़, बलकि हाई कोर्ट जज़ चीफ़ जस्टिस और एग्ज़ेक्टिव कौसलों और बड़े २ मिनिस्टरों के पद पर पहुँचने का मार्ग रखते हैं वहां एक संस्कृत का विद्वान् पण्डित २०।२५ वर्ष तक घोर परिश्रम से संस्कृत शास्त्रों का अध्ययन करके ग्रेजुएटों से कहीं अधिक संस्कृत ज्ञान प्राप्त करके एक साधारण पद प्राप्त करने की भी आशा नहीं रख सकता। केवल संस्कृत का और उसके शास्त्रों का अगाढ प्रेम है जो इन पण्डितों और ब्राह्मण कुमारों को इस बड़े भारी स्वार्थत्याग की प्रेरणा करता है।

जिन ब्राह्मण कुमारों ने इस शास्त्राध्ययन की वृत्ति को त्याग कर सांसारिक लाभ की वृत्तियों में योजना की तो वहां भी अपने पूर्व पुरुखाओं के तपोबल युक्त शुद्ध वीर्य प्रभाव से वह अन्य जातियों से बढ़ कर कृतकार्य हुए। कलकत्ता, पंजाब, बम्बई, मद्रास, इलाहाबाद, आदि सब हाई कोर्टों में सब से पहले जज़ ब्राह्मण ही हुए और अब भी बहुत से ब्राह्मण जज्ज, सिविलिएन आदि प्रधान पदों पर हैं। जस्टिस

पं० शंभुनाथ, जस्टिस पं० रामनारायण, सर गुरुदास बनर्जी, जस्टिस सर आशुतोष मुकर्जी, ज० सर आशुतोष चौधरी, ज० सर सुब्रह्मण्य अय्यर, चीफ़ जस्टिस सर शेषाद्रि अय्यर, राजा सर टी० माधवराव, सर भण्डारकर राजा, माधोलाल, राजा सूरजकृष्णकौल, राजा हरीकिशन कौल राजा नरेन्द्रनाथ, पं० मोतीलाल नेहरू, पं० अयोध्यानाथ, डा० तेजबहादुर सप्रू, लो० तिलक, राजा दीनानाथ, ज० गोकर्णनाथ मिश्र, मि० चन्दावरकर, डा० सर भालचन्द्र, मि० गोखले, आदि २ उच्चपदाधिकारी और विख्यात भारत-रत्नगण ब्राह्मण कुलोत्पन्न ही है जिसकी बराबरी और कोई जाति नही कर सकती किन्तु यूरपियन भी उनकी कुशाग्रबुद्धि के आगे सिर निवाते हैं। यदि इस सांसारिक उन्नति के साथ २ इन महाशयों में ब्राह्मण कुल का तपोबल भी होता तो इस उन्नति में और भी तेज प्राप्त होता और जिन २ में यह बल जितनी २ मात्रा में है उसका प्रभाव प्रकट है। हम लाख २ करोड़ २ धन्यवाद इन पूजनीय संस्कृत विद्वानों तथा ब्राह्मण कुमारों को अत्यन्त कृतज्ञता पूर्ण हृदय से देते हैं जो इतना बड़ा सांसारिक सुख का स्वार्थ परित्याग करके अपनी प्राचीन देववाणी संस्कृत को अभी जीवित रखे हुए हैं, जिससे अभी हमारा गौरव स्थित है, और उनकी कृपासे साधारण जनों को संस्कृत शास्त्रों का बोध प्राप्त हो सकता है। यदि ब्राह्मणकुमार इस प्रकार का प्रशंसनीय स्वार्थ त्याग करें तो संस्कृत भाषा और संस्कृत शास्त्रों का नाम भी इस देश में रहना असम्भव हो जाय।

[ब्राह्मणों द्वारा हमारे सनातन कर्मकाण्ड की रक्षा]

हमारा प्राचीन धार्मिक कर्मकाण्ड भी इन ब्राह्मणमहापुरुषों की कृपा से अभी तक जीवित है, और उनकी ही सहायता और अनुग्रह से हम

अपने धार्मिक कर्मकाण्ड और विविध यज्ञ आदि अनुष्ठानों को कर सकते हैं। यदि ब्राह्मण विद्वान् और उनके ऋषि कुमार शिष्य गण लगातार कई वर्षों के घोर परिश्रम से कर्मकाण्ड और धार्मिक अनुष्ठानों के कृत्य कर्मों का अभ्यास न रखते तो हमारे सब देवयज्ञ, पितृयज्ञ और सब बड़े २ महायज्ञ, हवन अनुष्ठान आदि सब का मानो लोप ही हो जाता। यद्यपि आधुनिक धर्म रहित शिक्षा प्राप्त लोगों का इन धार्मिक कृत्यों और अनुष्ठानों में विश्वास और श्रद्धा नही है परन्तु जिनका अभी तक है उनकी मनोकामना ऐसे ही धार्मिक कर्मकाण्डदक्ष ब्राह्मण सन्तानों द्वारा पूरी हो सकती हैं जिन्होंने केवल धर्मरक्षा के विचार से सब सुख स्वार्थों को त्याग परम परिश्रम द्वारा कर्मकाण्ड और अनुष्ठान विधियों के अभ्यांस में अपना आयु व्यतीत किया है जिसको यदि वह सांसारिक ऐश्वर्य प्राप्त करने की विद्याओं के अभ्यास में लगाते तो बड़े धनाढ्य और वैभव शाली होते। इसके लिए भी कोटानुकोट हार्दिक धन्यवाद इन भूदेव महात्माओं को है। परमात्मा से प्रार्थना है कि भूदेव जाति में यह अलौकिक सन्तोष और स्वार्थ त्याग निरन्तर बना रहे कि हमारी देववाणी संस्कृत और हमारे पुनीत धर्मग्रन्थ और हमारा परम विचित्र कर्मकाण्ड और विविध याज्ञिक अनुष्ठान विधि आदि का अस्तित्व बनारहे।

आज कल भी देशोन्नति के विचार से हमारे भूदेव महात्मा किसी से पीछे नहीं हैं। जितने हिन्दी समाचार पत्र आज कल देश के सत्वों के लिये रणभूमि में संग्राम कर रहे हैं इनमें अधिक तर ब्राह्मण कुमारों द्वारा स्थापित सञ्चालित और सम्पादित है और बहुत से विख्यात अंग्रेजी, गुजराती मरहठी, बंगाली तथा तामिल तैलंगू भाषाओं के पत्रों में भी ब्राह्मण कुमारों की लेखनी का चमत्कार प्रकट रूप से दिखाई देता है।

[ऐसी दशा में भी हमारी शोचनीय अवस्था क्यों ?]

अब विचारणीय बात यह है कि ऐसी स्थिति के होते हुए भी हम ब्राह्मण जाति की दशा ऐसी शोचनीय क्यों है ? और क्यों यह परम उत्कृष्ट जाति ऐसे कठोर और निन्द्य आक्षेपों का लक्ष्य हो रही है ?

इसका कारण यह है कि हम अपने स्वरूप को भूल रहे हैं और जो २ सत्व हमारे थे और जिन २ क्षत्रों में हमारा आधिपत्य था उनको हम छोड़ बैठे हैं। हममें परस्पर प्रेम भाव और एकता और एक दूसरे की शुभ कामनाओं का अभाव हो रहा है। हम परस्पर एक दूसरे से ही ईर्षा करते हैं और एक दूसरे के मान सन्मान से हर्षित से होनेके वदले द्वेषाग्नि हमारे हृदय में उत्पन्न होती है, अपना चाहे कुछ न बने पर दूसरे की प्रतिष्ठा भंग का उपाय करने में हम सन्नद्ध हो जाते हैं। कोई विद्वान् मण्डली यदि व्यवस्था किसी विषय में देकर कोई कीर्ति प्राप्त करे तो उसको लांछित करने के लिए झट एक दूसरी उसके विरुद्ध व्यवस्था किसी विरोधी दल की ओर से प्रकाशित हो जाती है जिस से सम्पूर्ण ब्राह्मण मण्डली की अप्रतिष्ठा होती है और उनका विश्वास जनता पर से उठ जाता है और उभयदल की निन्दा जनता में होती है। यदि सब प्रान्तों के सम्पूर्ण ब्राह्मण भाइयों में पूर्ण प्रेम और यथार्थ भ्रातृ भाव और परस्पर मान प्रतिष्ठा की वृद्धि का विचार रहे और सब भूदेवों में परस्पर में यथार्थ एकता का भाव उत्पन्न हो जावे तो अब भी हम ऐसी अवस्था प्राप्त कर सकते हैं कि किसी इतर जाति को हमारे तर्फ़ अपमान की आंख उठाकर देखने का भी साहस न हो, और अब भी हममें शक्ति प्राप्त हो सकती है कि हम अपना तथा अपने प्राचीन गौरव का अस्तित्व यथायोग्य रीति से स्थिर रख सकते हैं। इस लिये सब से प्रथम प्रार्थना हमारी आप से यह है कि आप जो यहां देशदेशान्तर और सब प्रान्तों के ब्राह्मण महानुभाव इस महासम्मे-

लन में एकत्रित हुए हैं यह प्रण करके यहां से उठें कि सब आपस में सच्चा प्रेम भाव रखेंगे और एक दूसरे की प्रतिष्ठा बढ़ाने में उद्यत रहेंगे और अपने २ प्रान्तों में जाकर स्थान २ पर ब्राह्मण मण्डली को उत्तेजित और संगठित करने में दृढयत्न होंगे ऐक्य के साथ अपने भाइयों की उन्नति में यथा संभव चेष्टा करेंगे तो अब भी हम इतने करोड़ इस भारतवर्ष में है कि हमारी परस्पर एकता और सहानुभूति रहने पर किसी में सामर्थ्य और साहस नहीं हो सकता कि हमारे सत्वों पर छापा मारे।

[हमारे कार्य क्षेत्र की संकुचितता और पूर्व पराक्रम का त्याग]

आज कल की हमारी स्थिति ऐसी है कि हमारे प्रतिष्ठित विद्वान् ब्राह्मण पण्डितों ने अपना कार्य क्षेत्र अत्यन्त ही संकाचत कर लिया है और जो अधिकार हमारे पूर्वजों को प्राप्त थे और जिन अधिकारों को उन्होंने अपनी योग्यता से अपने आधीन कर रखा था वह सब हमने छोड़ दिये है, और इतर जनों से उन पर अधिकार जमा लिया है और हम उनसे वंचित हो कर अपनी पूर्व उन्नत दशा से अवनत हो रहे हैं। इसमें सन्देह नहीं कि ब्राह्मणों का यथार्थ बल तपो बल है—ब्राह्मणों का प्रधान धन सन्तोष हैं-परन्तु जब तक देशोपकार, धर्मोपकार, जात्युपकार, धर्म रक्षा, गौरव रक्षा में इसे न लगाया जावे तब तक यह यथार्थ फलीभूत नहीं हो सकता। महामुनि वसिष्ठ कैसे शील स्वभाव तपस्वी और सन्तोषी थे परन्तु जब एक अभिमानी और बलोन्मत्त सम्राट् ने अपने सैनिक बलसे उनके साथ अपनी उद्दण्डता से अन्याय करना चाहा और उनके धर्म भाव पर बलात् आक्रमण किया तो उन्हीं शान्तमूर्ति वसिष्ठजी ने अपने ब्रह्म बल का कैसा उदाहरण दिखाया

यह आपको विदित है। महात्मा द्रोणाचार्य के सहपाठी द्रुपद राज ने, जब अपनी गुरुकुल की शिक्षा के समय अपनी प्रतिज्ञा की अवलेहना करके द्रोणाचार्य का अपनी राज सभा में अपमान किया, तो उन्हीं सन्तोष और शान्ति की मूर्ति द्रोणाचार्यजी ने कौरव पाण्डवों को धनुर्विद्या और रण कौशलता की शिक्षा देकर किस प्रकार द्रुपदराज को गुरु दक्षिणा रूप में बन्दी बनवा कर अपने सन्मुख उपस्थित कराया, और उसको उस अपमान के लिये पूर्ण दिक्षा रूप ताड़ना की और ब्राह्मण के अपमान का प्रतिकार कराया, यह भी आपको विदित है। जब कार्त्तवीर्य सहस्राजुंन आदि हैहयवंशीय राजाओं ने अपने पाशविक बल से मदान्ध होकर महात्मा जमदग्नि पर घोर अत्याचार करके उनका वध किया तो किस प्रकार परशुराम ने अपना ब्रह्म तेज प्रकट करके उनका समूल संहार किया, यह भी इतिहास से प्रकट हैं। राजा वेणु ने जिस समय धर्म पथ से भ्रष्ट होकर धार्मिक अत्याचार पर कमर बाधी तो किस प्रकार उस काल के ब्राह्मण देवताओं ने उसका संहार करके महाराज पृथु को उत्पन्न करके धर्म रक्षा की, यह भी प्रकट है। सारांश यह है कि ब्राह्मणों का कर्तव्य केवल पूजा पाठ पुरश्चरण आदि ही नहीं है किन्तु समय पड़ने पर सब क्षेत्रो में अपना प्रभाव दिखाना है और सब कार्यों में समयानुकूल पराक्रम दिखाना है।

हमारे प्राचीन काल में ब्राह्मण सभी विद्याओं और कला कौशल के आचार्य थे। रणविद्या, राजनीति, वैद्यक, चिकित्सा, इञ्जिनियरिंग् (स्थपत्ति) विद्या, अस्त्रविद्या, शस्त्रविद्या, व्यायामविद्या, कला-कौशल विद्या सब के गुरु ब्राह्मण ही थे और इसी लिये सब क्षेत्रों और सब कामों और सब दिशाओं में इनका प्रभाव माना जाता था। तपोबल को सुरक्षित रखते हुए वह प्रत्येक विद्या और सांसारिक राजनैतिक व्यवहारों में सर्वाग्रणी थे और इसी लिये उनका प्रभाव सर्वत्र विराजमान था और सब उनके गौरव के आगे सिर झुकाते थे।

(आज की हमारी विचित्र विषादग्रस्त दशा और श्रीकृष्णभगवान् के उपदेश पर चलने की आवश्यकता)

परन्तु अब हमारी दशा विचित्र हो रही है। या तो ऐसे ब्राह्मण विद्वान् मिलते है जो केवल पूजा पाठ तथा शास्त्रों के सूक्ष्म विचारों में लवलीन तथा शास्त्रार्थ में प्रवीण हैं और शास्त्रावलोकन मात्र में ही अपना समय व्यतीत करते है, और संसार में क्या हो रहा है, और किस प्रकार से धर्महानि हो रही है और राजनैतिक क्षेत्र में हमारे धर्म का कैसा अपमान हो रहा हैं उसकी ओर उनका यत्किञ्चित् भी ध्यान नही। अथवा ऐसे ब्राह्मण नेता मिलते हैं जो केवल मात्र राजनैतिक क्षेत्र में चतुर वा उच्चपदों पर प्रतिष्ठित हैं, परन्तु धर्म भाव का उनमें लेश मात्र भी नहीं है, किन्तु हमारे धार्मिक भावों की महा अवहेलना और उनको अति तुच्छ मानते हुए उनको घृणा पूर्वक पद दलित करके धर्म का उपहास करने में अपना गौरव मानते हैं जिससे इन अपने ब्राह्मण लीडरों के उत्पात के कारण से ही हमारे धर्मकी महा हानि हमारे समक्ष हो रही है।

